आरभ्य बाह्यतः शून्यं प्रथमे च द्वितीयके । तृतीयेऽपि च देवानामष्टाधिकशतद्रुमाः ॥135॥

चतुर्थे प्राक् च देवीनां चतुर्वृक्षाश्च पञ्चमे । वनं वाप्यश्चतुष्कोणवृत्ताद्याः षष्ठके नभः ॥136॥

प्रत्येकं च चतुर्दिक्षु सप्तमे तनुरक्षिणां । सहस्राणां च चत्वारि वृक्षास्तिष्ठन्ति मञ्जुलाः ॥137॥

। मिलित्वा १६००० ।

सामानिकसुराणां स्युरष्टमे पिण्डिता द्रुमाः । ईशाने चोत्तरे वाते सहस्राणां चतुष्टयम् ॥138॥

नवमे दशमे चैकादशे वह्नौ च दक्षिणे । नैऋत्यां त्रिपरिषदामन्तर्मध्यान्तवर्तिनाम् ॥139॥

द्वात्रिंशच्च सहस्राणां चत्वारिंशत्तथा पुनः । चत्वारिंशत्तथाष्टाग्रा जम्बूवृक्षा यथाक्रमम् ॥140॥

सेनामहत्तराणां च द्वादशे सप्त पश्चिमे । पद्मस्य परिवारेभ्यः पञ्चाग्रा मुख्यसंयुता ॥141॥

। मुख्यसहितपरिवारवृक्षाः १४०१२० ।

दक्षिणापरतो मेरोः सीतोदापश्चिमे तटे । आसन्नं निषधस्यैव स्थलं रूप्यमयं शुभम् ॥142॥

तत्र शाल्मलिराख्याता जम्बूसदृशवर्णना । तस्या दक्षिणशाखायां सिद्धायतनमुत्तमम् ॥143॥

शेषासु दिक्षु वेश्मानि त्रीणि तत्र सुरावपि । वेणुश्च वेणुधारी च देवकुर्वधिवासिनौ ॥144॥

नीलतो दक्षिणस्यां तु सहस्रे कूटयुग्मकम् । सीतायाः प्राक्तटे चित्रं विचित्रमपरे तटे ॥145॥

। १००० ।

निषधस्योत्तरस्यां च सीतोदायास्तटद्वये । पुरस्ताद्यमकं कूटं मेघकूटं तु पश्चिमम् ॥146॥

सहस्रं विस्तृतं मूले मध्ये तत्तुर्यहीनकम् । शिखरेऽर्धसहस्रं तु सहस्रं शुभ्रमुच्छ्रितम् ॥147॥

। १००० । ७५० । ५०० ।

प्रमाणेनैवमेकैकं कूटमाहुर्महर्षयः । कूटसंज्ञासुरास्तत्र मोदन्ते सुखिनः सदा ॥148॥

सार्धे सहस्रे नीलाद् द्वे नीलनामा ह्रदस्ततः । कुरुनामा च चन्द्रश्च तस्मादैरावतः परम् ॥149॥

। २५०० ।

माल्यवान् दक्षिणो(णे) नद्यां सहस्रार्धान्तराश्च ते । पद्मह्रदसमा मानैरायता दक्षिणोत्तरम् ॥150॥

। ५०० ।

निषधाद्युत्तरस्यां च नद्यां तु निषधो ह्रदः । कुरुनामा च सूर्यश्च सुलसो विद्युदेव च ॥151॥

रत्नचित्रतटा वज्रमूलाश्च विपुला ह्रदाः । वसन्ति तेषु नागानां कुमार्यः पद्मवेश्मसु ॥152॥

अर्धयोजनमुद्विद्धं योजनोच्छ्रयविस्तृतम् । पद्मं गव्यूतिविपुला कर्णिका तावदुच्छ्रिता ॥153॥

चत्वारिंशच्छतं चैव सहस्राणामुदाहृतम् । शतं पञ्चदशाग्रं च परिवारोऽम्बुजस्य सः ॥154॥

। १४०११५ ।

तटद्वये ह्रदानां च प्रत्येकं दशसंख्यकाः । काञ्चनाख्याचलाः सन्ति ते ह्रदाभिमुखस्थिताः ॥155॥

[उक्तं च - ति. प. ४ - २०४६]

एक्केक्कस्स दहस्स य पुव्वदिसाये य अवरदिब्भागे । दह दह कंचणसेला जोयणसयमेत्तउच्छेहा ॥1॥

। १०० ।

शतं मूलेषु विपुला मध्ये पञ्चकृतेर्विना । त्वग्रे पञ्चाशतं रुन्द्राः शतोच्छ्रायाश्च ते समाः ॥156॥

। [१००] । ७५ । ५० । १०० ।

आक्रीडावासकेष्वेषां शिखरेषु शुकप्रभाः । देवा कांचनका नाम वसन्ति मुदिताः सदा ॥157॥

उक्तं च - [त्रि. सा. ६६० ; ति. प. ४-२१२८]

दहदो गंतूणग्गे सहस्सदुग णउदि दोण्णि बे य कला । णदिदारजुदा वेदी दक्खिणउत्तरगभद्दसालस्स ॥2॥

। २०९२ ।

पुव्वावरभागेसुं सा गयदंताचलाण संलग्गा । इगिजोयणमुत्तुंगा जोयणअद्धस्स वित्थारा ॥3॥

सीताया उत्तरे तीरे कूटं पद्मोत्तरं मतम् । दक्षिणं नीलवत्कूटं पुरस्तान्मेरुपर्वतात् ॥158॥
सीतोदापूर्वतीरस्थं स्वस्तिकं कूटमिष्यते । नाम्नाञ्जनगिरिः पश्चान्मेरोर्दक्षिणतश्च ते ॥159॥
कुमुदं दक्षिणे तीरे पलाशं पुनरुत्तरे । सीतोदाया महानद्या अपरस्यां तु मेरुतः ॥160॥
पश्चात्पुनश्च सीताया वतंसं कूटमिष्यते । पुरस्ताद्रोचनं नाम मेरोरुत्तरतो द्वयम् ॥161॥
भद्रसालवने तानि सममानानि काञ्चनैः । दिशागजेन्द्रनामानो देवास्तेषु वसन्ति च ॥162॥
अपरोत्तरतो मेरोः कांचनो गन्धमादनः । तस्मात्पूर्वोत्तरस्यां च वैडूर्यो माल्यवान् गिरिः ॥163॥
पूर्वदक्षिणतो मेरोः सौमनस्यो हि राजतः । विद्युत्प्रभस्तापनीयो दक्षिणापरतस्ततः ॥164॥
चतुःशतोच्छ्रया नीले निषधे च समागमे । एते पञ्चशतोच्छ्राया मेरुमाश्रित्य पर्वताः ॥165॥

। ४०० । ५०० ।

These mountains where they are connected with the Niṣadha and the Nīla, have a height of four hundred yojanas there. But near the Meru, their height has gradually increased to five hundred yojanas. //1.165//

400 । 500 ।

ये पर्वत जहाँ निषध और नील पर्वतसे संबद्ध हैं वहाँ उनकी ऊँचाई चार सौ (४००) योजन है किन्तु मेरुके पासमें उनकी यह ऊँचाई क्रमशः वृद्धिंगत होकर पाँच सौ (५००) योजन प्रमाण हो गई है।।१६५।।

उच्छ्रयस्य चतुर्भागमुभयान्तेऽवगाहनम् । ते पञ्चशतविस्तारा देवोत्तरकुरुश्रिताः ॥166॥

Their foundation (avagāha), both the sides, is one fourth part of their height. Supported by the Deva kuru and the Uttara Kuru, the width of these mountains is five hundred yojanas alone. //1.166//

उनका अवगाह दोनों ओर ऊँचाईके चतुर्थ भाग प्रमाण है। देवकुरु और उत्तरकुरुके आश्रित इन पर्वतोंका विस्तार पाँच सौ (५००) योजन मात्र है।।१६६।।

त्रिंशत्सहस्राण्यायामो द्वे शते नवसंयुते । षट्कलाश्च समाख्याताश्चतुर्णामपि मानतः ॥167॥

$३०२०९ \mid \frac{६}{१९} \mid$

The length of these four mountains is thirty thousand two hundred nine yojanas and six parts as related. //1.167//

$$30209 \frac{6}{19}$$

इन चारों ही पर्वतोंकी लंबाईका प्रमाण तीस हजार दो सौ नौ योजन और छह कला ($३०२०९\frac{६}{१९}$) प्रमाण कहा गया है।।१६७।।

सिद्धायतनकूटं च गन्धमादन-कौरवे । गन्धमालिनिकूटं च लोहिताक्षमतः परम् ॥168॥
स्फटिकानन्दकूटे च मेरोः प्रभृति तानि तु । अवगाहनतुल्यः स्यात्कूटोच्छ्रायोऽन्त्ययोर्द्वयोः ॥169॥

There are seven peaks, the Siddhāyatana, the Gandha-mādana, the Kuru (Uttarakuru), the Gandhamālinī the Lohitākṣa, the Sphaṭika, and the Ānanda are situated over the Gandhamādana, Gajadanta mountain from the Meru mountain. Out of these the measure of the height of these first and last two peaks is equal to the final foundation of both the sides. //1.168-169//

सिद्धायतनकूट, गन्धमादन, कुरु (उत्तरकुरु), गन्धमालिनी, लोहिताक्ष, स्फटिक और आनन्दकूट; ये सात कूट मेरु पर्वतसे लेकर गन्धमादन गजदन्त पर्वतके ऊपर स्थित हैं। इनमें प्रथम और अन्तिम इन दो कूटोंकी ऊँचाईका प्रमाण दोनों ओरके अन्तिम अवगाह (१००, १२५) के बराबर है।।१६८-१६९।।

सिद्धं च माल्यवन्नाम्ना कूटं चोत्तरकौरवम् । कच्छं सागरकं चैव रजतं पूर्णभद्रकम् ॥170॥

सीता हरिसहं चेति माल्यवत्स्वपि लक्षयेत् । उक्त एवोच्छ्रयोऽत्रापि नवस्वपि विभागतः ॥171॥

सिद्धं सौमनसं कूटं देवकुर्वाख्यमुत्तमम् । मङ्गलं विमलं चातः काञ्चनं च वशिष्टकम् ॥172॥

सिद्धं विद्युत्प्रभं कूटं देवकौरवपद्मकम् । तपनं स्वस्तिकं चैव शतज्वलमतः परम् ॥173॥

सीतोदाकूटमपरं कूटं हरिसमाख्यकम् । विद्युत्प्रभेषु सर्वेषु त्वेवमेतानि नामभिः ॥174॥

उभयान्तस्थकूटेषु तेषां देव्यो ह्यनन्तराः । दिक्कुमार्यश्च मध्येषु वसन्त्याक्रीडवेश्मसु ॥175॥

भोगंकरा भोगवती सुभोगा भोगमालिनी । वत्समित्रा सुमित्रा च वारिषेणा बलेति ताः ॥176॥

उक्तं च द्वयम् - (ति. प. ४, २१३६-३७)

मेरुगिरिपुव्वदक्खिणपच्छिमये उत्तरम्मि पत्तेक्कं । सीदासीदोदाये पंच दहा केइ इच्छंति ॥4॥

ताणं उवदेसेण य एक्केक्कदहस्स दोसु तीरेसु । पण पण कंचणसेला पत्तेक्कं होंति णियमेण ॥5॥

चित्रकूटः पद्मकूटो नलिनश्चैकशैलकः । शैलाः पूर्वविदेहेषु सीतानीलान्तरायता ॥177॥

त्रिकूटो निषधं प्राप्तस्तथा वैश्रवणांजनौ । आत्माञ्जनश्च पूर्वाद्याः सीतां प्राप्य प्रतिष्ठिताः ॥178॥

श्रद्धावान् विजटावाँश्च आशीविषसुखावहौ । अपरेषु विदेहेषु सीतोदानिषधाश्रिताः ॥179॥

नीलसीतोदयोर्मध्ये चन्द्रमालो गिरि[:] स्थितः । सूर्यमालो नागमालो देवमालश्च नामभिः ॥180॥

नदीतटेषु तूद्विद्धाः शतानि खलु पञ्च ते । गजदन्तसमाशेषवर्णनाः परिकीर्तिताः ॥181॥

षोडशैव सहस्राणि यष्टकोनशतानि षट् । द्वे कले चायता एते चतुः कूटास्तथैकशः ॥182॥

। १६ (६) ५९२ । $\frac{२}{१९}$ ।

पर्वताश्रितकूटेषु दिशाकन्या वसन्ति हि । नद्याश्रितेषु कूटेषु अर्हदायतनानि च ॥183॥

मध्यमेष्वथ कूटेषु व्यन्तराक्रीडनालयाः । अनुपर्वतमायामाः कूटानां गदितो बुधैः ॥184॥

द्वाविंशतिसहस्राणि भद्रशालवनं स्मृतम् । मेरोः पूर्वापरं सार्धशते द्वे दक्षिणोत्तरम् ॥185॥

गव्यूतिमवगाढाश्च गव्यूतिद्वयविस्तृताः । वेदिका योजनोत्सेधा वनात्पूर्वापरस्थिताः ॥186॥

नदी ग्राहवती नीलात्प्रच्युता ह्रदवत्यपि । सीतां पङ्कवती चेति वक्षारान्तरसंस्थिताः ॥187॥

पूर्वात्तप्तजला नाम्ना तस्या मत्तजला परा । नद्युन्मत्तजला चेति सीतां निषधपर्वतात् ॥188॥

क्षारोदा निषधादेव सीतोदा च विनिर्गता । स्रोतोन्तर्वाहिनी चेति सीतोदां प्रविशन्ति ताः ॥189॥

अपरेषु विदेहेषु वपराद् गन्धमालिनी । फेनमालिनिका नीलादूर्मिमालिन्यपि स्नुताः ॥190॥

एता विभङ्गनद्याख्या रोहित्सदृशवर्णनाः । दिशाकन्या वसन्त्यासां संगमे तोरणालये ॥191॥

Originating in both Videha regions, all the rivers have been related to be fourteen lac seventy-eight. //1.215//

दोनों विदेहक्षेत्रोंमें उत्पन्न हुई सब नदियाँ चौदह लाख अठहत्तर (१४०००७८) कही गई हैं।।२१५।।

सप्तादश च लक्षाणामयुतानि नवापि च । द्विसहस्रं नवत्यग्रं जम्बूद्वीपोद्भवापगा ॥216॥

। १७९२०९० ।

All the rivers originating in the Jambū island are seventeen lac, ninety thousand and two thousand ninety. //1.216//

। 1792090 ।

जम्बूद्वीपमें उत्पन्न हुई समस्त नदियाँ सत्तरह लाख, नौ अयुत (१००००×९) दो हजार अर्थात् बानबै हजार नब्बै (१७९२०९०) है।।२१६।।

वैडूर्यवृषभाख्यास्तु पर्वताः काञ्चनैः समाः । ससप्ततिशतं ते च वसन्त्येषु वृषामराः ॥217॥

। १७० ।

पूर्वापरविदेहान्ते संश्रित्य लवणोदधिम् । देवारण्यानि चत्वारि नद्योस्तटचतुष्टये ॥218॥

विस्तृतिर्द्विसहस्रं च नवशत्येकविंशतिः । अष्टादश कलाश्चैषां वेदिका वेदिकासमाः ॥219॥

। २९२१ । $\frac{१८}{१९}$ ।

विदेहानां स्थितो मध्ये कुरुद्वयसमीपगः । नवतिं च सहस्राणां नव चोद्गत्य मन्दरः ॥220॥

। ९९००० ।

In the centre of the Videhas, near the both the Kuru regions, there is situated the Mandara mountain which is ninety-nine thousand yojanas high. //1.220//

। 99000 ।

विदेहोंके मध्यमें दोनों कुरुक्षेत्रोंके समीपमें निन्यानबै हजार (९९०००) योजन ऊँचा मन्दर पर्वत स्थित है।।२२०।।

तस्यागाधं. सहस्रं च विष्कम्भोऽयुतमत्र तु । नवतिश्च दशान्ये स्युर्योजनैकादशांशकाः ॥221॥

। १००० । १००९० । $\frac{१०}{११}$ ।

Its foundation is one thousand yojanas, and the width of the bottom is ten thousand ninety yojanas and ten parts out of eleven parts of a yojana. //1.221//

1000 । 10090 $\frac{10}{11}$

उसकी नीव एक हजार (१०००) योजन और विस्तार (तलभागमें) दस हजार नब्बै योजन व एक योजनके ग्यारह भागोंमें से दस भाग (१००९०$\frac{१०}{११}$) प्रमाण है।।२२१।।

एकत्रिंशत्सहस्राणां शतानां नवकं दश । योजनानि परिक्षेपो द्वौ चात्रैकादशांशकौ ॥222॥

। ३१९१० । $\frac{२}{११}$ ।

Its circumference measures thirty-one thousand nine hundred ten yojanas and two parts out of eleven parts of a yojana. //1.222//

$$31910 \frac{2}{11}$$

इसकी परिधिका प्रमाण इकतीस हजार नौ सौ दस योजन और एक योजनके ग्यारह भागोंमें से दो भाग (३१९१० $\frac{२}{११}$ यो.) है।।२२२।।

एकत्रिंशत्सहस्राणि षट्छतं विंशति-द्विकम् । योजनानां त्रिगव्यूतिर्द्वे शते द्वादशापि च ॥223॥

दण्डा हस्तत्रिकं भूयोऽप्यङ्गुलानि त्रयोदश । भद्रसालपरिक्षेपो विष्कम्भोऽयुतमत्र तु ॥224॥

। ३१६२२ क्रो ३ दं २१२ ह ३ अं १३ । १०००० ।

In the Bhadraśāla forest, [above the earth], the circumference of the above mentioned Meru is thirty-one thousand six hundred twenty-two yojanas, three kośas, two hundred twelve dhanuṣas, three hāthas and thirteen aṅgulas. Here, the width of the Meru is ten thousand yojanas alone. //1.223-224//

yo 31622 kro 3 daṁ 212 ha 3 aṁ 13 । 10000 ।

भद्रसाल वनमें अर्थात् पृथिवीके ऊपर उपर्युक्त मेरुकी परिधि इकतीस हजार छह सौ बाईस योजन, तीन कोस, दो सौ बारह धनुष, तीन हाथ और तेरह अंगुल (३१६२२ यो., ३ को., २१२ धनुष, ३ हाथ, १३ अंगुल) प्रमाण है। यहाँ मेरुका विस्तार दस हजार योजन मात्र है।।२२३-२२४।।

ऊर्ध्वं पञ्चशतं गत्वा नन्दनं नामतो वनम् । तत्पञ्चशतविस्तारं परितो मन्दरं स्थितम् ॥225॥

The Nandana forest is situated five hundred yojanas up the Meru mountain. Its width is five hundred yojanas. It is situated all around the Mandara mountain. //1.225//

मेरु पर्वत के ऊपर पाँच सौ (५००) योजन जाकर नन्दन वन स्थित है। उसका विस्तार पाँच सौ (५००) योजन प्रमाण है। वह मंदर पर्वतके चारों ओर अवस्थित है।।२२५।।

नव चात्र सहस्राणि युतानि नवभिः शतैः । चतुष्कं च शतस्यार्धं भागा षट्कं च विस्तृतम् ॥226॥

। ९९५४ । $\frac{६}{११}$ ।

Here, the width of the Meru is nine thousand nine hundred fifty-four yojanas and six parts out of eleven parts of a yojana. //1.226//

$$9954 \frac{6}{11}$$

यहाँ मेरुका विस्तार नौ हजार नौ सौ चौवन (सौ के आधे पचास और चार $\frac{१००}{२}$ + ४) योजन और छह भाग (९९५४$\frac{६}{११}$) प्रमाण है।।२२६।।

एकत्रिंशत्सहस्राणि पुनश्चात्र चतुःशतम् । एकोनाशीतिसंयुक्तं परिधिर्बाह्यको गिरेः ॥227॥

Here, near the Nandana forest, the outer circumference of the Meru is thirty-one thousand four hundred seventy-nine yojanas. //1.227//

यहाँ नन्दन वनके समीप मेरुकी बाह्य (नन्दन वनके विस्तार सहित) परिधिका प्रमाण इकतीस हजार चार सौ उन्यासी (३१४७९) योजन प्रमाण है।।२२७।।

विष्कम्भो मुखे १२ $\frac{१}{२}$ । प्रवेशे १२५ ।

कच्छा सुकच्छा महाकच्छा चतुर्थी कच्छकावती । आवर्ता लाङ्गलावर्ता पुष्कला पुष्कलावती ॥192॥
अपराद्या इमे ज्ञेया विजयाश्चक्रवर्तिनाम् । नीलसीते च संप्राप्ताः प्रादक्षिण्येन भाषिताः ॥193॥
वत्सा सुवत्सा महावत्सा चतुर्थी वत्सकावती । रम्या सुरम्या रमणीयाष्टमी मङ्गलावती ॥194॥
पद्मा सुपद्मा महापद्मा चतुर्थी पद्मकावती । शंखा च नलिना चैव कुमुदासरितेऽपि च ॥195॥
वप्रा सुवप्रा महावप्रा चतुर्थी वप्रकावती । गन्धा खलु सुगन्धा च गन्धिला गन्धमालिनी ॥196॥
शी[illegible]निषधयोर्मध्ये वत्साद्या परिकीर्तिताः । पद्माद्या निषधासन्ना वप्राद्या नीलमाश्रिताः ॥197॥
द्वे सहस्रे शते द्वे च देशोनाश्च त्रयोदश । पूर्वापरेण विष्कम्भो दैर्घ्यं वक्षारसंमितम् ॥198॥

। २२१२ । $\frac{७}{८}$ ।

द्वात्रिंशद्विजयार्धाश्च तेषां मध्येषु तत्समाः । भारतेन समा मानैर्नवकूटविभूषिताः ॥199॥
एकशः पञ्चपञ्चाशच्छ्रेण्योः स्युर्नगराणि च । नित्यं विद्याधराश्चैषु परयोर्द्वीपयोस्तथा ॥200॥
क्षेमा क्षेमपुरी नाम्नाऽरिष्टारिष्टपुरी तथा । खड्गा पुनश्च मञ्जूषा त्वोषधी पुण्डरीकिणी ॥201॥
राजधान्य इमा ज्ञेयाः सीताया उत्तरे तटे । दक्षिणे तु सुसीमा च कुण्डला चापराजिता ॥202॥
प्रभंकरा चतुर्थी स्यात्पञ्चम्यङ्कावती पुरी । पद्मावती शुभेत्यन्या चाष्टमी रत्नसंचया ॥203॥
अश्वसिंहमहापुर्यो विजया च पुरी पुनः । अरजा विरजाऽशोका वीतशोकेति चाष्टमी ॥204॥
विजया वैजयन्ती च जयन्त्यन्यापराजिता । चक्रा खड्गा त्वयोध्या च अवध्या चोत्तरे तटे ॥205॥
दक्षिणोत्तरतो ह्येता नगर्यो द्वादशायताः । नवयोजनविस्तीर्णा हैमप्राकारसंवृताः ॥206॥
युक्ता द्वारसहस्रेण तदर्धैरपि चाल्पकैः । सप्तभिश्च शतैर्दभ्रै रत्नचित्रकवाटकैः ॥207॥
सहस्रं च चतुष्काणां रथ्या द्वादशसंगुणाः । एतासामक्षयाश्चैता नगर्यो नान्यनिर्मिताः ॥208॥
गंगा सिन्धुश्च विजये प्रसूते नीलपर्वतात् । विजयार्धगुहातीते सीतां प्रविशतश्च ते ॥209॥
योजनाष्टकमुच्छ्रिते गुहे द्वादशविस्तृते । विजयार्धसमायामे द्वे द्वे च प्रतिपर्वतम् ॥210॥

। ५० ।

एवं षोडश ता नद्यो भारत्या गङ्गया समाः । रक्ता रक्तवतीत्येवं निषधात्षोडशागताः ॥211॥
अपरेषु विदेहेषु ताभ्यामेव विनिर्गता । तावन्त्य एव तत्संज्ञाः सीतोदां तु विशन्ति ताः ॥212॥
समाख्याताश्च संज्ञाभिरेता ईरन्ति निम्नगाः । चतुर्दश सहस्राणि नद्यास्ताभिः सहैकशः ॥213॥
सचतुष्का सहस्राणामशीतिः कुरुनिम्नगाः । एकैकत्र द्वयोर्नद्योस्तदर्धं च तटे तटे ॥214॥

। ८४०० ।

चतुर्दश च लक्षाणामष्टाग्रा सप्ततिस्तथा । विदेहद्वयसंभूताः सर्वा नद्यः प्रकीर्तिताः ॥215॥

पूर्व एव सहस्रोनो विष्कम्भोऽभ्यन्तरो भवेत् । वने च नन्दने मेरोः परिक्षेपमतः शृणु ॥228॥

। ८९५४ । $\frac{६}{११}$ ।

Inside the Nandana forest, the internal width of Meru is equal to the earlier 9954 $\frac{6}{11}$ yojanas of measure as reduced by one thousand yojanas. Now, listen to the statement of internal circumference of Meru. //1.228//

$$8954 \frac{6}{11}$$

नन्दन वनके भीतर मेरुका अभ्यन्तर विस्तार एक हजार (५००×२) योजनोंसे रहित पूर्व (९९५४ $\frac{६}{११}$) विस्तारके बराबर है-- ९९५४ $\frac{६}{११}$ -१००० = ८९५४ $\frac{६}{११}$ यो. । अब आगे नन्दन वनके भीतर मेरुकी अभ्यन्तर परिधिका कथन करते हैं, उसे सुनिये॥२२८॥

विंशतिश्च पुनश्चाष्टौ सहस्राणि शतत्रयम् । षोडशाग्रं पुनर्विन्ध्या(द्या)दष्टावेकादशांशकाः ॥229॥

२८३१६ । $\frac{८}{११}$ ।

It should be known to be twenty and eight thousand three hundred sixteen yojanas and eight parts out of eleven parts of a yojana. //1.229//

$$28316 \frac{8}{11}$$

वह बीस और आठ अर्थात् अट्ठाईस हजार तीन सौ सोलह योजन और एक योजनके ग्यारह भागोंमेंसे आठ भाग (२८३१६ $\frac{८}{११}$) प्रमाण जानना चाहिये॥२२९॥

द्विषष्टिं च सहस्राणां गत्वा पञ्चशतं तथा । वनं सौमनसं नाम नन्दनेन समं भवेत् ॥230॥

The Saumanas forest is situated sixty-two thousand five hundred yojanas up the Nandana forest, which is equal to the Nandana forest in width. //1.230//

नन्दन वनसे बासठ हजार पाँच सौ (६२५००) योजन ऊपर जाकर सौमनस नामक वन स्थित है जो विस्तार में नन्दन वनके ही समान है॥२३०॥

चत्वार्यत्र सहस्राणि शते द्वे च द्विसप्ततिः । अष्टावेकादशांशाश्च विस्तारो बाहिरो गिरेः ॥231॥

(। ४२७२ । $\frac{८}{११}$ ।)

Here, the outer width of the Meru mountain is four thousand two thundred seventy-two yojanas and eight parts out of eleven parts of a yojana. //1.231//

$$14272 \frac{8}{11}$$

यहाँ मेरु पर्वतका बाह्य विस्तार चार हजार दो सौ बहत्तर योजन और एक योजनके ग्यारह भागोंमेंसे आठ भाग (४२७२ $\frac{८}{११}$) प्रमाण है॥२३१॥

त्रयोदश सहस्राणि शतानामपि पञ्चकम् । एकादश ततः षट् च भागाः परिधिरस्य च ॥232॥

[१३५११ । $\frac{६}{११}$ ।]

Its circumference is thirteen thousand five hundred eleven yojanas and six parts out of eleven parts of a yojana. //1.232//

$13511\frac{6}{11}$

इसकी परिधि तेरह हजार पाँच सौ ग्यारह योजन और एक योजनके ग्यारह भागोंमें से छह भाग (१३५११$\frac{६}{११}$) प्रमाण है।।२३२।।

तद्बाह्यगिरिविष्कम्भः सहस्रेण विवर्जितः । अभ्यन्तरः स एव स्यादिति संख्याविदां मतः ॥233॥

३२७२ । $\frac{८}{११}$ ।

Whatever is outer width of the Meru mountain, that very becomes the internal width on being reduced by twice the five hundred. //1.233//

$3272\frac{8}{11}$

यहाँ मेरु पर्वतका जो बाह्य विस्तार है वही एक हजार योजनों (५०० × २) से कम होकर उसका अभ्यन्तर विस्तार होता है ।।२३३।।

त्रिशत्येकोनपञ्चाशत् सहस्राणि दशैव च । त्रय एकादशांशाश्च परिक्षेपोऽल्पहीनकाः ॥234॥

[१०३४९ । $\frac{३}{११}$ ।]

The measure of the circumference is ten thousand three hundred forty-nine yojanas and three parts out of eleven parts of a yojana. //1.234//

$[10349]\frac{3}{11}$

इसकी परिधिका प्रमाण दस हजार तीन सौ उनंचास योजन और एक योजनके ग्यारह भागोंमेंसे तीन भाग (१०३४९$\frac{३}{११}$) प्रमाण है।।२३४।।

षट्त्रिंशतं सहस्राणां गत्वातः पाण्डुकं वनम् । मेरोर्मूर्धनि विस्तीर्णं सहस्रार्धं षडूनकम् ॥235॥

From this Saumanasa forest, the Pāṇḍuka forest is situated on the top of Meru, up thirty-six thousand yojanas. Its width is six yojanas less than half a thousand yojanas. //1.235//

इस सौमनस वनसे छत्तीस हजार (३६०००) योजन ऊपर जाकर मेरुके शिखरपर पाण्डुक वन स्थित है। इसका विस्तार एक हजारके आधे अर्थात् पाँच सौ योजनमें छह योजन कम (४९४) है।।२३५।।

शतं त्रीणि सहस्राणि द्विषष्टिर्योजनानि च । परिक्षेपोऽस्य विज्ञेयो मूर्ध्नि वैडूर्यचूलिका ॥236॥

The measure of its circumference should be known as three thousand one hundred sixty-two yojanas. On its head there is situated the peak full of lapis-lazuli. //1.236//

इसकी परिधि का प्रमाण तीन हजार एक सौ बासठ योजन जानना चाहिए। इसके मस्तकपर वैडूर्यमणिमय चूलिका अवस्थित है।२३६।।

द्वादशाष्टौ च चत्वारि मूलमध्याग्रविस्तृता । चत्वारिंशतमुच्छ्रिता गिरिराजस्य चूलिका ॥237॥

This Meru great mountain has its peak wide with twelve yojanas at the base, with eight yojanas at the middle and with four yojanas at the top. Its height is forty yojanas alone. //1.237//

यह मेरु गिरीन्द्र की चूलिका मूल में बारह, मध्य में आठ और ऊपर चार योजन विस्तृत है। ऊँचाई उसकी चालीस योजन मात्र है।।२३७।।

सप्तत्रिंशत् परिक्षेपो मध्ये पञ्चकृतिस्तथा । साधिका द्वादशाग्रे च चूलिकाया विदुर्बुधाः ॥238॥

। २५ ।

It has been shown by the learned, that the measure of the circumference of that peak near the Pāṇḍuka forest is thirty-seven yojanas, square of five yojanas in the middle and slightly greater than twelve yojanas at the top. //1.238//

विद्वानों के द्वारा उस चूलिका की परिधि का प्रमाण पाण्डुक वन के समीप में सैंतीस (३७) योजन मध्य में पाँच के वर्ग प्रमाण अर्थात् पच्चीस (५ × ५ = २५) योजन और ऊपर बारह (१२) योजन से कुछ अधिक बतलाया गया है।।२३८।।

एकादशसहस्राणि समरुन्द्रः सुदर्शनः । नन्दनाख्याद्वनादूर्ध्वं तथा सौमनसादपि ॥239॥

This Sudarśana Meru has a width of eleven thousand yojanas over the Saumanasa forest from the Nandana forest. //1.239//

यह सुदर्शन मेरु नन्दन वनसे तथा सौमनस वनसे भी ऊपर ग्यारह हजार (११०००) योजन प्रमाण समान विस्तार वाला है।।२३९।।

मुखभूम्योर्विशेषस्तु पुनरुत्सेधभाजितः । भूमुखाभ्यां क्रमाद्धानिश्चयश्च भवति ध्रुवम् ॥240॥

On dividing the base as reduced by the top, by the height, the quotient gives the measure of decrease from the base, and increase from the top definitely. //1.240//

भूमिमें से मुखको कम करके शेषको ऊँचाईसे भाजित करनेपर जो लब्ध हो वह निश्चयसे भूमिकी ओरसे हानिका तथा मुखकी ओरसे वृद्धिका प्रमाण होता है।।२४०।।

एकैकादशांशेन गुणितेष्टे मुखे युते । भूम्यां वा शोधिते व्यासो मेरोरिष्टप्रदेशके ॥241॥

The desired height is multiplied by one upon eleven, the product is added to the top or reduced from the base. This gives the knowledge of the width of the Meru at the desired station. //1.241//

एक बटे ग्यारह ($\frac{१}{११}$) से अभीष्ट ऊँचाईके प्रमाणको गुणित करनेपर जो प्राप्त हो उसे मुखमें मिला देने अथवा भूमिमें से कम करने पर इष्ट स्थानमें मेरुका विस्तार जाना जाता है।।२४१।।

एकेन पञ्चमांशेन गुणितेष्टे मुखे युते । भूम्यां शोधिते व्यासो चूलिकेष्टप्रदेशके ॥242॥

The desired height of the peak is multiplied by one upon five. The product is added to the top or is reduced from the base, giving the width of the peak at the desired station.//1.242//

एक पञ्चमांशसे चूलिकाकी अभीष्ट ऊँचाईको गुणित करनेपर जो प्राप्त हो उसको मुखमें मिला देने अथवा भूमिमेंसे कम कर देने पर अभीष्ट स्थानमें चूलिकाके विस्तारका प्रमाण प्राप्त होता है।।२४२।।

एकादशप्रदेशेषु एकस्मान्मूलतो भवेत् । हानिरङ्गुलकिष्काद्यादेवं स्यादिति निश्चितम् ॥243॥

Here, there has been loss of one point originally, from one point to eleven points in the width. Similarly, originally there has been a loss of one kiṣku etc. also on eleven kiṣkus as well as a loss of one aṅgula at eleven fingers (aṅgulas) originally, this is definite. //1.243//

यहाँ विस्तारमें मूलतः एक प्रदेशसे लेकर ग्यारह प्रदेशोंपर एक प्रदेशकी हानि हुई है। इसी प्रकारसे मूलतः ग्यारह अंगुलोंपर एक अंगुलकी तथा ग्यारह किष्कुओं पर एक किष्कु आदिकी भी हानि होती गई है, यह निश्चित है।।२४३।।

प्रथमो हरितालश्च ततो वैडूर्यसंनिभः । सर्वरत्नमयश्चान्य ऊर्ध्वं वज्रामयस्ततः ॥244॥

परिधिः पद्मवर्णश्च षष्ठो लोहितवर्णकः । मेरोरिमे परिक्षेपभेदा भूम्या भवन्ति ते ॥245॥

षोडशैव सहस्राणि सहस्रार्धं च विस्तृताः । प्रत्येकं षट्परिक्षेपाः सप्तमः पादपैः स्मृतः ॥246॥

Out of these six circumferences, the width of every circumference is sixteen thousand and half a thousand yojanas. The seventh circumference is built through trees. //1.246//

इन छह परिधियोंमें प्रत्येक परिधिका विस्तार सोलह हजार और एक हजारके आधे योजन अर्थात् साढ़े सोलह हजार (१६५००) योजन प्रमाण है। सातवीं परिधि वृक्षोंसे की गई है।।२४६।।

सप्तमस्य परिक्षेपभेदा एकादशोदिताः । भद्रसालवनं चान्यन्मानुषोत्तरकं वनम् ॥247॥

देवानामथ नागानां भूतानां रमणानि च । वनान्येतानि पञ्च स्युर्भद्रसालवने स्फुटम् ॥248॥

नन्दनं च वनं चोपनन्दनं नन्दने वने । सौमनसवनं चोपसौमनसमिति द्वयम् ॥249॥

सौमनसवने स्याच्च पाण्डुकं चोपपाण्डुकम् । पाण्डुकाख्यवने स्यातामिति बाह्याद् भवन्ति ते ॥250॥

मेरुर्वज्रमयो मूले सहस्रं योजनानि सः । एकषष्टिसहस्राणि सर्वरत्नमयस्ततः ॥251॥

अष्टत्रिंशत्सहस्राणि ततो हेममयोऽपि च । भवेदिति विनिर्दिष्टं परमागमकोविदैः ॥252॥

That Meru mountain is full of diamonds for one thousand yojanas in the foundation, full of all gems for sixty-one thousand yojanas above it, and full of gold for thirty-eight thousand yojanas further above it. Such has been instructed by the conversant of the supreme revelation. //1.251-252//

वह मेरुपर्वत मूलभाग (नीव) में एक हजार (१०००) योजन वज्रमय, उसके ऊपर इकसठ हजार (६१०००) योजन सर्वरत्नमय, तथा उसके ऊपर अड़तीस हजार (३८०००) योजन सुवर्णमय है; ऐसा परमागमके पारगामियों द्वारा निर्दिष्ट किया गया है-- १००० + ६१००० + ३८००० = १००००० यो. ।।२५१-२५२।।

माणा(ना)ख्यं चारणाख्यं च गन्धर्वं भवनं तथा । चित्राख्यं भवनं चैव नन्दने दिक्चतुष्टये ॥253॥

Inside the Nandana-forest, in four directions, four buildings named Māna, Cāraṇa, Gandharva and Citra, are situated. //1.253//

नन्दन वनके भीतर चारों दिशाओंमें मान, चारण, गन्धर्व और चित्र नामक चार भवन स्थित हैं।।२५३।।

त्रिंशद्योजनविस्तारः पुनः पञ्चाशदुच्छ्रयः । नवतिश्च परिक्षेपो वृत्तस्य भवनस्य च ॥254॥

In these right circular buildings, the width of every one is thirty yojanas, height is fifty yojanas, and [gross] circumference is ninety yojanas. //1.254//

इन गोलाकार भवनोंमेंसे प्रत्येकका विस्तार तीस योजन, ऊँचाई पचास योजन और परिधि (स्थूल) नब्बै योजन प्रमाण है।।२५४।।

प्रथमे भवने सोमो यमश्चारणसंज्ञके । गन्धर्वे वरुणो देवः कुबेरश्चित्रनामके ॥255॥

देव्यः कोटित्रयं सार्धमेकैकस्य समीपगाः । लोकपाला इमे ताभिः रमन्ते दिक्षु सर्वदा ॥256॥

। ३५००००० ।

वज्रं वज्रप्रभं नाम्नो सुवर्णाख्यं च तत्प्रभम् । वने सौमनसे सन्ति भवनान्येतानि पूर्वतः ॥257॥

मानं नन्दनसंस्थानादर्धं च तदिहेष्यते । लोकपाला इमे चात्र तावतीपरिवारिताः ॥258॥

। वि १५ उ २५ प ४५ ।

Relative to the buildings situated in Nandana forest, the measure of these mansions is recognized as half. Here also the universe-guard (lokapāla) remain surrounded by as many deities-female. //1.258//

नंदन वनमें स्थित भवनोंकी अपेक्षा इन भवनोंका प्रमाण आधा (विस्तार १५ यो., ऊँचाई २५ यो., परिधि ४५ यो.) माना जाता है। यहाँ भी ये लोकपाल उतनी ही देवियोंसे परिवेष्टित रहते हैं।।२५८।।

लोहितं चाञ्जनं तेषां हारिद्रमथ पाण्डुरम् । पाण्डुके चार्धमानानि तावत्कन्यानि लक्षयेत् ॥259॥

। वि ७ । १/२ । उ १२ । १/२ । प २२ । १/२ ।

In the Pāṇḍuka forest, the four mansions as Lohita, Añjana, Haridrā and Pāṇḍura are situated. Their measure is half relative to those of the Saumanasa forest. The deity virgins should be known to be as many. //1.259//

vi 7 $\frac{1}{2}$ u 12 $\frac{1}{2}$ pa 22 $\frac{1}{2}$

लोहित, अंजन, हारिद्र और पाण्डुर ये चार भवन पाण्डुक वनमें स्थित हैं। उनका प्रमाण सौमनस वनके भवनोंकी अपेक्षा आधा है- विस्तार ७ १/२, ऊँचाई १२ १/२, परिधि २२ १/२ यो. । देवकन्यायें उतनी ही जानना चाहिये ।।२५६।।

स्वयंप्रभविमानेशः सोमः पूर्वदिशाधिपः । स्थानकेषु विमानानां षट्कानां षट्सु भोजकः ॥260॥

। ६६६६६६ । उक्तं च [ ति. प. ८, २६७ ]--

छल्लक्खा छावट्ठी सहस्सया छस्सयाणि छासट्ठी । सक्कस्स दिगिंदाणं विमाणसंखा य पत्तेक्कं ॥4॥

वस्त्रैराभरणैर्गन्धैः पुष्पैर्वाहनविस्त(ष्ट)रैः । रक्तवर्णैर्युतः सर्वैः सार्धपल्यद्विकस्थितिः ॥261॥

वरारिष्टाविमानेशो यमो दक्षिणदिक्पतिः । पूर्ववत्कृष्णनेपथ्यः सार्धपल्यद्विकस्थितिः ॥262॥

जलप्रभविमानेशो वरुणश्चापरापतिः । सोमवत्पीतनेपथ्यो न्यूनपल्यत्रिकस्थितिः ॥263॥

वल्गुप्रभविमानेशः कुबेरश्चोत्तरापतिः । सोमवच्छुक्लनेपथ्यो न्यूनपल्यत्रिकस्थितिः ॥264॥

नन्दने बलभद्राख्ये मेरोरुत्तरपूर्वतः । कूटे तन्नामको देवो मानैः काञ्चनकैः समे ॥265॥

नन्दनं मन्दरं चैव निषधं हिमवत्पुनः । रजतं रुचकं चापि ततः सागरचित्रकम् ॥266॥

वज्राख्यमष्टमं कूटं द्वे द्वे स्यातां चतुर्दिशम् । नन्दने दिक्कुमारीणां सहस्रार्धोद्गतानि च ॥267॥

मूले तूच्छ्रयरुन्द्राणि मध्ये पञ्चघनाह्विना । पञ्चाशद् द्वे शते चाग्रे कूटमानानि तेष्विमाः ॥268॥

।५०० । ३७५ । २५० ।

मेघंकरा मेघवती सुमेघा मेघमालनी । तोयंधरा विचित्रा च पुष्पमालाप्यनिन्दिता ॥269॥

वापीत्युत्पलगुल्मा च नलिना चोत्पलेति च । उत्पलोज्ज्वलसंज्ञा च मेरोस्ताः पूर्वदक्षिणे ॥270॥

मयूरहंसक्रौञ्चाद्यैर्यन्त्रैर्नित्यमलंकृताः । मणितोरणसंयुक्ता रत्नसोपानपंक्तयः ॥271॥

तासां पञ्चाशदायामस्तदर्धमपि विस्तृतिः । दशावगाढः प्रासादस्तासां मध्ये शचीपतेः ॥272॥

एकत्रिंशत्सगव्यूतिर्द्विषष्टिः सार्धयोजना । आयामविस्तृती तुङ्गस्तस्य गाधोऽर्धयोजनम् ॥273॥

आ ३१ क्रो १ । वि ३१ क्रो १ । उ ६२ क्रो २ । अ क्रो २ ।

उक्तं च द्वयं त्रिलोकप्रज्ञप्तौ [४, १६४६-५० ]--

पोक्खरणीणं मज्झे सक्कस्स हवे विहारपासादो । पणघणकोसुत्तुंगो तद्दलरुंदो णिरुवमाणो ॥5॥

१२५ । ६२ । $\frac{१}{२}$ ।

एक्कं कोसं गाढो सो णिलवो विविहकेदुरमणिज्जो । तस्सायामपमाणे उवएसो णत्थि अम्हाणं ॥6॥

सिंहासनं तु तन्मध्ये शक्रस्यामिततेजसः । चत्वारि लोकपालानामासनानि चतुर्दिशम् ॥274॥

पूर्वोत्तरस्यां तस्यैव चापरोत्तरतस्तथा । सामानिकानां देवानां रम्यभद्रासनानि च ॥275॥

४२००० । ४२००० ।

अष्टानामग्रदेवीनां पुरी भद्रासनानि च । आसन्नपरिषत्तस्य सासना पूर्वदक्षिणे ॥276॥

८ । १२००० ।

मध्यमा दक्षिणस्यां च बाह्या चापरदक्षिणे । त्रयस्त्रिंशच्च तत्रैव पश्चात् सैन्यमहत्तराः ॥277॥

१४००० । १६००० । ३३ ।

चतसृष्वात्मरक्षाणां दिक्षु भद्रासनानि च । उपास्यमानस्तैरिन्द्र आस्ते पूर्वमुखः सुखम् ॥278॥

८४००० । ८४००० । ८४००० । ८४००० ।

उक्तं च त्रिलोकप्रज्ञप्तौ [४, १६५१-६१]

सीहासणमइरम्मं सोहम्मिंदस्स भवणमज्झम्मि । तस्स य चउसु दिसासुं चउपीढा लोयवालाणं ॥7॥

सोहम्मिंदासणदो दक्खिणभायम्मि कणयणिम्मिविदं । सिंहासणं विराजदि मणिगणखचिदं पडिंदस्स ॥8॥

सिंहासणस्स पुरदो अट्ठाणं होंति अग्गमहिसीणं । बत्तीससहस्साणिं वियाण पवराइ पीढाइं ॥9॥

८ । ३२००० ।

पवणीसाण दिसासुं पासे सिंहासणस्स चुलसीदी । लक्खाणिं वरपीढा हवंति सामाणियसुराणं ॥10॥

। ८४००००० ।

तस्सग्गिदिसाभागे बारसलक्खाणि पढमपरिसाए । पीढाणि होंति कञ्चणरइदाणिं रयणखचिदाइं ॥11॥

। १२००००० ।

दक्खिणदिसाविभागे मज्झिमपरिसामराण पीढाणिं । रम्माइं रायंते चोद्दसलक्खप्पमाणाणि ॥12॥

। १४००००० ।

णइरिदिदिसाविभाए बाहिरपरिसामराण पीढाणिं । कञ्चणरयणमयाणिं सोलसलक्खाणि चिट्ठंति ॥13॥

। १६००००० ।

तत्थ य दिसाविभाए तेत्तीससुराण होंति तेत्तीसा । वरपीढाणि णिरंतरपुरंतमणि-किरणणियराणि ॥14॥

सिंहासणस्स पच्छिमभागे चिट्ठंति सत्तपीढाणिं । छक्कं महत्तराणं महत्तरीए हवे एक्कं ॥15॥

। ६ । १ ।

सिंहासणस्स चउसु वि दिसासु चिट्ठंति अंगरक्खाणं । चउरासीदिसहस्सा पीढाणि विचित्तरूवाणि ॥16॥

। ८४००० ।

सिंहासणम्मि तस्सिं पुव्वमुहे पइसिदूण सोहम्मो । विविहविणोदेण जुदो पेच्छइ सेवागदे देवे ॥17॥

भृङ्गा भृङ्गनिभा चान्या कज्जला कज्जलप्रभा । दक्षिणापरतस्त्वेताः पुष्करिण्यस्तथाविधाः ॥279॥

श्रीकान्ता श्रीयुता चन्द्रा ततः श्रीमहितेति च । श्रीपूर्वनिलया चैव ईशानस्यापरोत्तरे ॥280॥

नलिनोत्तरपूर्वस्यां तथा नलिनगुल्मिका । कुमुदाथ कुमुदाभा चैवं सौमनसेऽपि च ॥281॥

चूलिकोत्तरपूर्वस्यां पाण्डुका विमला शिला । पाण्डुकम्बलनामा च रक्तान्या रक्तकम्बला ॥282॥

विदिक्षु क्रमशो हैमी राजती तापनीयिका । लोहिताक्षमयी चैता अर्धचन्द्रोपमाः शिलाः ॥283॥

अष्टोच्छ्रयाः शतं दीर्घा रुन्द्रा पञ्चाशतं च ताः । शिले पाण्डुकरक्ताख्ये दीर्घे पूर्वापरेण च ॥284॥

द्वे पाण्डुकम्बलाख्या च रक्तकम्बलसंज्ञिका । दक्षिणोत्तरदीर्घे ताश्चास्थिरस्थिरभूमुखाः ॥285॥

धनुः पञ्चशतं दीर्घं मूले तावच्च विस्तृतम् । अग्रे तदर्धविस्तारं एकशोऽत्रासनत्रयम् ॥286॥

शक्रस्य दक्षिणं तेषु वीशानस्योत्तरं स्मृतम् । मध्यमं जिनदेवानां तानि पूर्वमुखानि च ॥287॥

भारताः पाण्डुकायां तु रक्तायामौत्तरा जिनाः । पाण्डुकम्बलसंज्ञायां पश्चाद्वैदेहका जिनाः ॥288॥

पूर्ववैदेहकाश्चापि रक्तकम्बलनामनि । इन्द्रैर्बाल्येऽभिषिच्यन्ते तेषु सिंहासनेषु तु ॥289॥

दैर्घ्यं योजनपञ्चाशद्विस्तारस्तस्य चार्धकम् । सप्तत्रिंशद्द्विभागश्च चैत्यस्योच्छ्रय इष्यते ॥290॥

। ३७ । $\frac{१}{२}$ ।

चतुर्योजनविस्तारं द्वारमष्टोच्छ्रयं पुनः । तनुद्वारे च तस्यार्धमाने क्रोशावगाढकम् ॥291॥

सौमनसेषुकारेषु मानुषोत्तरकुण्डले । वक्षारकुलशैलेषु रुचकाद्रौ च मञ्जुले ॥292॥

अष्टौ दीर्घो द्विविस्ताश्चत्वारि च समुच्छ्रितः । गव्यूतिमवगाढश्च देवच्छन्दो मनोहरः ॥293॥

रत्नस्तम्भधृतश्चारुसूर्यादिमिथुनोज्ज्वलः । नानापक्षिमृगाणां च युग्मैर्नित्यमलंकृतः ॥294॥

अष्टोत्तरशतं गर्भगृहाणि जिनमन्दिरे । तत्र स्फटिकरत्नोद्घपीठाणि रुचिराणि तु ॥295॥

अष्टोत्तरशतं तत्र पर्यङ्कासनमाश्रिताः । जिनार्चा रत्नमय्यः स्युर्धनुः पञ्चशतोन्नताः ॥296॥

द्वात्रिंशन्नागयक्षाणां मिथुनप्रतियातनाः । चामराङ्कितहस्ताः स्युः प्रत्येकं रत्ननिर्मिताः ॥297॥

सनत्कुमारसर्वाह्णयक्षयोः प्रतिबिम्बके । श्रीदेवीश्रुतदेव्योश्च प्रतिबिम्बे जिनपार्श्वयोः ॥298॥

भृङ्गारकलशादर्शा वीजनं ध्वजचामरे । सुप्रतिष्ठातपत्रे चेत्यष्टौ सन्मङ्गलान्यपि ॥299॥

अष्टोत्तरशतं तानि मङ्गलानि पृथक् पृथक् । रत्नोज्ज्वलानि राजन्ते प्रतिमोभयपार्श्वयोः ॥300॥

देवच्छन्दाग्रमेदिन्यां मध्ये श्रीजैनमन्दिरम् । द्वात्रिंशत्सहस्राणि कलशाः सौवर्णराजताः ॥301॥

पार्श्वयोश्च महाद्वारः प्रत्येकं द्विहतानि च । षट्सहस्राणि राजन्ते घटानां धूपसंभृताम् ॥302॥

महाद्वारस्य बाह्ये च पार्श्वयोरुभयोः पृथक् । चत्वारि च सहस्राणि लम्बन्ते रत्नमालिकाः ॥303॥

तद्रत्नमालिकामध्ये लम्बन्ते हेममालिकाः । त्रिहताष्टसहस्राणि मिलित्वा कान्तिभासुराः ॥304॥

। २४००० ।

कानकाः कलशा हेममालिका धूपसद्घटाः । द्विगुणाष्टसहस्राणि प्रत्येकं मुखमण्डपे ॥305॥

मधुरझणझणारावा मुक्तारत्नविनिर्मिताः । सकिंकिणीकास्तन्मध्ये राजन्ते घण्टिकाचयाः ॥306॥

क्षुल्लकद्वारयोरग्रे मणिमालादिसर्वकम् । महाद्वारोक्तसर्वेषामर्धमानं प्रचक्षते ॥307॥

वसत्याः पृष्ठभागे च मणिमालाष्टसहस्रकम् । त्रिगुणाष्टसहस्राणि लम्बन्ते हेममालिकाः ॥308॥

अस्त्यग्रे जिनवासस्य मञ्जुलो मुखमण्डपः । ध्वजादिभिश्च संयुक्तस्तस्मात्प्रेक्षणमण्डपः ॥309॥

आस्थानमण्डपस्तस्मात् स्तूपा नव पुरः पुरः । द्वादशाम्बुजवेदीभिर्जिनसिद्धार्चाभिरन्विताः ॥310॥

ततो द्वादशवेदीभिर्जिनसिद्धार्चाभिरन्वितौ । चैत्यसिद्धार्थवृक्षौ स्तस्ततोऽपि च महाध्वजाः ॥311॥

तत्पुरो जिनवासः स्याच्चतुर्दिक्ष्वपि तस्य च । चतस्रो वापिका मुक्तमत्स्याद्या निर्मलाम्भसः ॥312॥

तत्पुरोभयपार्श्वे च वीथ्याः प्रासादयुग्मकम् । तत्पुरस्तोरणं रम्यं तस्मात्प्रासादयोर्द्वयम् ॥313॥

सर्वाण्येतानि संवेष्ट्य हैमी वेदी मनोरमा । राजते केतुभिस्तुङ्गैश्चर्याट्टालकादिभिः ॥314॥

तत्पुरश्च चतुर्दिक्षु रत्नस्तम्भाग्रसंस्थिताः । मन्दगन्धवहाधूता राजन्ते दशधा ध्वजाः ॥315॥

सिंहगजवृषभखगपतिशिखिशशिरविहंसकमलचक्राङ्काः ।

अष्टोत्तरशतसंख्याः पृथक् पृथक् क्षुल्लकाश्च तत्प्रमिताः ॥316॥

चतुर्दिक्षु महाध्वजा ४३२० । क्षुल्लकध्वजा ४६६५६० । समस्तध्वजा ४७०८८० ।

ध्वजावनिं च संवेष्ट्य हैमी वेदी विराजते । योजनप्रमितोत्तुङ्गा क्रोशार्धव्याससंयुता ॥317॥

ततोऽशोकवनं रम्यं सप्तच्छदवनं तथा । चम्पकाख्यवनं चारु चूताभिख्यं वनं महत् ॥318॥

ते प्रागारभ्य तिष्ठन्ति प्रादक्षिण्येन तानि च । वनप्रणिधिमध्ये च मानस्तम्भो विभाति च ॥319॥

संवेष्ट्य तद्वनं रम्यो रत्नसालो विराजते । चतुर्गोपुरसंयुक्तश्चर्याट्टालादिसंयुतः ॥320॥

योजनानां शतं दीर्घं तदर्धं चापि विस्तृतम् । पञ्चसप्ततिमुद्विद्धमर्धयोजनगाधकम् ॥321॥

द्वारमस्याष्टविस्तारं षोडशोच्छ्रयमुच्यते । तदर्धमाने द्वे चान्ये तनुद्वारे प्रकीर्तिते ॥322॥

एवंमानानि चत्वारि भद्रसाले चतुर्दिशम् । नन्दनेऽपि च चत्वारि भाद्रसालैः समानि च ॥323॥

सौमनसार्धमानानि पाण्डुकायतनानि च । अर्हदायतनान्येवं सर्वमेरुषु लक्षयेत् ॥324॥

विजयार्धेषु सर्वेषु जम्बुशाल्मलिवृक्षयोः । जिनवासप्रमाणानि भारतेन समानि च ॥325॥

कूटानां पर्वतानां च भवनानां महीरुहाम् । वापीनामपि सर्वासां वेदिका स्थलवद्भवेत् ॥326॥

मन्दरो गिरिराजश्च मेरुश्च प्रियदर्शनः । रत्नोच्चयो लोकनाभिर्मनोरम्यः सुदर्शनः ॥327॥

दिशादिरुत्तमोस्तश्च सूर्यावर्तः स्वयंप्रभः । वतङ्को लोकमध्यश्च सूर्यावरण एव च ॥328॥

एवं षोडशभिः शैलः कीर्त्यते नामभिः शुभैः । वज्रमूलो मणिशिखः स्वर्णमध्यो गुणान्वितः ॥329॥

द्वादशाष्टौ चतुष्कं च मूलमध्याग्रविस्तृता । जगत्यष्टोच्छ्रया भूमिमवगाढार्धयोजनम् ॥330॥

। १२ । ८ । ४ ।

सर्वरत्नमयी मध्ये वैडूर्यशिखरोज्ज्वला । वज्रमूला च सा द्वीपं परिक्षिपति सर्वतः ॥331॥

धनुःपञ्चाशतं रुन्द्रा मूलेऽग्रेऽपि च वेदिका । जाम्बूनदमयी मध्ये गव्यूतिद्वयमुद्गता ॥332॥

तस्या अभ्यन्तरे बाह्ये वनं हेमशिलातलम् । रम्यं च वापिकाश्चित्राः प्रासादास्तत्र सन्ति च ॥333॥

शतं सार्धशतं द्विशतं विस्तृता धनुषां क्रमात् । हीनमध्योत्तमा वाप्यो गाढा स्वं दशमं च ताः ॥334॥

१० । १५ । २० ।

पञ्चाशतं शतं पञ्चसप्ततिं धनुषां क्रमात् । विस्तृता आयता उच्चाः प्रासादास्तत्र हीनकाः ॥335॥

विस्तृता धनुषां षट् च द्वारो द्वादश चोद्गताः । अवगाढाः पुनर्भूमिं शुद्धं दण्डचतुष्टयम् ॥336॥

। १२ ।

द्विगुणास्त्रिगुणाश्च स्युर्व्यासायामोद्गमैस्ततः । मध्यमा उत्तमाश्चैषां द्विद्विर्द्वारं सगाधकम् ॥337॥

मध्यमप्रासादस्य वि १०० आ २०० उ १५० द्वारस्य वि १२ आ २४ उ ८

उत्कृष्टप्रासादस्य वि १५० आ ३०० उ २२५ द्वारस्य वि १८ आ ३६ उ १२ ।

मालावली(ल्ली)सभासंज्ञा कदल्यासनवीक्षणाः । वीणागर्भलताजालाः शिलाचित्रप्रसाधनाः ॥338॥

उपस्थानगृहाश्चैव मोहनाख्याश्च सर्वतः । गृहा रत्नमया रम्या वानान्तरसुरोषिताः ॥339॥

हंसक्रौञ्चमृगेन्द्राख्यैर्गजैर्मकरनामभिः । प्रवालगरुडाख्यैश्च स्फटिकप्रणतोन्नतैः ॥340॥

दीर्घस्वस्तिकवृत्तैश्च पृथुलेन्द्रासनैरपि । गन्धासनैश्च रत्नाद्यैर्युक्ता देवमनोहरैः ॥341॥

विजयं वैजयन्तं च जयन्तमपराजितम् । तोरणानि तु संज्ञाभिः पूर्वादिषु चतुर्दिशम् ॥342॥

तत्पञ्चशतविस्तारं द्व्यर्धविस्तारमुच्छ्रितम् । प्रासादोऽत्र द्विविस्तारस्तोरणे चतुरुच्छ्रयः ॥343॥

[ ५०० ] । ७५० ।

उक्तं च त्रिलोकसारे [ 892 ]-

विजयं च वैजयंतं जयंतमपराजियं च पुव्वादी । दारचउक्काणुदओ अडजोयणमद्धवित्थारो ॥18॥

उक्तं च त्रिलोकप्रज्ञप्तौ [ 4-73 ] पाठान्तरम्-

विजयादिदुवाराणं पंचसया जोयणाणि वित्थारा । पत्तेक्कं उच्छेहो सत्तसयाणिं च पण्णासा ॥19॥

इति केचिद्वदन्ति । वि ५०० उ ७५० ।

तोरणाख्याः सुरास्तेषु दीपस्य परिधिर्विना । तोरणैः स चतुर्भक्तस्तोरणान्तरमुच्यते ॥344॥

। ७८५५ । ( ? )

Over these festoon doors, there live deities of same name as they have, viz., Vijaya, Vajayanta, Jayanta, and Aparājita. On dividing the circumference of the Jambū island as reduced by the festoon doors, by four, the interval between the festoon doors is said to be known. //1.344//

उन तोरणद्वारों के ऊपर उनके ही नाम वाले विजय, वैजयन्त, जयन्त और अपराजित नामक देव रहते हैं। तोरणद्वारों से रहित जम्बूद्वीप की परिधि को चार से भाजित करने पर इन तोरणद्वारों का अन्तर कहा जाता है।।३४४।।

द्वीपान् व्यतीत्य संख्येयान् जम्बूद्वीपोऽन्य इष्यते । पूर्वस्यां तस्य वज्रायां विजयस्य पुरं वरम् ।।345।।

On crossing numerate islands from this Jambū island, there is another island recognized as another Jambū island. In its eastern direction, above the Vajrā earth, there is the Uttamapura of Vijaya [illegible]va. //1.345//

इस जम्बूद्वीप से संख्यात द्वीपों को लाँघकर एक दूसरा जम्बूद्वीप माना जाता है। उसकी पूर्व दिशा में वज्रा पृथि[illegible] के ऊपर विजय देव का उत्तम पुर है।।३४५।।

तद् द्वादश सहस्राणि विस्तृतं वेदिकावृतम् । चतुस्तोरणसंयुक्तं सुचिरं सर्वतोऽद्भुतम् ।।346।।

It is twelve thousand yojanas wide, surrounded by altar rampart (vedikā), composed with four festoons, industructible and wonderful all around. //1.346//

वह बारह हजार (१२०००) योजन विस्तृत वेदिका से वेष्टित चार तोरणों से संयुक्त अविनश्वर और सब ओर से आश्चर्यजनक है।।३४६।।

उक्तं च त्रिलोकप्रज्ञप्तौ [ 5-181 ]-

उच्छेहजोयणेणं पुरिओ बारससहस्सरुंदाओ । जिणभवणभूसियाओ उववणवेदीहि जुत्ताओ ।।20।।

साष्टभागं त्रिकं चाग्रे मूले तत्तु चतुर्गुणम् । तत्प्राकारस्य विस्तारस्तस्य गाधोऽर्धयोजनम् ।।347।।

यो ३ । $\frac{१}{८}$ । १२ $\frac{१}{२}$ ।

सप्तत्रिंशत्पुनः सार्धा हैमप्राकार उद्गमः । गोपुराणां चतुर्दिक्षु प्रत्येकं पञ्चविंशतिः ।।348।।

समस्तगोपुराणि १०० ।

एकत्रिंशत्सगव्यूतिर्व्यासो गोपुरसद्मनः । उच्छ्रयो द्विगुणस्तस्माद् गाधः स्यादर्धयोजनम् ।।349।।

३१ क्रो १ । ६२ क्रो २ ।

भूमिभिः सप्तदशभिः प्रासादा गोपुरेषु तु । सर्वरत्नसमाकीर्णा जाम्बूनदमयाश्च ते ।।350।।

तत्प्राकारस्य मध्येऽस्ति रम्यं राजाङ्गणं ततः । योजनानां द्वादशशतं रुन्द्रं गव्यूतिरस्य तु ।।351।।

तद्धार्धधनुर्व्यासा गव्यूतिद्वयमुद्गता । चतुर्गोपुरसंयुक्ता वेदिका तस्य सर्वतः ।।352।।

राजाङ्गणस्य मध्येऽस्ति प्रासादो रत्नतोरणः । द्विषष्टियोजनं क्रोशद्वितीय तस्य चोन्नतिः ।।353।।

[illegible]द्वारमस्य तु । चतुरष्टयोजनव्यासतुङ्गं वज्रकवाटकम् ।।354।।

[illegible] चतुर्दिक्षु प्रासादः पृथगेकशः । प्रासादा जातजातास्ते षट्पर्यन्तचतुर्गुणाः ।।355।।

[illegible] प्रमाणं च मण्डलं च भणाम्यतः । मुख्यप्रासाद एकश्च चत्वारः प्रथममण्डले ।।356।।

[illegible] प्रोक्ताश्चतुःषष्टिस्तृतीयके । ततश्चतुर्गुणाः प्रोक्ता चतुर्थे पञ्चमे ततः ।।357।।

चतुर्गुणा[illegible] प्रासादाः षष्ठे तेभ्यश्चतुर्गुणाः । उत्सेधादिमितो वक्ष्ये प्रासादानां यथाक्रमम् ।।358।।

मुख्यप्रासा[illegible] प्रथमावरणद्वये । व्यासोत्सेधावगाढैस्तु तृतीये च चतुर्थके ।।359।।

यो ३१ को १ । यो ६ । २ को १ । २

तदर्धमानाः प्रासादाः पञ्चमे षष्ठके पुनः । तदर्धमानकाः प्रोक्ताः केवलज्ञानलोचनैः ॥360॥

प्रासादानां च सर्वेषां प्रत्येकं वेदिका भवेत् । नानारत्नसमाकीर्णा विचित्रा च मनोरमा ॥361॥

मुख्यप्रासादके वेदी प्रथमे मण्डलद्वये । धनुः पञ्चशतव्यासगव्यूतिद्वयमुद्गता ॥362॥

तृतीये च चतुर्थे च तदर्धव्यासतुङ्गता । मण्डले पञ्चमे षष्ठे तदर्धोत्सेधरुन्धिका ॥363॥

गुणसंकलनरूपेण स्थितानि भवनानि च । चतुः शतयुतं पञ्चसहस्रं चैकषष्ठिकम् ॥364॥

Situated in geometrical progression, those mansions are five thousand four hundred and sixty-one. //1.364//

गुणसंकलन रूपसे अर्थात् उत्तरोत्तर चौगुणे चौगुणे क्रमसे स्थित वे भवन पाँच हजार चार सौ इकसठ हैं-- १ + ४ + १६ + ६४ + २५६ + १०२४ + ४०९६ = ५४६१ ॥३६४॥

प्रासादे विजयस्यात्र सिंहासनमनुत्तरम् । सचामरं च सच्छत्रं तस्मिन् पूर्वमुखोऽमरः ॥365॥

उत्तरस्यां सहस्राणि षट् सामानिकसंज्ञिनाम् । विदिशोश्चपुरा षट् स्युरग्रदेव्यो हि सासनाः ॥366॥

आसन्नाष्टौ सहस्राणि परिषत्पूर्वदक्षिणा । दश मध्यमिका वेद्या दक्षिणस्यां तु सा दिशि ॥367॥

द्वादशैव सहस्राणि बाह्या सापरदक्षिणा । आसनेष्वपरस्यां तु सप्त सैन्यमहत्तराः ॥368॥

अष्टादश सहस्राणि यात्मरक्षाश्चतुर्दिशम् । तासु दिक्षु च तावन्ति तेषां भद्रासनानि च ॥369॥

अष्टादश सहस्राणि देव्यस्तत्परिवारिकाः । विजयः सेव्यमानस्तैः पल्यं जीवति साधिकम् ॥370॥

विजयादुत्तरस्यां च सुधर्मा नामतः सभा । सार्धद्वादशदीर्घा सा तदर्धं चापि विस्तृताः ॥371॥

योजनानि नवोद्विद्धा गाढा गव्यूतिमीरिता । उत्तरस्यां ततश्चापि तावन्मानो जिनालयः ॥372॥

अपरोत्तरतस्तस्मादुपपातसमा शुभा । प्रासादात्प्रथमात्पूर्वा त्वभिषेकसभा ततः ॥373॥

अलंकारसभा पूर्वा ततो मन्त्रसभा पुरः । सुधर्मासममानाश्च सभा सर्वप्रविस्तरैः ॥374॥

पञ्च चैव सहस्राणि चत्वार्येव शतानि च । सप्तषष्टिश्च ते सर्वे प्रासादा विजयालये ॥375॥

राजाङ्गणस्य बाह्ये च परिवारसुधाशिनाम् । स्फुरद्ध्वजपताकाः स्युः प्रासादा मणितोरणाः ॥376॥

तन्नगराद्बहिर्गत्वा पञ्चविंशतियोजनम् । अशोकं सप्तपर्णं च चम्पकं चूतनामकम् ॥377॥

पूर्वाद्यानि च चत्वारि वनान्येव तु मानतः । द्वादशैव सहस्राणि योजनानां तदायतिः ॥378॥

विस्तारश्च सहस्रार्धं तन्मध्येऽशोकपादपः । जम्बूपीठार्धमाने च जम्बूमानार्धवान् स्थितः ॥379॥

चतस्रः प्रतिमास्तस्य पादपस्य चतुर्दिशम् । रत्नमय्यो जिनेन्द्राणामशोकेनातिपूजिताः ॥380॥

तस्मात्पूर्वोत्तरस्यां तु वशोकाख्यसुरस्य च । प्रासादो विजयस्येव मानतोऽशोकसेवितः ॥381॥

विजयेन समाः शेषाः वैजयन्तादयस्त्रयः । परिवारालयायुर्भिः स्वदिक्षु नगराण्यपि ॥382॥

वर्णा यथा पञ्च सुरेन्द्रचापे यथा रसो वा लवणः समुद्रे। औष्ण्यं रवेश्चन्द्रमसश्च शैत्यं तदाकृतिश्चाकृतका भवन्ति ॥383॥

प्रासादशैलद्रुमसागराद्याः वर्णस्वभावाकृतिमानभेदैः । अकृत्रिमा वैस्रसिकास्तथैव लोकानुभावान्नियता हि भावाः ॥384॥

॥ इति लोकविभागे जम्बूद्वीपविभागो नाम प्रथमं प्रकरणं समाप्तम् ॥

# द्वितीयो विभागः

क्षुधातृष्णादिभिर्दोषैर्वर्जितान् जिनपुङ्गवान् । नत्वा वार्ध्यादिविस्तारं व्याख्यास्यामि समासतः ॥1॥

द्वीपाद्विगुणविस्तारः समुद्रो लवणोदकः । द्वीपमेनं परिक्षिप्य चक्रे नेमिरिव स्थितः ॥2॥

The Lavaṇa sea, with twice the width of the Jambū island, surrounds it like a framework of a wheel. //2.2//

जम्बूद्वीप की अपेक्षा दुगुणे विस्तार वाला लवणोदक समुद्र इस द्वीप को घेरकर चक्र (पहिया) में नेमि के समान स्थित है। अर्थात् जैसे नेमि (हाल) चक्र को सब ओर से वेष्टित करती है वैसे ही लवणसमुद्र जम्बूद्वीप को सब ओर से वेष्टित करके स्थित है।।२।।

दशैवेष सहस्राणि मूलेऽग्रेऽपि पृथुर्मतः । सहस्रमवगाढो गामूर्ध्वं स्यात् षोडशोच्छ्रितः ॥3॥

It has been regarded as ten thousand yojanas at the bottom and at the top also. Its depth over the earth is one thousand yojanas and over the [equi-water part] its height is sixteen yojanas. //2.3//

वह मूलमें और ऊपर भी दस ही हजार (१००००) योजन पृथु (विस्तृत) माना गया है। इसकी गहराई पृथिवीके ऊपर एक हजार (१०००) योजन और (सम जलभागसे) ऊपर ऊँचाई सोलह योजन प्रमाण है।।३।।

उक्तं च त्रिलोकप्रज्ञप्तौ [ ४-२४०० ].

चित्तोपरिमतलादो कूडायारेण उवरि वारिणिही । सत्तसयजोयणाइं उदएण णहम्मि चिट्ठेदि ॥1॥

It has also been mentioned in the Triloka prajñapti [4-2400] that this sea is situated in the shape of a mountain peak (kūṭa) seven hundred yojanas above the upper surface of the Citrā earth.//1//

त्रिलोकप्रज्ञप्तिमें कहा भी है-

यह समुद्र चित्रा पृथिवीके उपरिम तलसे ऊपर आकाशमें सात सौ (७००) योजन ऊँचा होकर कूटके आकारसे स्थित है।।१।।

देशोना नव च त्रीणि एकमेकं तथाष्टकम् । पञ्चैकं च परिक्षेपः स्थानकैर्लवणोदधेः ॥4॥

The circumference of the Lavaṇa sea is slightly less than the number written in decimal notation, right to left, given as nine, three, one, one, eight, five and one. //2.4//

लवण समुद्रकी परिधि कुछ कम नौ, तीन, एक, एक आठ, पाँच और एक (१५८११३९) इन स्थानकों (अंकों) के क्रमसे पन्द्रह लाख इक्यासी हजार एक सौ उनतालीस योजन प्रमाण है।।४।।

प्रदेशान् पञ्चनवतिं गत्वा देशमधोगतः । एवमंगुलहस्तादीन् जगत्या योजनानि च ॥5॥

From the rampart of the Lavaṇa sea, a point (pradeśa) has gone below, having a reduction of ninety-five points (pradeśas). Similarly, the reduction in aṅgulas, hastas etc. and yojanas be also understood. //2.5//

लवण समुद्र जगतीसे पंचानबै प्रदेशोंकी हानि करके एक प्रदेश नीचे गया है। इसी प्रकारसे अंगुल, हस्तादिक और योजनोंकी भी हानि समझना चाहिये।।५।।

पञ्चाग्रां नवतिं देशान् गत्वा देशाँश्च षोडश । उच्छ्रितोऽङ्गुलदण्डाद्यानेवमेव समुच्छ्रितः ॥6॥

It has gone up by sixteen points (pradeśas) after the reduction of ninety-five points. Similarly, the reduction of aṅgula and dhanuṣa etc. should be known above. //2.6//

वह पंचानबै प्रदेशोंकी हानि करके सोलह प्रदेश ऊपर गया है। इसी प्रकारसे ही ऊपर अंगुल और धनुष आदिकी भी हानि जानना चाहिये।।६।।

एकादश सहस्राणि यमवास्यां गतोच्छ्रयः । ततः पञ्च सहस्राणि पौर्णिमास्यां विवर्धते ॥7॥

On the last day of the dark half, the height of the mentioned water-top becomes eleven thousand yojanas. On the full moon day, it increases by five thousand yojanas more. //2.7//

अमावास्याके दिन उक्त जलशिखाकी ऊँचाई ग्यारह हजार (११०००) योजन होती है। पूर्णिमाके दिन वह उससे पाँच हजार योजन बढ़ जाती है (११००० + ५००० = १६००० ) ।।७।।

पञ्चानां तु सहस्राणां भागः पञ्चदशो हि यः । स भवेत् क्रमशो वृद्धिः शुक्लपक्षे दिने दिने ॥8॥

Whatever is the fifteenth part of five thousand, that much is the increase in its height everyday, gradually, in the white fortnight. //2.8//

पाँच हजारका जो पन्द्रहवाँ भाग $\left(\frac{१६००० - ११०००}{१५} = \frac{५०००}{१५}\right)$ है उतनी शुक्ल पक्षमें क्रमशः प्रतिदिन उसकी ऊँचाई में वृद्धि होती है।।८।।

अधस्तात्खलु संक्षिप्तो द्रोणीवोर्ध्वं विशालकः । भूमौ व्योम्नि विपर्यासः समुद्रो नौसमो द्विधा ॥9॥

The sea, below in the base, has been contracted like the boat and extended gradually above. In the sky, its state is just opposite. It has extended below and has gradually contracted above. In this way, it is like a boat on which an inverted another boat has been placed. //2.9//

समुद्र भूमिमें नीचे नावके समान संक्षिप्त होकर क्रमसे ऊपर विस्तीर्ण हुआ है। आकाशमें उसकी अवस्था इससे विपरीत है, अर्थात् वह नीचे विस्तीर्ण होकर क्रमसे ऊपर संकुचित हुआ है। इस प्रकारसे वह एक नावके ऊपर विपरीत क्रमसे रखी गई दूसरी नावके समान है।।६।।

उक्तं च [ ]

संक्षिप्तोऽम्बुधिरूर्ध्वाधश्चित्राप्रणिधौ विशालकः । अधोमुखबहित्रं वा बहित्रोपरिसंस्थितम् ॥2॥

मध्ये तस्य समुद्रस्य पूर्वादौ वडवामुखम् । कदम्बकं च पातालमुत्तरे यूपकेसरम् ॥10॥

In the central portion of that sea, in the eastern etc. directions in sequence, there are four under regions (pātālas), the Baḍavāmukha, the Kadambaka, the Pātāla and the Yūpakesara in the north. //2.10//

उस समुद्र के मध्य भाग में पूर्वादिक दिशाओं के क्रम से बड़वामुख, कदम्बक, पाताल और उत्तर में यूपकेसर नामक चार पाताल हैं।।१०।।

मूले मुखे च विस्तारः सहस्राणि दशोदितः । गाधमध्यमविस्तारौ मूलाद्दशगुणौ स्मृतौ ॥11॥

The width of these pātālas are ten thousand yojanas at the base and at the top. Their depth and central width is ten times relative to base width, as recognized. //2.11//

इन पातालों का विस्तार मूल में और मुख में दस हजार योजन कहा गया है। इनकी गहराई और मध्य विस्तार मूल विस्तार की अपेक्षा दस गुणा (१०००० x १० = १००००० यो.) माना गया है।।११।।

बाहल्यं तु सहस्रार्धं कुड्यं वज्रमयं च तत् । तान्यरञ्जनतुल्यानि भाषितानि जिनोत्तमैः ॥12॥

The thickness of the diamondful wall of the under regions is five hundred yojanas. Those under regions have been related as a rañjana (a vessel) by the Lords Jinas. //2.12//

पातालों की वज्रमय भित्तिका बाहल्य पाँच सौ (५००) योजन प्रमाण है। वे पाताल जिनेन्द्रों के द्वारा अरंजन (घट विशेष) के समान कहे गये हैं।।१२।।

पातालानां तृतीये तु ऊर्ध्वे भागे सदा जलम् । मूले वायुर्घनो नित्यं क्रमान्मध्ये जलानिलौ ॥13॥

तृतीयभागः ३३३३३ । $\frac{१}{३}$ ।

पौर्णिमास्यां भवेद्वायुः तस्य पञ्चदशक्रमात् । पूर्यते सलिलैर्भागः कृष्णपक्षे दिने दिने ॥14॥

२२२२ । $\frac{२}{६}$ ।

In the upper one-third part, there is always water. In their basic [lower] part there is dense air eternally, and in the middle there are water and air both sequentially. In their middle part, in the sequence of fifteen days, there is air alone on the full moon day, that very central one third portion, in the dark fortnight, everyday in order, filled up by water. //2.13-14//

tṛtīya bhāgaḥ 33333 $\frac{1}{3}$ , 2222 $\frac{2}{9}$

पातालों के उपरिम त्रिभाग (३३३३३$\frac{१}{३}$) में सदा जल रहता है। उनके मूल भाग में नित्य घना वायु और मध्य में क्रम से जल व वायु दोनों रहते हैं। उनके मध्यम भाग में पन्द्रह दिनों के क्रम से पौर्णमासी के दिन केवल वायु रहता है। वही मध्यम त्रिभाग कृष्ण पक्ष में प्रतिदिन क्रमशः जल से पूर्ण किया जाता है।।१३-१४।।

विदिक्ष्वपि च चत्वारि समपातालकानि हि । मुखे मूले सहस्रं च मध्ये दशगुणं ततः ॥15॥

In the subdirection also, there are situated similar intermediate four under regions. Their widths at the top and base are one thousand yojanas and ten times that in the middle. //2.15//

विदिशाओं में भी इनके समान चार मध्यम पाताल स्थित हैं। उनका विस्तार मुख और मूल भाग में एक हजार (१०००) योजन तथा मध्य में उससे दस गुणा (१००००) है।।१५।।

सहस्राणि दशागाढं पञ्चाशत्कुड्यरुन्द्रता । तेषां तृतीयभागेषु पूर्ववज्जलमारुतौ ॥16॥

प्रतिदिनं जलवायुहानि-वृद्धि 222 । $\frac{२}{६}$ ।

Their depth is ten thousand yojanas and the width of the wall is fifty yojanas. In their three one-third portions, [yojanas] there is situated water, air and water-air similar to the former under regions.//2.16//

prati dinaṁ jalavāyu hāni-vṛddhi 222 $\frac{2}{9}$

[Decrease Increase of water-air every day is 222 $\frac{2}{9}$

उसकी गहराई दस हजार (१००००) योजन तथा तथा भित्ति का विस्तार पचास (५०) योजन है। उसके तीन तृतीय भागों (३३३३$\frac{१}{३}$यो.) में पूर्व पातालों के समान जल, वायु और जल-वायु स्थित है।।१६।।

अष्टास्वन्तर दिक्ष्वन्यत्ततः क्षुल्लसहस्रकम् । दशभागसमं मानैस्त्रिभागैरपि पूर्ववत् ॥17॥

त्रिभागः ३३३ । । प्रतिदिनं जल-वायुहानि-वृद्धि २२ । $\frac{२}{६}$ ।

In the middle of [interval between] the above mentioned maximal and intermediate sized under-regions, in eight inner directions, there are situated other one thousand minimal sized under regions. Their width etc. measure tenth part relative to those of the intermediate under-regions. Inside these also, the three one-third portions and the sequence of the situated water-air should be understood as before. //2.17//

tribhāgaḥ 333 । pratidinaṁ jalavāyu hāni vṛddhi 22 । $\frac{2}{9}$ ।

[one third part 333 । everday's water-air decrease-increase 22 । $\frac{2}{9}$ ।

उपर्युक्त उत्तम और मध्यम पातालोंके मध्यमें आठ अन्तर दिशाओंमें दूसरे एक हजार (१०००) जघन्य पाताल स्थित हैं। इनके विस्तार आदिका प्रमाण मध्यम पातालोंकी अपेक्षा दसवें भाग मात्र है। इनके भीतर भी तीन तीन त्रिभागों और उनमें स्थित जल-वायुके क्रमको पूर्ववत् ही समझना चाहिये।।१७।।

नगराणां सहस्रं तु द्विचत्वारिंशताहत । वेलंधरभुजंगानामन्तर्भागाभिरक्षिणाम् ॥18॥
नगराणां सहस्रं तु वष्टाविंशतिताडितम् । अग्रोदकं धारयतां नागानामिति वर्ण्यते ॥19॥
नगराणां सहस्रं (तु) द्विसप्ततिसमाहतम् । रक्षितॄणां बहिर्भागं समुद्रस्येति भाष्यते ॥20॥

त्रिलोकसारे उक्तं च द्वयम् [ 903 - 904 ]

वेलंधरभुजगविमाणाण सहस्साणि बाहिरे सिहरे । अन्ते बाहत्तरि अडवीसं बादालयं लवणे ॥3॥

७२००० । २८००० । ४२००० ।

दुतडादो सत्तसयं दुकोसअहियं च होइ सिहरादो । णयराणि हु गयणतले जोयणदसगुणसहस्साणि ॥4॥

७०० क्रो २ । १०००० ।

द्वीपमेनं द्वितीयं चाऽऽश्रित्य नगराणि तु । मध्येऽपि च समुद्रस्य समुद्रं साधु रक्षताम् ॥21॥
द्वौ द्वौ च पर्वतौ प्रोक्तौ पातालानां च पार्श्वयोः । अन्तराणि च तेषां तु शृणु नामानि चैव तु ॥22॥
एकं शतसहस्रं च सहस्राणि च षोडश । योजनस्य यथातत्त्वं पर्वतान्तरमुच्यते ॥23॥
द्विचत्वारिंशतं गत्वा सहस्राणां तटात्परम् । पुरस्तात्सागरे तुल्यौ वडवामुखतो गिरी ॥24॥
उत्तरः कौस्तुभो नाम्ना कौस्तुभासस्तु दक्षिणः । सहस्रमुद्गतौ शुभ्रावर्धकुम्भसमाकृती ॥25॥
राजतौ वज्रमूलौ च नानारत्नमयाग्रकौ । तन्नामानौ सुरावत्र विजयस्येव वर्णना ॥26॥
उदकश्चोदवासश्च दक्षिणस्यां च पर्वतौ । शिवश्च शिवदेवश्च तत्र च व्यन्तरामरौ ॥27॥
शंखोऽथ च महाशंखः शंखवर्णौ च पश्चिमौ । उदकश्चोदवासश्च नामतोऽत्र सुरावपि ॥28॥
दकश्च दकवासश्चोत्तरस्यां गिरी तयोः । लोहितो लोहितांकश्च कौस्तुभेन समाश्च ते ॥29॥

उक्तं च त्रिलोकप्रज्ञप्तौ [ 4, 2457 ]-

बादाल सहस्साणिं जोयणया जलहिदोतडाहिंतो । पविसिय खिदिविवराणं पासेसुं होंति अट्ठगिरी ॥5॥
आयुर्वेश्मपरीवारैर्विजयेन समा इमे । स्वस्यां दिशि च जम्ब्वाख्ये तेषां स्युर्नगराणि च ॥30॥

उक्तं च त्रिलोकप्रज्ञप्तौ [ 4,2470 ]-

एदाणं देवाणं णयरीओ अवरजंबुदीवम्मि । होंति णियणियदिसाए अवराजिदणयरसारिच्छा ।।6।।

द्वादशैव सहस्राणि तटाद् गत्वापरोत्तरे । सहस्रं द्वादशाभ्यस्तं विस्तृतः सर्वतः समः ।।31।।

नामतो गौतमो द्वीपो देवस्तस्य च गौतमः । स च कौस्तुभवद्देयः परिवारायुरादिभिः ।।32।।

प्राच्यां दिशि समुद्रेऽस्मिन् द्वैप्या एकोरुका नराः । अपाच्यां सविषाणाश्च प्रतीच्यां च सवालकाः ।।33।।

अभाषका उदीच्यां च विदिक्षु शशकर्णकाः । एकोरुकनराणां च वामदक्षिणभागयोः ।।34।।

सेवादुःखं परैर्निन्दा ईप्सितस्यानवापनम् । प्रियेभ्यो विप्रयोगश्च तिसृष्वपि समासु न ॥29॥

न राजानो न पाषण्डा न चोरा नापि शत्रवः । न कर्माणि न शिल्पानि न दारिद्र्यं न चामयाः ॥30॥

सुरूपाः सुभगा नार्यो गीतवादित्रपण्डिताः । एकभर्तृसुखा नित्यं निः प्रयोजनसौहृदाः ॥31॥

रत्नैराभरणैर्दीप्ता गन्धमाल्यविभूषिताः । दिव्यवस्त्रसमाच्छन्ना रतिरागपरायणाः ॥32॥

अन्यो यवी(क्ष)णासक्ता अन्यो न्यस्यानुवर्तितः । अन्यो न्यहितमिच्छन्तो न्योन्यं न त्यजन्ति ते ॥33॥

क्षुतकारितमात्रेण त्यक्त्वान्ते जीवितं स्वकम् । सौधर्मव्यन्तराद्येषु जायन्ते ल्पकषायिणः ॥34॥

उक्तं च त्रिलोकसारे [ 786, 789-791 ] -

वदरक्खामलयप्पमकप्पद्दुमदिण्णदिव्वआहारा । वरपहुदितिभोगभुमा मंदकसाया विणीहारा ॥2॥

जादजुगलेसु दिवसा सग सग अंगुट्ठलेहरंगिदये । अथिरथिरगदिकलागुणजोव्वणदंसणगहे जंति ॥3॥

तद्दंपदीणमादिमसंहदिसंठाणमज्जणामजुदा । सुलहेसु वि णो तित्ती तेसिं पंचक्खविसएसु ॥4॥

चरमे खुदजंभवसा णरणारि विलीय सरदमेहं वा । भवणतिगामी मिच्छा सोहम्मदुजाइणो सम्मा ॥5॥

पंचस्वद्रिषु नीलेषु निषधेषु कुरुष्वपि । वर्धमानोभयान्ताभ्यां प्रथमा नियु(य)ता समा ॥35॥

हिमवद्रुग्मिशैलेषु रम्यकेषु हरिष्वपि । वर्धमानोभ्यान्ताभ्यां द्वितीय नियु(य)ता समा ॥36॥

शृङ्गिक्षुल्लहिमाह्वेषु तत्पार्श्वासु च भूमिषु । तृतीया तु समा नित्यमन्तरद्वीपकेषु च ॥37॥

पल्योपमाष्टमे भागे जायन्ते कुलकृन्नराः । चतुर्दश परस्तेभ्य आदिराजो पि जायते ॥38॥

उक्तं चार्षे [ आ. पु. 3,55-57; 3-63 आदि ]--

इति तद्वचनात्तेषां प्रत्याश्वासो महानभूत् । मनौ याते दिवं तस्मिन् काले गलति च क्रमात् ॥39॥

मन्वन्तरमसंख्येयवर्षकोटीर्व्यतीत्य च । सन्मतिः सन्मतिर्नाम्ना द्वितीयो भून्मनुस्तदा ॥40॥

तस्यायुरममप्रख्यमासीत्संख्येयहायनम् । सहस्रं त्रिशतीयुक्तमुत्सेधो धनुषां मतः ॥41॥

नभो ङ्गणमथापूर्य तारकाः प्रचकाशिरे । नात्यन्धकारकलुषां वेलां प्राप्य तमीमुखे ॥42॥

अकस्मात्तारका दृष्ट्वा संभ्रान्तान् भोगभूभुवः । भीतिर्विचलयामास प्राणिहत्येव योगिनः ॥43॥

स सन्मतिरनुध्याय क्षणं प्रावोचतार्यकान् । नोत्पातः को प्ययं भद्रास्तन्मागात् भियो वशम् ॥44॥

ज्योतिश्चक्रमिदं शश्वद् व्योममार्गे कृतस्थिति । स्पष्टतामधुनायातं ज्योतिरङ्गप्रभाक्षयात् ॥45॥

ज्योतिर्ज्ञानस्य बीजानि सो न्ववोचद्द्विदांवरः । अथ तद्वचनादार्या जाता सपदि निर्भयाः ॥46॥

ततो न्तरमसंख्येयाः कोटीरुल्लंघ्य वत्सरान् । तृतीयो मनुरत्रासीत् क्षेमंकरसमाह्वयः ॥47॥

अटटप्रमितं तस्य बभूवायुर्महौजसः । देहोत्सेधश्च चापानाममुष्यासीच्छताष्टकम् ॥48॥

पुरा किल मृगा भद्राः प्रजानां हस्तलालिताः । तदा तु विकृतिं भेजुर्व्यात्तास्या भीषणस्वनाः ॥49॥

तेषां विक्रियया सान्तर्गर्जया तत्रसुः प्रजाः । इमे भद्रमृगाः पूर्व संवसन्तो नुपद्रवाः ॥50॥

इदानीं तु विना हेतोः शृङ्गैरभिभवन्ति नः । इति तद्वचनाज्जातसौहार्दो मनुरब्रवीत् ॥51॥

कर्तव्यो नैषु विश्वासो बाधाः कुर्वन्त्युपेक्षिताः । इत्याकर्ण्य वचस्तस्य परिजहरुस्तदा मृगान् ॥52॥

मन्वन्तरमसंख्येयाः समाकोटीर्विलंघ्य च । अग्रेसरः सतामासीन्मनुः क्षेमंधराह्वयः ॥53॥

तुटिताब्दमितं तस्य बभूवायुर्महात्मनः । शतानि सप्त चापानां सप्ततिः पंच चोच्छ्रितिः ॥54॥

यदा प्रबलतां याताः पाकसत्त्वा महाक्रुधः । तदा लकुटयष्ट्याद्यैः स रक्षाविधिमन्वशात् ॥55॥

पुनर्मन्वन्तरं तत्र संजातं पूर्ववत् क्रमात् । मनुः सीमंकरो जज्ञे प्रजानां पुण्यपाकतः ॥56॥

कमलप्रमितं तस्य बभूवायुर्महाधियः । शतानि सप्त पंचाशदुच्छ्रयो धनुषां मतः ॥57॥

कल्पांघ्रिपा यदा जाता विरला मन्दकाः फलैः । तदा तेषु विसंवादो बभूवैषां परस्परम् ॥58॥

ततो मनुरसौ मत्वा वाचा सीमविधिं व्यधात् । अतः सीमंकराख्यां तैर्लम्मितो न्वर्थतां गताम् ॥59॥

पुनर्मन्वन्तरं प्राग्वदतिलंघ्य महोदयः । मनुः सीमंधरो नाम्ना समजायत पुण्यधीः ॥60॥

नलिनप्रमितायुष्को नलिनास्येक्षणद्युतिः । धनुषां पंचवर्गाग्रमुच्छ्रितः शतसप्तकम् ॥61॥

अत्यन्तविरला जाताः क्ष्माजा मन्दफला यदा । नृणां महान् विसंवादः केशाकेशि तदावृधत् ॥62॥

क्षेमवृत्तिं ततस्तेषां मन्वानः स मनुस्तदा । सीमानि तरुगुल्मादिचिह्नितान्यकरोत् कृती ॥63॥

ततो न्तरमभूद्भूयो प्यसंख्या वर्षकोटयः । तदन्तरव्यतिक्रान्तावभूद्विमलवाहनः ॥64॥

पद्मप्रमितमस्यायुः पद्माश्लिष्टतनोरभूत् । धनुःशतानि सप्तैव तनूत्सेधो स्य वर्णितः ॥65॥

तदुपज्ञं गजादीनां बभूवारोहणक्रमः । कुदारांकुशपर्याणमुखभाण्डाद्युपक्रमैः ॥66॥

पुनरन्तरमत्रासीदसंख्येयाब्दकोटयः । ततो ष्टमो मनुर्जातश्चक्षुष्मानिति शब्दितः ॥67॥

पद्माङ्गप्रमितायुष्कश्चापानां पंचसप्ततिम् । ष्ट्छतान्यप्युदग्रश्रीरुच्छ्रिताङ्गो बभूव सः ॥68॥

तस्य काले भवत्तेषां क्षणं पुत्रमुखेक्षणम् । अदृष्टपूर्वमार्याणां महदुत्रासकारणम् ॥69॥

ततः सपदि संजातसाध्वसानार्यकांस्तदा । तद्याथात्म्योपदेशेन स संत्रासमथो(थौ)ज्झयत् ॥70॥

पुनरप्यन्तरं तावद्वर्षकोटीर्विलंघ्य सः । यशस्वानित्यभून्नाम्ना यशस्वी नवमो मनुः ॥71॥

कुमुदप्रमितं तस्य परमायुर्महीयसः । षट्छतानि च पंचाशद्धनूंषि वपुरुच्छ्रितिः ॥72॥

तस्य काले प्रजा जन्यमुखलोकपुरस्सरम् । कृताशिषः क्षणं स्थित्वा लोकान्तरमुपागमन् ॥73॥

ततो न्तरमतिक्रम्य तत्प्रायोग्याब्दसंमितम् । अभिचन्द्रो भवन्नाम्ना चन्द्रसौम्याननो मनुः ॥74॥

कुमुदाङ्गप्रमायुष्को ज्वलन्मुकुटकुण्डलः । पंचवर्गाग्रषट्चापशतोत्सेधः स्फुरत्तनुः ॥75॥

तस्य काले प्रजास्तोकमुखं वीक्ष्य सकौतुकम् । आशास्य क्रीडनं चक्रुर्निशि चन्द्राभिदर्शनैः ॥76॥

पुनरन्तरमुल्लंघ्य तत्प्रायोग्यसमाशतैः । चन्द्राभ इत्यभूत् ख्यातश्चन्द्रास्यः कालविन्मनुः ॥77॥

नयुतप्रमितायुष्को विलसल्लक्षणोज्ज्वलः । धनुषां षट्छतान्युच्चः प्रोद्यदर्कसमद्युतिः ॥78॥

तस्य काले तिसंप्रीताः पुत्राशासनदर्शनैः । तुग्भिः सह स्म जीवन्ति दिनानि कतिचित्प्रजाः ॥79॥

मरुद्देवो भवत्कान्तः कुलधृत्तदनन्तरम् । स्वोचितान्तरमुल्लंघ्य प्रजानामुत्सवो दृशाम् ॥80॥

शतानि पंच पंचाग्रां सप्ततिं च समुच्छ्रितिः । धनूंषि नयुताङ्गायुर्विवस्वानिव भास्वरः ॥81॥

तस्य काले प्रजा दीर्घ प्रजाभिः स्वाभिरन्विताः । प्राणिषुस्तन्मुखालोकतदङ्गस्पर्शनोत्सवैः ॥82॥

नौद्रोणीसंक्रमादीनि जलदुर्गेष्वकारयत् । गिरिदुर्गेषु सोपानपद्धतीः सो धिरोहणे ॥83॥

ततः प्रसेनजिज्जज्ञे प्रभविष्णुर्मनुर्महान् । कर्मभूमिस्थितावेवमभ्यर्णायां शनैः शनैः ॥84॥

पर्वप्रमितमाम्नातं मनोरस्यायुरंजसा । शतानि पंच चापानां शतार्ध च तदुच्छ्रितिः ॥85॥

तदाभूदर्भकोत्पत्तिर्जरायुपटलावृता । ततस्तत्कर्षणोपायं स प्रजानामुपादिशत् ॥86॥

तदनन्तरमेवाभून्नाभिः कुलधरः सुधीः । युगादिपरुषैः पूर्वैरुदूढां धुरमुद्वहन् ॥87॥

पूर्वकोटिमितं तस्य परमायुस्तनूच्छ्रितिः । शतानि पंच चापानां पंच चापानां पंचवर्गाधिकानि वै ॥88॥

तस्य काले सुतोत्पत्तौ नाभिनालमदृश्यत । स तन्निकर्तनोपायमादिशन्नाभिरित्यभूत् ॥89॥

तस्यैव काले जलदाः कालिकाः कर्वुरत्विषः । प्रादुरासन्नभोभागे सान्द्रा सेन्द्रशरासनाः ॥90॥

शनैःशनैर्विवृद्धानि क्षेत्रेष्वविरलं तदा । सस्यान्यकृष्टपच्यानि नानाभेदानि सर्वतः ॥91॥

प्रजानां पूर्वसुकृतात् कालादपि च तादृशात् । सुपक्वानि यथाकालं फलदायीनि रेजिरे ॥92॥

तदा पितृव्यतिक्रान्तावपत्यानीव तत्पदम् । कल्पवृक्षोचितं स्थानं तान्यध्याशिषत स्फुटम् ॥93॥

नातिवृष्टिरवृष्टिर्वा तदासीत् किंतु मध्यमा । वृंष्टिस्ततत्सर्वधान्यानां फलावाप्तिरविप्लुता ॥94॥

षष्टिकाकलमव्रीहियवगोधूमकङ्गवः । शामाककोद्रवोदारनीवारवरकास्तथा ॥95॥

तिलातस्यौ मसूरश्च सर्षपो धान्यजीरके । मुद्गमाषाढकीराजमाषनिष्पावकाश्चणः ॥96॥

कुलत्थत्रिपुटा चेति धान्यभेदास्त्विमे मताः । सकुसुम्भाः सकार्पासाः प्रजाजीवनहेतवः ॥97॥

उपभोग्येषु धान्येषु सत्स्वप्येषु तदा प्रजाः । तदुपायमजानानाः स्वतो मुर्मुमुहुर्मुहुः ॥98॥

कलपद्रुमेषु कात्स्न्र्येन प्रलीनुषु निराश्रयाः । युगस्य परिवर्ते स्मिन् अभूवन्नाकुला कुलाः ॥99॥

तीव्रायामशनायायामुदीर्णाहारसंज्ञकाः । जीवनोपायशंसीतिव्याकुलीकृतचेतसः ॥100

युगमुख्यमुपासीना नाभिं मनुमपश्चिमम् । ते तं विज्ञापयामासुरिति दीनगिरो नराः ॥101॥

जीवामः कथमेवाद्य नाथानाथा विना द्रुमैः । कल्पदायिभिराकल्पमविस्मार्यैरपुण्यकाः ॥102॥

इमे केचिदितो देव तरुभेदाः समुत्थिताः । शाखाभिः फलनम्राभिराह्वयन्तीव नो धुना ॥103॥

किमिमे परिहर्तव्याः किं वा भोग्यफला इमे । फलेग्रहीनिमे स्मान् वानिग्रहन्त्यनुपान्ति वा ॥104॥

अमीषामुपशल्येषु केप्यमी तृणगुल्मकाः । फलनम्रशिखा भान्ति विश्वदिक्कमितो मुतः ॥105॥

क एषामुपयोगः स्याद्विनियोज्याः कथं नु वा । किमिमे स्वैरसंग्राह्या न वेतीदं वदाद्य नः ॥106॥

त्वं देव सर्वमप्येतद्वेत्सि नाभे नभिज्ञकाः । पृच्छामो वयमद्यार्तास्ततो ब्रूहि प्रसीद नः ॥107॥

इति कर्तव्यमामूढानतिभीतांस्तदार्यकान् । नाभिर्न भेयमित्युक्त्वा व्याजहार पुनः स तान् ॥108॥

इमे कल्पतरुच्छेदे द्रुमाः पक्वफलानताः । युष्मानद्यानुगृह्णन्ति पुरा कलपद्रुमा यथा ॥109॥

भद्रकास्तदिमे भोग्याः कार्या न भ्रान्तिरत्र वः । अमी च परिहर्तव्या दूरतो विषवृक्षकाः ॥110॥

इमाश्च नामौषधयः स्तम्बकर्यादयो मताः । एतासां भोज्यमन्नाद्यं व्यंजनाद्यैः सुसंस्कृतम् ॥111॥

स्वाभावमधुराश्चैते दीर्घाः पुण्ड्रेक्षुदण्डकाः । रसीकृत्य प्रपातव्या दन्तैर्यन्त्रैश्च पीडिताः ॥112॥

गजकुम्भस्थले तेन मृदा निर्वर्तितानि च । पात्राणि विविधान्येषां. स्थाल्यादीनि दयालुना ॥113॥

इत्याद्युपायकथनैः प्रीताः सत्कृत्य तं मनुम् । भेजुस्तद्दर्शितां वृत्तिं प्रजाः कालोचितां तदा ॥114॥

प्रजानां हितकृद् भूत्वा भोगभूमिस्थितिच्युतौ । नाभिराजस्तदोद्भूतो भेजे कल्पतरुस्थितिम् ॥115॥

पूर्वं व्यावर्णिता ये ये प्रतिश्रुत्यादयः क्रमात् । पुराभवे बभूवुस्ते विदेहेषु महान्वयाः ॥116॥

कुशलैः पात्रादानाद्यैः अनुष्ठानैर्यथोचितैः । सम्यक्त्वग्रहणात्पूर्वं बध्वायुर्भोगभूभुवाम् ॥117॥

पश्चात् क्षायिकसम्यक्त्वमुपादाय जिनान्तिके । अत्रोदपत्सत स्वायुरन्ते ते श्रुतपूर्विणः ॥118॥

इमं नियोगमाध्याय प्रजानामित्युपादिशन् । केचिज्जातिस्मरास्तेषु केचिच्चावधिलोचनाः ॥119॥

प्रजानां जीवनोपायमननान्मनवो मताः । आर्याणां कुलसंस्त्यायकृतेः कुलकरा इमे ॥120॥

कुलानां धारणादेते मताः कुलधरा इति । युगादिपुरुषाः प्रोक्ता युगादौ प्रभविष्णवः ॥121॥

वृषभस्तीर्थकृच्चैव कुलभृच्चैव संमतः । भरतश्चक्रभृच्चैव कुलधृच्चैव वर्णितः ॥122॥

अत्राद्यैः पंचभिर्नृणां कुलकृभ्दिः कृतागसाम् । हाकारलक्षणो दण्डः समवस्थापिस्तदा ॥123॥

हा-माकारौ च दण्डो न्यैः पंचभिः संप्रवर्तितः । पंचभिस्तु ततः शेषैः हा-मा-धिक्कारलक्षणः ॥124॥

शरीरदण्डनं चैव वधबन्धादिलक्षणम् । नृणां प्रबलदोषाणां भरतेन नियोजितम् ॥125॥

यदायुरुक्तमेतेषाममममादिप्रसंख्यया । क्रियते तद्विनिश्चित्यै परिभाषोपवर्णनम् ॥126॥

पूर्वाङ्गं वर्षलक्षाणामशीतिश्चतुरुत्तरा । तद्वर्गितं भवेत्पूर्वं तत्कोटी पूर्वकोट्यसौ ॥127॥

Whatever age has been shown through the measure, 'Amama', earlier for the kulakaras or family-organizer, it is determined through the following description of the definitions. Eighty-four lac years form a pūrvāṅga. On squaring it, the pūrva is formed, and on multiplying it by a crore the pūrvakoṭi is said to be produced. //5.126-127//

इन कुलकरोंकी पहिले जो अमम आदिके प्रमाणसे आयु बतलायी गई है उसका निश्चय करनेके लिये उन परिभाषाओंका वर्णन किया जाता है- चौरासी लाख (८४०००००) वर्षोंका एक पूर्वांग होता है। उसको वर्गित करने पर ($८४०००००^२$ = ७०५६) एक पूर्व, तथा उसे एक करोड़से गुणित करने पर एक पूर्वकोटि कहा जाता है।।१२६-१२७।।

पूर्वं चतुरशीतिघ्नं पर्वाङ्गं परिभाष्यते । पूर्वाङ्गताडितं तत्तु पर्वाङ्गं पर्वमिष्यते ॥128॥

The pūrva when multiplied by eighty-four, the parvāṅga is said to be formed and when that parvāṅga is multiplied by pūrvāṅga [84 lac], the number so obtained is regarded as parva. //5.128//

चौरासीसे गुणित पूर्वको पर्वांग कहा जाता है और उस पर्वांगको पूर्वांग (८४ लाख) से गुणित करने पर जो संख्या प्राप्त हो वह पर्व मानी जाती है।।१२८।।

गुणाकारविधिः सो यं योजनीयो यथाक्रमम् । उत्तरेष्वपि संख्यानविकल्पेषु निराकुलम् ॥129॥

Among the types of numbers ahead also, this scheme of multiplication method be adopted in sequence, impassively. //5.129//

आगेके संख्याभेदोंमें भी निराकुल होकर क्रमसे इसी गुणाकार विधिकी योजना करना चाहिये। [ जैसे- पर्वको चौरासी (८४) से गुणित करनेपर वह नयुतांग तथा इस नयुतांगको चौरासी लाख (८४०००००) से गुणित करने पर वह नयुत कहा जाता है, इत्यादि । विशेषके लिये देखिये ति. प. गा. ४, २९५-३०८]।।१२९।।

तेषां संख्यानभेदानां नामानीमान्यनुक्रमात् । कीर्त्यन्ते नादिसिद्धान्तपदरूढीनि यानि वै ॥130॥

Here, the number types with denomination are being instructed in proper sequence, in the manner they are noted in the syllables of the ab-aeterno revelation, traditionally. //5.130//

यहाँ उन संख्याभेदोंके इन नामोंका यथाक्रमसे निर्देश किया जाता है जिस प्रकारसे कि वे प्रवाह स्वरूपसे अनादि आगमके पदोंमें प्रसिद्ध हैं।।१३०।।

पूर्वाङ्गं च तथा पूर्वं पर्वाङ्गं पर्व साह्वयम् । नयुताङ्गं परं तस्मान्नयुतं च ततः परम् ॥131॥

कुमुदाङ्गमतो विद्धि कुमुदाह्वमतः परम् । पद्माङ्गं च तथा पद्मं नलिनाङ्गमतो पि च ॥132॥

नलिनं कमलाङ्गं च तथान्यत् कमलं विदुः । तुट्यङ्गं तुटितं चान्यदटटाङ्गमथाटटम् ॥133॥

अममाङ्गमतो ज्ञेयममामाख्यमतः परम् । हाहाङ्गं च तथा हाहा हूहूश्चैवं प्रतीयताम् ॥134॥

लताङ्गं च लताह्वं च महत्पूर्वं च तद्द्वयम् । शिरः प्रकम्पितं चान्यत्ततो हस्तप्रहेलितम् ॥135॥

अचलात्मकमित्येवंप्रकारः कालपर्ययः । संख्येयो गणनातीतं विदुः कालमतः परम् ॥136॥

Pūrvāṅga, pūrva, parvāṅga, parva, nayutaṅga, nayuta, kumudāṅga, kumuda, padmāṅga, padma, nalināṅga, nalina, kamalāṅga, kamala, tuṭyāṅga, tuṭita, aṭaṭāṅga, aṭaṭa, amamāṅga, amama, hāhāṅga, hāhā, hūhū aṅga, hūhū, latāṅga, latā, mahālatāṅga, mahālatā, śiraḥ prakaṁpita, hasta prahelita and acalātmaka; that period of time in form of events of these kinds, is said to be finite. Beyond this, the period beyond enumeration is to be known as the innumerable time. //5.131-136//

पूर्वांग, पूर्व, पर्वांग, पर्व, नयुतांग, नयुत, कुमुदांग, कुमुद, पद्मांग, पद्म, नलिनांग, नलिन, कमलांग कमल, तूट्यंग, तुटित, अटटांग, अटट, अममांग, अमम, हाहांग, हाहा, हूहूअंग, हूहू लतांग, लता, महालतांग, महालता, शिरःप्रकम्पित, हस्तप्रहेलित और अचलात्मक; इस प्रकारकी पर्यायों स्वरूप वह काल संख्येय कहा जाता है। इससे आगेके गणना रहित उस कालको असंख्येय काल जानना चाहिए।।१३१-१३६।।

यथासंभवमेतेषु मनूनामायुरूह्यताम् । संख्याज्ञानमिदं विद्वान् सुधीः पौराणिको भवेत् ॥137॥

The age of the above mentioned kulakaras should be known from these kinds as far as possible. The person conversant with this knowledge of numbers becomes the versed of the purāṇas. //5.137//

उपर्युक्त कुलकरोंकी आयु यथासम्भव इन्हीं भेदोंमें जानना चाहिये। इस संख्याज्ञानका जानकार पुराणका वेत्ता पण्डित होता है।।१३७।।

अल्पे शिष्टे तृतीयान्ते क्षीणे वृक्षगुणे क्रमात् । लोभादिषु प्रवृद्धेषु कर्मभूमिश्च जायते ॥138॥

असिर्मसिः कृषिर्विद्या वाणिज्यव्यवहारता । इति प्रोक्तानि कर्माणि शिल्पानि च महात्मना ॥139॥

अहिंसादिगुणैर्युक्तस्त्यागेन्द्रियजयात्मकः । दर्शनज्ञानवृत्तात्मा ततो धर्मो हि देशितः ॥140॥

पुरग्रामनिवेशाश्च आकरः पत्तनानि च । अध्यक्षव्यवहाराश्च आदिराजकृता भुवि ॥141॥

जिनाश्चक्रधरा भूपा हलिनः केशवा अपि । कर्मभूमिषु जायन्ते नाभूवन् ये युगत्रये ॥142॥

पूर्वकोटिः प्रकृष्टायुः प्रत्यहं चापि भोजनम् । धनुषपंचशतोच्छ्रायश्चतुर्थ्यादौ नृणां भवेत् ॥143॥

। ७०५६ $^{०}_{१७}$ ।

In the beginning of the fourth period, the maximal age of human beings is one pūrvakoṭi, taking food everyday, and their height of body is five hundred dhanuṣas. //5.143//

$7056\,\frac{0}{17}$

Note: $7056\,\frac{0}{17}$ means seventeen zero

चतुर्थ कालके प्रारम्भमें मनुष्योंकी उत्कृष्ट आयु एक पूर्वकोटि शून्य प्रमाण, प्रतिदिन आहारग्रहण और शरीरकी ऊँचाई पाँच सौ धनुष प्रमाण होती है।।१४३।।

पञ्चवर्णशरीराश्च धर्माधर्मरताः प्रजा । कुपाखण्डा न विद्यन्ते तस्मिन् काले समागते ॥144॥

पञ्चस्वपि विदेहेषु चतुर्थ्यादियुगं स्थितम् । गुणेषु हीयमानेषु पञ्चमी चोपतिष्ठते ॥145॥

तत्रादौ सप्तहस्तोच्चा विंशत्यब्दशतायुषः । रूक्षवर्णशरीराश्च प्रायाहाराश्च मानवाः ॥146॥

स्तब्धा लुब्धाः कृतघ्नाश्च पापिष्ठाः प्रायशः शठाः । रूक्षाः क्रूरा जडा मूर्खा अमर्यादा अधार्मिकाः ॥147॥

हिंसाचौर्यानृतोद्युक्ताः कातराः परदूषकाः । पिशुनाः क्रोधना धूर्ताः पञ्चमे प्रायशो नराः ॥148॥

डामरक्षामरोगार्ता बाधाभग्नाश्च मानवाः । न त्रातारं न भर्तारं लभन्ते कालकर्षिताः ॥149॥

ईतिचोरठकाद्याढ्या त्वनावृष्टिर्विरूक्षिता । व्याधापहृतभार्या च तथा भूमिर्न शोभते ॥150॥

व्यालकीटमृगव्याधैरन्यायायुक्तिकेश्वरैः । कुहकैश्च वृथा लोको यथेष्टमभिपीड्यते ॥151॥

हस्तत्रयसमुच्छ्राया धूमश्यामा विरूपकाः । षष्ठादौ पञ्चमान्ते च विंशत्यब्दायुषोऽधिकात् ॥152॥

तत्र सूर्योदये धर्मो मध्याह्ने राजशासनम् । अस्तं गच्छति सूर्येऽग्निर्नश्यत्येकदिने क्रमात् ॥153॥

धर्मे लोकगुरौ नष्टे पितरीव नृपेऽपि च । आधारे च महत्यग्नौ अनाथं जायते जगत् ॥154॥

कालदोषविनष्टानामज्ञानां नीचकर्मणाम् । त्यक्तानामपि धर्मेण मृगाचारः प्रवर्तते ॥155॥

ततः कालानुभावेन प्रजानामपि पीडया । घोरः संवर्तको नाम्ना प्रादुर्भवति मारुतः ॥156॥

चूर्णयित्वाद्रिवृक्षांश्च भित्त्वा भूमितलानि सः । दिशो भ्राम्यति भूतानां पीडां घोरामुदीरयन् ॥157॥

वृक्षभङ्गशिलाभेदैर्भ्रमद्भिर्वातघूर्णितैः । म्रियन्ते परितो जीवा मूर्च्छन्ति विलपन्ति च ॥158॥

विजयार्धान्तमासन्ना भीता उत्पातदर्शनात् । भग्नशेषा नरास्तत्र गङ्गासिन्धुमुखान्तिकाः ॥159॥

प्रविशन्ति बिलं कृच्छ्रान्नद्योस्तीरं समाश्रिताः । द्विसप्ततिनिगोदास्तु तत्र जीवन्ति बीजवत् ॥160॥

उक्तं च द्वयं त्रिलोकप्रज्ञप्तौ [ 4,1547-48 ]--

गङ्गासिंधुणदीणं वेयड्ढ वणंतरम्मिपविसंति । पुह पुह संखेज्जाइं बावत्तरि सयलजुगलाइं ॥14॥

देवा विज्जाहरया कारुण्णपरा णराण तिरियाणं । संखेज्जजीवरासिं खिवंति तेसुं पएसेसुं ॥15॥

शीतक्षारविषश्च्योताः परुषाग्निक्षरा अपि । धूलीधूमक्षराश्चैव प्रवर्षन्ति क्रमाद्घनाः ॥161॥

एकैको दिवसान् सप्त आप्लावयति तोयदः । तैः शेषाश्च प्रजा नाशमुपयान्ति स्वपापतः ॥162॥

विषदग्धाग्निनिर्दग्धा भूः सस्थावरजङ्गमाः । अधो योजनमध्वानं चूर्णीभवति कालतः ॥163॥

काले दीर्घायुषश्चात्र त्रिंशदर्धसमायुषः । मत्स्यमण्डूकमूलाद्यैराहारैर्वर्तयन्ति च ॥164॥

समा उक्ता षडप्येता भरतैरावतेषु तु । क्रमेण परिवर्तन्ते उत्सर्पिण्या विपर्ययात् ॥165॥

षष्ठाद्येनावसर्पिण्यामुत्सर्पिण्याद्यषष्ठका । उभौ समाविति ज्ञेयावन्यासां चैवमादिशेत् ॥166॥

पुष्कराख्या पुनर्मेघाः प्रादुर्भूय समन्ततः । वर्षन्त्यौष्ण्यप्रशान्त्यर्थं सप्ताहं सार्वलौकिकाः ॥167॥

दुग्धमेघाश्च वर्षन्ति भूम्याः शुभ्रकरास्ततः । स्नेहदा घृतमेघाश्च स्निग्धां कुर्वन्ति मेदिनीम् ॥168॥

अमृतोदकमेघाश्च औषधीं जनयन्ति ते । रसमेघाः पुनस्तासु नानारसकराः स्मृताः ॥169॥

नानारसजलैर्भूमिर्मृष्टास्वादा प्रवर्तते । वल्लीगुल्मलता वृक्षा नानाकारा भवन्ति च ॥170॥

गुहानद्याश्रिता मर्त्याः शैत्यगन्धगुणाहताः । विनिर्गत्य ततः सर्वे मेदिनीमावसन्ति च ॥171॥

भूमिमूलफलाहारा वर्धमानफलोदयाः । बहुला लघु जायन्ते धान्यानि च ततः परम् ॥172॥

समासहस्रशेषे च दुःषमाया विवर्धने । भवन्ति कुलकृन्मर्त्यास्ततः पञ्चदश क्रमात् ॥173॥

उक्तं च त्रिलोकसारे [ 871-72 ]--

उस्सप्पिणीय विदिये सहस्स सेसेसु कुलयरा कणय । कणयप्पहरायद्धयपुंगव तह नलिणपउममहपउमा ॥16॥

तस्सोसलमणुहि कुलायाराणलपक्कपहुदिया होंति । तेवट्ठिणरा तदिये सेणियचरपढमतित्थयरो ॥17॥

ततः प्रभृति सर्वज्ञा बलकेशवचक्रिणः । प्रतिशत्रुनृपाश्चैव भवन्ति क्रमशो भुवि ॥174॥

अनीतिः स्थितमर्यादो गुणवन्नरमण्डितः । सुभिक्षो धर्मकर्माढ्यस्तृतीयोऽप्यतिवर्तते ॥175॥

ततस्तुर्या भवेत्तत्र सुषमा पञ्चमी समा । द्विरुक्तसुषमा षष्ठी युत्सर्पिण्यामिति स्मृताः ॥176॥

इति लोकविभागे कालविभागो नाम पञ्चमप्रकरणं समाप्तम्

# षष्ठो विभागः

ज्ञानसुज्योतिषा लोको येनाशेषः प्रकाशितः । तं सर्वज्ञं प्रणम्याग्रे ज्योतिर्लोकः प्रवक्ष्यते ॥1॥

चन्द्राः सूर्या ग्रहा भानि तारकाश्चेति पञ्चधा । जिनैर्ज्योतिष्किकाः प्रोक्ताः खे चरन्तः स्थिता अपि ॥2॥

गोलकार्धगृहास्तेषां ज्योतिषां मणितोरणाः । भ्राजन्ते देवदेवीभिर्जिनबिम्बैश्च नित्यशः ॥3॥

ऊर्ध्वमष्टशते भूम्या दशोनेऽन्त्यास्तु तारकाः । ताभ्यो दशसु सूर्याः स्युस्ततोऽशीत्यां निशाकराः ॥4॥

७९० । ८०० । ८८० ।

तेभ्यश्चतुर्षु ऋक्षाणि तेभ्यः सौम्याश्च तावति । शुक्रगुर्वारसौराश्च त्रिषु त्रिषु यथाक्रमम् ॥5॥

४ । ४ । ३ । ३ । ३ । ३ ।

The last star is situated eight hundred yojanas as reduced by ten, above this earth. Ten yojanas still higher is the sun, eighty yojanas further higher is the moon, four yojanas further higher is the planet set, four yojanas further higher is Mercury, again the sequence, three yojanas successively, higher and higher are Venus, Jupiter, Mars and Saturn. //6.4-5//

790 । 800 । 880 । 4 । 4 । 3 । 3 । 3 । 3 ।

इस पृथिवीसे दस कम आठ सौ योजन ऊपर जाकर अन्तिम तारा स्थित हैं, उनसे दस योजन ऊपर जाकर सूर्य उनसे अस्सी योजन ऊपर जाकर चन्द्र, उनसे चार योजन ऊपर जाकर ग्रह, उनसे उतने ही योजन ऊपर जाकर बुध, फिर क्रमसे तीन तीन योजन ऊपर जाकर शुक्र, गुरु, मंगल और शनि स्थित हैं।।४-५।।

ज्योतिःपटलबाहल्यं दशाग्रं शतयोजनम् । भ्रमन्ति मानुषावासे स्थित्वा भान्ति ततः परम् ॥6॥

। ११० ।

The depth of the astral disc is one hundred ten yojanas alone. Whatever astral deities are present in the human universe, they revolve around, and beyond them all the astral deities are standstill and decorated. //6.6//

। 110 ।

ज्योतिषपटलका बाहल्य एक सौ दस योजन के भीतर अवस्थित हैं। जो ज्योतिषी देव मनुष्यलोक अढ़ाई द्वीपमें वर्तमान हैं वे परिभ्रमण किया करते हैं, और इससे आगेके सब ज्योतिषी देव अवस्थित स्थिर रहकर सुशोभित होते हैं।।६।।

गव्यूतिसप्तभागेषु जघन्यं तारकान्तरम् । पञ्चाशन्मध्यमं ज्ञेयं सहस्रं बृहदन्तरम् ॥7॥

। $\frac{१}{७}$ । ५० । १००० ।

The minimal interval of the stars, from one star to another should be known to be one seventh part of a kośa, the intermediate interval as fifty yojanas and the maximal interval as one thousand yojanas alone. //6.7//

$\frac{1}{7}$ 50 । 1000 ।

एक तारासे दूसरे तारे तक ताराओंका जघन्य अन्तर एक कोसके सातवें भाग मात्र, मध्यम अन्तर पचास योजन और उत्कृष्ट अन्तर एक हजार योजन मात्र जानना चाहिये।।७।।

पृथिवीपरिणामश्च तेजोधातुश्च भास्करः । उदितं चातपं नाम नामकर्मात्र भास्करे ॥8॥

एकषष्ठिकृतान् भागान् योजनस्य पृथू रविः । चत्वारिंशतमष्टौ च परिधिस्त्रिगुणो धिकः ॥9॥

४८/६१ । १४४/६१ ।

The diameter of the image of the sun is forty-eight parts out of sixty-one parts of a yojana. Its circumference is slightly greater than thrice the diameter. //6.9//

$$\frac{48}{61} \quad \frac{144}{61}$$

सूर्यबिम्बका विस्तार एक योजनके इकसठ भागोंमें चालीस और आठ अर्थात् अड़तालीस भाग प्रमाण है। उसकी परिधि विस्तार से कुछ अधिक तिगुनी है।।९।।

द्वादशैव सहस्राणि तस्योष्णाश्च गभस्तयः । तावन्त एव चन्द्रस्य शीतलाः किरणा मताः ॥10॥

The hot rays of the sun are twelve thousand and the cool rays of the moon are also the same in number. //6.10//

सूर्यकी उष्ण किरणें बारह हजार प्रमाण हैं। उतनी ही शीतल किरणें चन्द्रमाकी मानी गई हैं।।१०।।

अरिष्टश्चार्कवद्वेद्यो व्यासेन न्यूनयोजनम् । राहुः समानोऽरिष्टेन शीतलांशुश्च भाषितः ॥11॥

The celestial plane of the descending node (Ketu) should also be known to be similar to the sun, its diameter being slightly less than a yojana. The celestial plane of the ascending node (Rāhu) is similar to that of Ketu, associated with cool rays. //6.11//

केतुका भी विमान सूर्यके ही समान जानना चाहिये, उसका विस्तार एक योजन से कुछ कम है। राहुका विमान केतुके समान होता हुआ शीतल किरणोंसे संयुक्त कहा गया है।।११।।

एकषष्ट्यास्तु भागेषु पञ्चहीनास्तु पार्थिवे । अब्दा तु शीतलांशौ च सोमेनेन्यूनचक्रवत् ॥12॥

। ५६/६१ ।

The diameter of the moon is five parts less than the sixty-one parts of a yojana. ----------//6.12//

$$\frac{56}{61}$$

चन्द्रबिम्बका भी विस्तार एक योजनके इकसठ भागोंमें पाँच कम अर्थात् छप्पन भाग प्रमाण है।।१२।।

शुक्रश्च पृथिवीधातुर्गोरुतं बहलः पृथुः । द्वे सहस्रे पुनः सार्धे रश्मयो रविवद्द्युतिः ॥13॥

The width of the earth metallic celestial plane of Venus is one kośa and the rays are two and a half thousand, with the lustre like that of the sun. //6.13//

पृथिवी धातुमय शुक्र विमानका विस्तार एक कोस मात्र तथा किरणें अढ़ाई हजार हैं, कान्ति उसकी सूर्यके समान है।।१३।।

बुधस्य खलु भौमस्य शनैश्चारिण एव च । क्रोशार्धं विस्तृतं पीठं गुरोरूनं तु गोरुतम् ॥14॥

The width of the seat of Mercury, Mars and Saturn is half and that of Jupiter is slightly less than a kośa. //6.14//

बुध, मंगल और शनैश्चरकी पीठका विस्तार आधा कोश तथा गुरुकी पीठका विस्तार कुछ कम एक कोस प्रमाण है।।१४।।

चतुर्भागं द्विभागं च चतुर्भागोनगोरुतम् । गोरुतं चापरास्तारा विस्तृता मन्दरश्मयः ॥15॥

१/४ । १/२ । ३/४ ।

The width of the other stars, associated with mild rays is one fourth of a kośa, one half of a kośa, and one kośa as reduced by its one fourth part of a kośa. //6.15//

1/4 1/2 3/4

Alternative reading of the above is stated

मन्द किरणोंसे संयुक्त अन्य ताराओंका विस्तार एक कोसके चतुर्थ भाग, एक कोसके द्वितीय भाग, चतुर्थ भागसे कम एक कोस तथा पूर्ण कोस प्रमाण है। अभिप्राय यह कि ताराओंका जघन्य विस्तार एक कोसके चतुर्थ भाग प्रमाण तथा उत्कृष्ट पूरे कोस प्रमाण है, उनका मध्यम विस्तार एक कोसके चतुर्थ भागसे कुछ अधिकको आदि लेकर कुछ कम एक कोस प्रमाण अनेक भेद रूप है।।१५।।

शीतन्दुशुक्रगुर्वाख्याः कुजाः सौम्यास्तमोदयाः । ऋक्षास्ताराः स्वविष्कम्भादर्धबाहल्यका मताः ॥16॥

The thickness of all the sun, the moon, Venus, Jupiter, Mars, Mercury and the Ascending node (Rāhu) as planets, constellations and stars has been accepted as half of its own diameter. //6.16//

पाठान्तर कहा जाता है-

सूर्य, चन्द्र, शुक्र, गुरु, कुज (मंगल), बुध और राहु ये ग्रह; नक्षत्र तथा तारे इन सबका बाहल्य अपने विस्तारसे आधा माना गया है।।१६।।

सिंहाकारा हि तौ प्राच्यां त्वपाच्यां गजरूपकाः । प्रतीच्यां वृषभाकारा उदीच्यां जटिलाश्वकाः ॥17॥

वहन्ति चाभियोगास्ते षोडशैव सहस्रकम् । रवीन्दुभ्यां त्रयः शेषा हीयन्तेऽर्धार्धसंख्यया ॥18॥

चं १६००० सू १६००० । ८००० । न ४००० । ता २००० ।

The celestial planes of the sun and the moon are driven by the deities with proper energy and genus, sixteen thousand in number, having the shape of a lion in the east, the shape of an elephant in the south, the shape of a bull in the west, and the shape of maned horse in the north. Besides the sun and the moon, the number of the driver deities for the remaining three (planets, constellation and stars) is half of the preceding number of the deities respectively. //6.17-18//

caṁ 16000 sū 16000 । 8000 । na 4000 tā 2000 ।

उन सूर्य और चन्द्रके विमानोंको पूर्वमें सिंहके आकार, दक्षिणमें हाथीके आकार, पश्चिममें बैलके आकार, तथा उत्तरमें जटायुक्त घोड़ेके आकारके सोलह हजार अभियोग्य जातिके देव खींचते है। सूर्य और चन्द्रके अतिरिक्त शेष तीन (ग्रह, नक्षत्र, और तारा) के विमानवाहक देवोंकी संख्या क्रमसे आधी आधी है। चन्द्र १६०००, सूर्य १६०००, ग्रह ८०००, नक्षत्र ४०००, तारा २००० ।।१७-१८।।

आचार्यकृतविन्याससमुदो वाप्यधोमुखः । ज्योतिर्लोकस्वभावोऽयमालोकान्तादिति स्थितः ॥19॥

--------------- (?) This nature of the astral universe is stationed upto the universe (loka). //6.19//

यह ज्योतिर्लोकका स्वभाव लोक पर्यन्त स्थित है।।१९।।

उत्तरेऽभिजिदृक्षाणां मूलो दक्षिण इष्यते । ऊर्ध्वाधः स्वाति भरणी क्रमान्मध्ये च कृत्तिका ॥20॥

The motions of the constellations are such that the motion of Abhijit constellation is in the north, that of Mūla constellation is in the south, that of Svāti and Bharaṇī constellations respectively, is above and below, and that of the Kṛttikā constellation is in the centre. //6.20//

नक्षत्रोंमेंसे उत्तरमें अभिजित् नक्षत्रका, दक्षिणमें मूल नक्षत्रका, ऊपर और नीचे क्रमशः स्वाति और भरणी नक्षत्रोंका तथा मध्यमें कृत्तिका नक्षत्रका संचार माना गया है।।२०।।

सर्वमन्दः शशी गत्या रविः शीघ्रतरस्ततः । रवेर्ग्रहास्ततो भानिस्तेभ्यस्ताराश्च शीघ्रकाः ॥21॥

The motion of the moon is the slowest, the sun moves faster than it, the planets move faster than the sun, the constellations are still faster and still faster than the constellations are the stars. //6.21//

गमनमें चन्द्रमा सबसे मन्द है, सूर्य उसकी अपेक्षा शीघ्र गमन करने वाला है, सूर्य से शीघ्रतर गति वाले ग्रह, उनसे नक्षत्र, तथा उनसे भी शीघ्रतर गति वाले तारा हैं।।२१।।

चरतीन्दोरधो राहुररिष्टोऽपि च भास्वतः । षण्मासात् पर्वसंप्राप्तावर्केन्दू वृणुतश्च तौ ॥22॥

The celestial plane of Rāhu moves below that of the moon and that of Ketu moves below that of the sun. Both of those [ascending and descending nodes] cover (cast shadow over) the moon and the sun on the overlapping concidence of the full moon or the last day of the half dark in six months respectively. //6.22//

चन्द्रके नीचे राहुका विमान तथा सूर्यके भी नीचे केतुका विमान संचार करता है। वे दोनों छह मासमें पर्व (क्रमसे पूर्णिमा व अमावस्या) की प्राप्ति होने पर चन्द्र और सूर्यको आच्छादित करते हैं।।२२।।

त्यक्त्वा मेरुं चरन्त्येकद्व्येकैकं ज्योतिषां गणाः । विहायेन्दुत्रयं शेषाश्चरन्त्येकपथे सदा ॥23॥

। ११२१ ।

The astral group move, leaving the meru mountain at a distance given by decimal digits one, two, one and one yojanas. Besides the three, the sun, the moon and the planets, the remaining constellations and star collection move always in the same path. //6.23//

| 1121 |

ज्योतिषियोंके समूह अंकक्रमसे एक, दो, एक और एक (११२१) अर्थात् ग्यारह सौ इक्कीस योजन प्रमाण मेरु पर्वतको छोड़कर संचार करते हैं। सूर्य, चन्द्र और ग्रह इन तीनको छोड़कर शेष नक्षत्र व तारागण सदा एक ही मार्गमें संचार करते हैं।।२३।।

शशिनौ द्वाविह द्वीपे चत्वारो लवणोदके । परस्मिन् द्वादशैव स्युः कालोदे सप्त षड्गुणाः ॥24॥

पुष्करार्धे पुनश्चन्द्रा द्विसप्ततिरितीरिताः । चन्द्राणां मानुषक्षेत्रे द्वात्रिंशच्छतमुच्यते ॥25॥

Here in the Jambū island, there are four moons in the Lavaṇodaka sea, twelve moons ahead in the Dhātakīkhaṇḍa island, seven as multiplied by six in the Kālodaka sea and seventy-two moons in the Puṣkarārdha. In this way, the total number of moons in the human region is one hundred and thirty-two.//6.24-25//

चन्द्रमा यहाँ जंबूद्वीपमें दो, लवणोदक समुद्रमें चार, आगे धातकीखण्ड द्वीपमें बारह, कालोदक समुद्रमें छहसे गुणित सात अर्थात् बयालीस तथा पुष्करार्धमें बहत्तर कहे गये हैं। इस प्रकार मनुष्यक्षेत्र (अढ़ाईद्वीप) में समस्त चन्द्रोंकी संख्या एक सौ बत्तीस (२ + ४ + १२ + ४२ + ७२ = १३२) होती है।।२४-२५।।

उद्दिष्टास्तिस्त्रिगुणाश्चन्द्रा धातक्यादिषु ते क्रमात् । अतिक्रान्तेन्दुभिर्युक्ता द्वीपे वा सागरेऽपि वा ॥26॥

Whatever number of moons has been instructed in the Dhātakīkhṇḍa etc. intended island-seas, that is greater than that of the moons in the preceding island-seas by three thimes the amount respectively, in the succeeding island or sea. //6.26//

धातकीखण्ड आदि विवक्षित द्वीप समुद्रोंमें जितने चन्द्रोंका निर्देश किया गया है आगेके द्वीप अथवा समुद्र में वे क्रमसे तिगुणे होकर पिछले द्वीप समुद्रों की चन्द्र संख्यासे अधिक है।।२६।।

चत्वारिंशच्छतं चन्द्राश्चत्वारोऽपि च पुष्करे । द्विनवत्यधिकं प्राहुः पुष्करोदे चतुःशतम् ॥27॥

There are stationed one hundred forty-four moons in the Puṣkara island and four hundred ninety-two moons in the Puṣkarādha sea. //6.27//

पुष्कर द्वीपमें एक सौ चालीस और चार अर्थात् एक सौ चवालीस (१४४) तथा पुष्करोद समुद्रमें चार सौ बानबे [१४४ × ३ (४२ + १२ + ४ + २) = ४६२] चन्द्र अवस्थित हैं।।२७।।

अष्टाशीतिर्ग्रहा इन्दोः साष्टा भानां च विंशतिः । एकैकस्य तु विज्ञेयं रवयः शशिभिः समाः ॥28॥

। २८ ।

Eighty-eight planets and twenty-eight constellations should be known to belong to every one of the moons. The suns are also the same as the moon. //6.28//

। 28 ।

एक एक चन्द्रके अठासी (८८) ग्रह तथा आठ सहित बीस अर्थात् अट्ठाईस (२८) नक्षत्र जानना चाहिये। सूर्य चन्द्रोंके ही समान होते हैं।।२८।।

समुद्रे त्रिशतं त्रिंशद् द्वीपे साशीतिकं शतम् । प्रविश्य चरतोऽर्केन्दू मण्डलानि च लक्षयेत् ॥29॥

३३० । १८० ।

The sun and the moon move in the Lavaṇa sea with an entry of three hundred thirty yojanas and move in the Jambū island with an entry of one hundred and eighty yojanas. Their orbits are to be known as follows. //6.29//

330 । 180 ।

सूर्य और चन्द्रमा समुद्र (लवणोद) में तीन सौ तीस (३३०) तथा द्वीप जंबूद्वीप के भीतर एक सौ अस्सी योजन प्रविष्ट होकर संचार करते हैं। उनकी वीथियाँ इस प्रकार जानना चाहिये ।।२६।।

वीथ्यः पञ्चदशेन्दोः स्युरेकोनान्यन्तराणि च । द्विशतं षोडशोनं तु रवे रूपोनमन्तरम् ॥30॥

१५ । १४ ।

In the Jambū island there are fifteen orbits and their intervals are one less. The orbits of the sun are two hundred as reduced by sixteen and the number of intervals is one less.//6.30//

15 । 14 ।

जंबूद्वीप में चन्द्रकी पन्द्रह (१५) वीथियाँ और उनके अन्तर उनसे एक कम अर्थात् चौदह, (१४) हैं। सूर्य की वीथियाँ सोलह कम दो सौ (१८४) और अन्तर एक कम अर्थात् एक सौ तेरासी (१८३) हैं।।३०।।

लवणे द्विगुणा वीथ्यो रवेश्चन्द्रस्य चोदिताः । पृथग्रूपोनका वीथ्यश्चान्तराणि च लक्षयेत् ॥31॥

३० । ३६८ ।

In the Lavaṇa sea, the orbits of the moon and the sun have been related separately to be twice the above mentioned. Whatever are the orbits, the intervals should be known to be one less for each. //6.31//

30 । 368 ।

लवण समुद्रमें चन्द्र और सूर्यकी वीथियाँ पृथक् पृथक् इनसे दूनी (चन्द्रकी ३० और सूर्यकी ३६८) कही गई हैं। जितनी वीथियां हैं उनसे एक कम उनके अन्तर (२६, ३६७) भी जानना चाहिये ।।३१।।

नवतिः खलु चन्द्राणां वीथ्यः स्युर्धातकीध्वजे । एकादश शतानि स्युश्चतुरग्राणि भास्वताम् ॥32॥

। ११०४ ।

In the Dhātakī island the number of orbits of the moon is ninety and those of the sun are eleven hundred four. //6.32//

। 1104 ।

धातकीखण्ड द्वीपमें चन्द्रोंकी वीथियाँ नब्बे (१५ × ६ = ६० ) तथा सूर्योंकी वीथियाँ ग्यारह सौ चार (१८४ × ६ = ११०४) हैं ॥३२॥

कालोदे चन्द्रवीथ्यः स्युस्त्रिशतं दश पञ्च च । अष्टात्रिंशच्छतानि स्युश्चतुःषष्टिश्च भास्वताम् ॥33॥

In the Kālodaka sea, the number of orbits of the moons is three hundred fifteen and that of the orbits of the suns is thirty-eight hundred sixty-four. //6.33//

कालोद समुद्रमें चन्द्रवीथियाँ तीन सौ दस और पाँच अर्थात् तीन सौ पन्द्रह (१५ × २१ = ३१५) तथा सूर्योंकी वीथियाँ अड़तीस सौ चौंसठ (१८४ × २१ = ३८६४) हैं॥३३॥

चत्वारिंशत्सहस्रार्धमिन्दुवीथ्योऽर्धपुष्करे । षट्षष्टिस्तु शतानि स्युश्चतुर्विंशानि भास्वताम् ॥34॥

। ५४० ।

In the Puṣkarārdha island the orbits of the moons are half the thousand and forty, and those of the suns are sixty-six hundred twenty-four. //6.34//

। 540 ।

पुष्करार्ध द्वीपमें चन्द्रवीथियाँ हजारकी आधी और चालीस अर्थात् पाँच सौ चालीस (१५ × ३६ = ५४०) तथा सूर्योंकी वीथियाँ छयासठ सौ चौबीस (१८४ × ३६ = ६६२४) हैं॥३४॥

मानुषोत्तरशैलाच्च द्वीपसागरवेदिका - । मूलतो नियुतार्धेन ततो लक्षेण मण्डलम् ॥35॥

५००००

The first spiral (maṇḍala) is half a lac yojanas from the basis of the ramparts of the island-seas ahead the Mānuṣottara mountain. Ahead of that, every spiral path is successively one lac yojanas beyond. //6.35//

50000 ।

मनुषोत्तर पर्वतके आगे द्वीप समुद्रोंकी वेदिकाके मूल भाग से आधा लाख (५००००) योजन जाकर प्रथम मण्डल (सूर्य चन्द्रोंका वलय) है, उसके आगे उनका प्रत्यके मण्डल एक एक लाख (१०००००) योजन जाकर है॥३५॥

पुष्करार्धाद्यवलये द्विगुणा च द्विसप्ततिः । चन्द्रसूर्यास्ततोऽन्येषु चतुष्कं चोत्तरं पृथक् ॥36॥

In the first spiral of the Puṣkarārdha island there are double of the seventy-two suns and the moons. Ahead of this, in other orbits they are successively four more. //6.36//

पुष्करार्ध द्वीपके प्रथम वलयमें दुगुणे बहत्तर (७२ × २ = १४४) अर्थात् एक सौ चवालीस सूर्य और चन्द्र स्थित हैं। इससे आगेके अन्य वलयोंमें वे पृथक पृथक चार चार चयसे अधिक (१४४, १४८, १५२, १५६, १६०, १६४, १६८, १७२) हैं॥३६॥

आदेरादिस्तु विज्ञेयो द्विगुणद्विगुणक्रमः । परिधौ च स्वके स्व-स्वचन्द्रादित्यैर्हतेऽन्तरे ॥37॥

In the successive islands-seas for their first spiral, the number of the moons should be known to be double of those in the first spiral orbit of the preceding island or sea. The interval between a moon and another stationed there, is known on dividing own circumference by the number of the moons and the suns situated in own spirals or orbits. //6.37//

आगेके द्वीप समुद्रोंके प्रथम वलयमें पिछले द्वीप अथवा समुद्रके प्रथम वलयमें स्थित चन्द्रोंकी अपेक्षा क्रमसे दूने दूने चन्द्र जानना चाहिये। अपनी परिधिमें अपने अपने वलयगत चन्द्र और सूर्योंकी संख्याका भाग देनेपर वहाँ स्थित एक चन्द्रसे दूसरे चन्द्रका अन्तर जाना जाता है।।३७।।

**गच्छोत्तरसमाभ्यासात्त्यजेदुत्तरमादियुक् । अन्त्यमादियुतं भूयो गच्छार्धगुणितं धनम् ॥38॥**

आ १४४ । उ ४ । ग ८ ।

After multiplication of the number of terms and common-difference, the common-difference is subtracted from the product and the first term is added in the remainder. In this way, the intended last sum is obtained. To this last sum is again added the first term and multiplied by half the number of terms, resulting in the total sum. //6.38//

ā 144 | u 4 | ga 8 |

गच्छ और चयको गुणित करनेसे जो प्राप्त हो उसमें से चयके प्रमाणको कम करके शेषमें आदिके प्रमाणको जोड़ देना चाहिये। इस प्रकारसे विवक्षित अन्तिम धन प्राप्त हो जाता है। इस अन्त्य धनमें फिरसे आदिको मिलाकर गच्छके अर्ध भाग से गुणित करनेपर सर्वधन प्राप्त होता है।।३८।।

**द्वादशैव शतानि स्युश्चतुः षष्ठ्याधिकानि हि । पुष्करार्धे बहिश्चन्द्रास्तावन्तोऽपि च भास्कराः ॥39॥**

In the outer Puṣkarārdha [island] there are twelve hundred sixty-four moons and as many suns also. //6.39//

बाह्य पुष्करार्धमें बारह सौ चौसठ (१२६४) चन्द्र और उतने ही सूर्य भी हैं।।३९।।

**तारकाकीर्णमाकाशमालोकान्तादितोऽमुतः । पुष्यस्थाः सर्वसूर्यास्तु चन्द्रास्त्वभिजिदि स्थिताः ॥40॥**

Here, the space (ākāśa) upto the universe is pervaded by stars. All the suns are stationed on Puṣya constellation, but the moons are situated on Abhijit constellation. //6.40//

यहाँ लोक पर्यन्त आकाश ताराओंसे व्याप्त है। सब सूर्य तो पुष्य नक्षत्र पर स्थित होते हैं, किन्तु चन्द्रमा अभिजित् नक्षत्रपर स्थित होते हैं।।४०।।

**चात्वारिंशच्च चत्वारि सहस्राणि शताष्टकम् । विंशतिश्चान्तरं मेरो रवेश्चासन्नमण्डले ॥41॥**

In the interior orbit, the sun is at a distance of forty-four thousand eight hundred twenty yojanas from the meru. //6.41//

मेरुसे अभ्यन्तर मण्डल (वीथी) में स्थित सूर्यका अन्तर चवालीस हजार आठ सौ बीस (४४८२०) योजन प्रमाण रहता है।।४१।।

**चत्वारिंशत्तथाष्टौ च एकषष्टिकृतांशकाः । द्वियोजने च प्रक्षेपस्तस्यानन्तरमण्डले ॥42॥**

When the sun is on the second orbit, it is at a distance of two yojanas and forty-eight parts out of sixty-one parts of a yojana in excess of the former orbital distance from the meru. //6.42//

इसमें दो योजन तथा एक योजनके इकसठ भागोंमेंसे चालीस और आठ अर्थात् अड़तालीस भाग २ $\frac{४८}{६१}$ प्रमाण [दिवसगति] का प्रक्षेप करने पर उतना अनन्तर (द्वितीय) मण्डल में स्थित सूर्यका मेरुसे अन्तर रहता है-।।४२।।

**स एव गुणितक्षेपः प्रक्षिप्तव्यो यथेप्सिते । आ बाह्यमण्डलादेवं मेरुसूर्यान्तरं भवेत् ॥43॥**

In this way, the interval between meru and the sun on an intended or chosen orbit is found out on successively adding the excess mentioned above as multiplied by the number in order of the orbit from the innermost. //6.43//

इसी प्रकारसे बाह्य मण्डल तक उसी गुणित (तृतीय मण्डलमें दुगुणा, चतुर्थमें तिगुणा इत्यादि) प्रक्षेपको मिलाते जानेसे विवक्षित मण्डलमें स्थित सूर्यका मेरुसे अन्तर प्रमाण होता है।।४३।।

**चत्वारिंशच्च पञ्चापि सहस्राण्यथ सप्ततिः । पञ्च चान्तरमाख्यातं मध्यमे मण्डले रवेः ।।44।।**

When the sun is on the middle or central orbit, the measure of this interval is forty-five thousand seventy-five yojanas. //6.44//

मध्यम मण्डलमें स्थित सूर्यके इस अन्तरका प्रमाण पैंतालीस हजार पचत्तर योजन मात्र होता है ४४८२० + (२$\frac{४८}{६१}$ × ६१$\frac{१}{२}$) = ४५०७५ यो. ।।४४।।

**चत्वारिंशच्च पञ्चापि सहस्राणि शतत्रयम् । त्रिंशच्च मण्डले बाह्ये मेरुसूर्यान्तरं भवेत् ।।45।।**

In the outer most orbit, the interval between meru and the sun is forty-five thousand three hundred thirty yojanas. //6.45//

बाह्य मण्डलमें मेरु और सूर्यका यह अन्तर पैंतालीस हजार तीन सौ तीस योजन मात्र होता है ४४८२० + (२$\frac{४८}{६१}$ × १८३) = ४५३३० यो.।।४५।।

**नवनवतिसहस्राणि षट्छतानि भवन्ति च । चत्वारिंशच्च मध्यं स्यादन्तरमण्डलसूर्ययोः ।।46।।**

The interval between both the suns situated in the inner orbit is ninety-nine thousand six hundred forty yojanas. //6.46//

अभ्यन्तर वीथीमें स्थित दोनों सूर्योंके मध्य में निन्यानबै हजार छह सौ चालीस (९९६४०) योजन मात्र अन्तर होता है।।४६।।

**पञ्चत्रिंशत्पुनर्भागा योजनानां च पञ्चकम् । एकैकस्मिन् भवेत् क्षेपस्तस्यानन्तरमण्डले ।।47।।**

५ । $\frac{३५}{६१}$ ।

When five yojanas and thirty-five parts out of sixty-one parts of a yojana is added to the above interval between the two suns situated in the inner most orbit, the interval between the suns in the succeeding orbits is found out through multiplication of the excess by successive number of orbit concerned. //6.47//

$$5\frac{35}{61}$$

अभ्यन्तर वीथीमें स्थित दोनों सूर्यों के मध्यगत इस अन्तर प्रमाणमें उत्तरोत्तर पाँच योजन और एक योजनके इकसठ भागोंमें से पैंतीस भागों (दुगुणा दिवसगतिक्षेत्र- २$\frac{४८}{६१}$ × ५$\frac{३५}{६१}$) को मिलानेसे द्वितीयादि अनन्तर वीथियोंमें स्थित दोनों सूर्योंके मध्यगत अन्तरका प्रमाण होता है।।४७।।

**नियुतं शतमेकं च पञ्चशान्मध्यमान्तरम् । षष्ठ्या युक्तैः शतैः षड्भिर्नियुतं बाह्यमण्डले ।।48।।**

In the middle orbit the interval between both the suns is found to be one lac one hundred fifty yojanas and this interval happens to be one lac six hundred sixty yojanas in the exterior-most orbit.//6.48//

दोनों सूर्योका अन्तर मध्यम वीथी में एक लाख एक सौ पचास योजन तथा वही बाह्य वीथीमें एक लाख छह सौ साठ योजन मात्र होता है- ९९६४० + ($५\frac{३५}{६१}$ × $\frac{१८३}{२}$) = १००१५० यो. अध्यम अन्तर; ९९६४० + ($५\frac{३५}{६१}$ × १८३) = १००६६० यो. बाह्य वीथीगत दोनों सूर्योका अन्तर ।।४८।।

आसन्नमण्डलस्यास्य परिधेश्च प्रमाणकम् । नवाष्टशून्यपञ्चैकं त्रयमङ्कक्रमेण च ।।49।।

The measure of the circumference of this inner orbit is given by decimal notational digits in order as nine, eight, zero, five, one and three yojanas. //6.49//

इस अभ्यन्तर वीथीकी परिधिका प्रमाण अंकक्रमसे नौ, आठ, शून्य, पाँच, एक और तीन (३१५०८९) इतने योजन मात्र है।।४९।।

मण्डले मण्डले क्षेपः परिधौ दश सप्त च । अष्टत्रिंशच्च भागा स्युरेकषष्ठ्यास्तु साधिकाः ।।50।।

१७ । $\frac{३८}{६१}$ ।

For finding out the succeeding orbital circumference, the preceding orbital circumference is increased by seventeen yojanas and thirty-eight parts out of sixty-one parts of a yojana, respectively. //6.50//

$$17 \mid \frac{38}{61} \mid$$

आगे आगेकी (द्वितीय तृतीयादि) वीथियोंके परिधि प्रमाणको लानेके लिये पूर्व पूर्व वीथीके परिधि प्रमाणमें दस और सात अर्थात् सत्तरह योजन तथा एक योजनके इकसठ भागोंमेसे अड़तीस भागों $१७\frac{३८}{६१}$ को क्रमशः मिलाते जाना चाहिये ।।५०।।

नियुतानां त्रिकं भूयः सहस्रं षोडशाहतं । शतानि सप्त द्वे चैव परिधिर्मध्यमण्डले ।।51।।

In the middle orbital spiral, the circumference is three lac sixteen thousand seven hundred two yojanas. //6.51//

मध्य वीथीमें परिधिका प्रमाण तीन लाख सोलह हजार सात सौ दो योजन मात्र है ३१५०८९ + ($१७\frac{३८}{६१}$ × $\frac{१८३}{२}$) = ३१६७०२ यो. ।।५१।।

अष्टादशसहस्राणि नियुतानामपि त्रिकम् । त्रिशतं दश चत्वारि परिधिर्बाह्यमण्डले ।।52।।

In the external orbit the circumference is three lac eighteen thousand three hundred fourteen yojanas. //6.52.//

बाह्य वीथीमें इस परिधिका प्रमाण तीन लाख अठारह हजार तीन सौ चौदह योजन मात्र है ३१५०८९ + ($१७\frac{३८}{६१}$ × १८३) = ३१८३१४ यो. ।।५२।।

बाह्यादेकैकमार्गस्य परिधिश्चान्तरं पुनः । स्वस्वक्षेपेण हीनं स्याद्यावत्प्रथममण्डलम् ।।53।।

From the external orbit upto the first orbit, the measure of this circumference of every orbit and interval becomes less by the projection (prakṣepa) for each, successively. //6.53//

बाह्य वीथीसे लेकर प्रथम वीथी तक प्रत्येक वीथीका यह परिधि प्रमाण और अन्तर उत्तरोत्तर अपने अपने प्रक्षेपसे कम है।।५३।।

चत्वारिंशच्च चत्वारि सहस्राणि शताष्टकम् । विंशतिश्चान्तरं मेरोश्चन्द्रस्यासन्नमण्डले ॥54॥

When the moon is situated on the first orbit, its distance from the meru is forty-four thousand eight hundred twenty yojanas. //6.54//

मेरु पर्वतसे प्रथम वीथीमें स्थित चन्द्रका अन्तर चवालीस हजार आठ सौ बीस ४४८२० योजन मात्र है।।५४।।

षट्त्रिंशद्योजनं तस्मिन् उत्तरं सप्तविंशतिः । चतुःशतस्य भागाश्च नवसप्ततिशतं भवेत् ॥55॥

For finding out the above interval for the moon situated on the second etc. orbits, the common-difference (caya) is thirty-six yojanas and one hundred seventy-nine parts out of four hundred twenty-seven parts of a yojana. //6.55//

द्वितीय आदि वीथियोंमें स्थित चन्द्रके उपर्युक्त अन्तरको लानेके लिये यहाँ चयका प्रमाण छत्तीस योजन और एक योजनके चार सौ सत्ताईस भागों में से एक सौ उन्यासी भाग ($३६\frac{१७९}{४२७}$) मात्र है।।५५।।

उत्तरेण सहैतेन सदनन्तरमन्तरम् । पुनस्तेनैव संयुक्तं तृतीयं त्वन्तरं भवेत् ॥56॥

When this common-difference is combined with the above mentioned interval between the meru and the first orbit stationed moon, the requisite interval is obtained for the second orbit. Then in this interval, the common-difference is added to get the third interval. //6.56//

मेरुसे प्रथम वीथीमें स्थित चन्द्रके पूर्वोक्त अन्तर प्रमाणमें इस चयके मिला देनेसे अनन्तर (द्वितीय) वीथीमें स्थित चन्द्र और मेरु के बीचके अन्तरका प्रमाण प्राप्त होता है। फिर इस अन्तर प्रमाणमें उसी चयको मिला देनेसे तृतीय अन्तरका प्रमाण होता है।।५६।।

चत्वारिंशच्च पञ्चापि सहस्राण्यथ सप्ततिः । पञ्चाधिका च देशोना मेर्विन्दोर्मध्यमान्तरम् ॥57॥

। ४५०७५ । ऊनप्रमाणं $\frac{४}{६१}$ ।

The medial interval between the meru and the moon is slightly less than forty-five thousand seventy-five yojanas by four parts out of sixty-one parts of a yojana. //6.57//

। 45078 । ūna pramāṇaṁ $\frac{4}{61}$

मेरु और चन्द्रके मध्यम अन्तरका प्रमाण पैंतालीस हजार पचहत्तर योजनसे किंचित् $\frac{४}{६१}$ कम है--

$४४८२० + (३६\frac{१७९}{४२७} \times \frac{१४}{२}) = ४५०७४\frac{५७}{६१}$ यो. ।।५७।।

चत्वारिंशत्पुनः पञ्च सहस्राणि शतत्रयम् । देशोना चान्तरं त्रिंशन्मेर्विन्दोर्बाह्यमण्डले ॥58॥

। ४५३३० । ऊनप्रमाणं $\frac{८}{६१}$ ।

The measure of the interval between the meru and the moon stationed on the exteriormost orbit is forty-five thousand three hundred thirty yojanas as reduced slightly by eight parts out of sixty-one parts of a yojana. //6.58//

। 45330 । ūna pramāṇaṁ $\frac{8}{61}$

बाह्य (१५वीं) वीथीमें स्थित चन्द्र और मेरुके मध्यगत अन्तरका प्रमाण पैंतालीस हजार तीन सौ तीस योजन से किंचित् $\left(\frac{८}{६१}\right)$ कम है-- $४४८२० + \left(३६\frac{१७६}{४२७} \times \frac{५३}{६१}\right) = ४५३२९\frac{५३}{६१}$ यो. ।।५८।।

**अन्तरं रविमेर्वोर्यत्तादिन्द्वोर्मध्यबाह्यजम् । विशेषस्त्वेकषष्ठचंशाश्चत्वारोऽष्टौ च हीनकाः ॥59॥**

$\mid \frac{४}{६१} \mid \frac{८}{६१} \mid$

Whatever is the medial and exterior difference between the meru and the sun, the similar is the medial and exterior difference between the meru and the moon. The only speciality is that relative to the interval between the sun and the meru, the medial interval between the moon and the meru is less by four parts out of sixty-one parts (of a yojana) and the exterior interval is less by eight parts. //6.59//

$$\frac{4}{61} \quad \frac{8}{61}$$

मेरुसे सूर्यका जो मध्यम और बाह्य अन्तर है वही मेरुसे चन्द्र भी मध्यम और बाह्य अन्तर है। विशेष इतना है कि सूर्य और मेरुके मध्यगत अन्तरकी अपेक्षा चन्द्र और मेरुके मध्यगत मध्यम अन्तर इकसठ भागोंमेंसे चार भागों से हीन है तथा बाह्य अन्तर आठ भागों $\left(\frac{८}{६१}\right)$ से हीन है।।५९।।

**पूर्वोक्ते तूत्तरे हीने चोपान्त्यान्तरमिष्यते । तेनैव रहितं भूयस्तृतीयं बाहिराद्भवेत् ॥60॥**

On subtracting the above mentioned common-difference from this exterior interval, the remainder is regarded as the penultimate interval. That penultimate interval when reduced by the same common-difference becomes the third interval relative to exterior interval. //6.60//

इस बाह्य अन्तरमेंसे पूर्वोक्त चयको कम कर देनपर शेष उपान्त्य अन्तर माना जाता है, उसी चयसे रहित वह उपान्त्य अन्तर बाह्य अन्तरकी अपेक्षा तीसरा अन्तर होता है- $४५३२९\frac{५३}{६१} - ३६\frac{१७६}{४२७} = ४५२९३\frac{१९२}{४२७}$ उपान्त्य अन्तर; $४५२९३\frac{१९२}{४२७} - ३६\frac{१७६}{४२७} = ४५२५७\frac{१३}{४२७}$ बाह्यकी अपेक्षा तीसरा अन्तर।।६०।।

**नवतिश्च नवापि स्युः सहस्राण्यथ षट्छतम् । चत्वारिंशच्च शशिनोरन्तरं पूर्वमण्डले ॥61॥**

When both the moons are situated in the first orbit, the interval between them is ninety-nine thousand six hundred forty yojanas. //6.61//

प्रथम वीथीमें स्थित दोनों चन्द्रोंके मध्यमें निन्यानबै हजार छह सौ चालीस (९९६४०) योजनका अन्तर है।।६१।।

**अत्रोत्तरं च विज्ञेयं योजनानां द्विसप्ततिः । सप्तद्विकचतुष्काणामष्टौ पञ्चत्रयोंऽशकाः ॥62॥**

$\mid \frac{३५८}{४२७} \mid$

The measure of common difference here is seventy-two yojanas and three hundred fifty-eight parts out of four hundred twenty-seven parts of a yojana. //6.62//

$$\frac{358}{427}$$

बहत्तर योजन और एक योजनके चार सौ सत्ताईस अंशोंमें तीन सौ अट्ठावन अंश ($३६\frac{१७६}{४२७}$ × २ = $७२\frac{३५८}{४२७}$ दोनों ओरका दुगुणा दिवसगतिक्षेत्र) इतना यहाँ चयका प्रमाण है।।६२।।

उत्तरेण सहानेन तदनन्तरमन्तरम् । तेनैव सहितं भूयस्तृतीयं चान्तरं भवेत् ।।63।।

When this common-difference is added to the above mentioned interval betweeen the two moons on the first orbit, the next interval is obtained, and on addding that common-difference to the sum, the third interval is obtained. //6.63//

प्रथम वीथीमें स्थित दोनों चन्द्रोंके उपर्युक्त अन्तरमें इस चयके मिला देने पर अनन्तर (द्वितीय) अन्तरका प्रमाण होता है और फिर इसमें उसी चयको मिला देनेसे तृतीय अन्तरका प्रमाण होता है- ९९६४० + $७२\frac{३५८}{४२७}$ = $९९७१२\frac{३५८}{४२७}$ यो. $९९७१२\frac{३५८}{४२७}$ + $७२\frac{३५८}{४२७}$ = $९९७८५\frac{२८९}{४२७}$ यो. ।।६३।।

मध्यमान्त्यान्तरे चेन्द्वोः सूर्ययोरिव भाषिते । एकषष्ठ्यंशकैर्न्यूने अष्टाभिर्द्व्यष्टकैरपि ।।64।।

। $\frac{८}{६१}$ । $\frac{१६}{६१}$ ।

The medium and last interval between both the moons has been related equal to that of both the suns. The speciality is that relative to the medium interval between the sun, the medium interval between the moons is less by eight parts out of sixty-one parts of a yojana, and the exterior difference is less by sixteen parts out of sixty-one parts. //6.64//

8 16
61 61

दोनों चन्द्रोंका मध्यम और अन्तिम अन्तर दोनों सूर्यों के समान कहा गया है। विशेष इतना है कि सूर्यों के मध्यम अन्तरकी अपेक्षा चन्द्रोंका मध्यम अन्तर इकसठ भागोंमें आठ भागों ($\frac{८}{६१}$) से हीन है तथा बाह्य अन्तर दो आठ (८ × २) अर्थात् सोलह भागों ($\frac{१६}{६१}$) से हीन है।।६४।।

त्रिंशदर्धं सहस्राणां तथैव नियुतत्रिकम् । रूपोना नवतिश्चैव परिधिः पूर्वमण्डले ।।65।।

३१५०८९

The measure of the circumference in the previous orbit is three lacs and half of thirty thousand and eighty-nine yojanas. //6.65//

। 315089 ।

पूर्व वीथीमें परिधिका प्रमाण तीन लाख तथा तीसके आधे (पन्द्रह) हजार नवासी योजन (३१५०८९) है।।६५।।

उत्तरं द्विशतं त्रिंशद्योजनान्यत्र संख्यया । सप्तद्विकचतुर्णां च त्रिचतुष्कैकमंकशः ।।66।।

। $\frac{१४३}{४२७}$ ।

Here the measure of the common-difference is two hundred thirty yojanas and one hundred forty-three parts out of four hundred twenty-seven parts of a yojana. //6.66//

यहाँ चयका प्रमाण दो सौ तीस योजन और एक योजनके चार सौ सत्ताईस भागोंमेंसे एक सौ तेतालीस भाग (२३० $\frac{१४३}{४२७}$) प्रमाण है।।६६।।

भानोरिव परिक्षेप इन्दोर्मध्यान्तमण्डले । सप्तद्विकचतुष्काणामशीतिद्विशतेन च ॥67॥

त्रयस्त्रिंशच्छतेनांशैः क्रमाद्धीनो भवेद् ध्रुवम् । स एवोत्तरहीनः स्यादुपान्त्येऽन्तरमिष्यते ॥68॥

। $\frac{२८०}{४२७}$ । $\frac{१३३}{४२७}$ ।

The measure of the circumference in the medium and the final orbits of the moon is similar to that of the sun. It is only less by two hundred eighty parts out of four hundred twenty-seven parts of a yojana in the medium orbit, and less by one hundred thirty-three parts out of four hundred twenty-seven parts of a yojana in the exterior orbit. When a common-difference is subtracted from this exterior circumference, the measure of penultimate circumference. //6.67-68//

$\frac{280}{427}$ $\frac{133}{427}$

चन्द्रकी मध्यम और अन्तिम वीथियों में परिधिका प्रमाण सूर्यके ही समान है। वह उससे केवल मध्यम वीथीमें एक योजनके चार सौ सत्ताईस भागोंमें दो सौ अस्सी भागों ($\frac{२८०}{४२७}$) से तथा बाह्य वीथीमें एक सौ तेतीस भागों ($\frac{१३३}{४२७}$) से हीन है। इस बाह्य परिधिके प्रमाणमेंसे एक चयके कम कर देने पर उपान्त्य परिधिका प्रमाण होता है।।६७-६८।।

एकषष्ठचंशकैः शुद्धनियुतं षड्गुणिताष्टकैः । सूर्ययोरन्तरं मध्यं लावणस्योर्ध्वयायिनोः ॥69॥

। १००००० । ऋणं $\frac{४८}{६१}$ ।

The interval between the two suns, moving over the Lavaṇoda sea, is one lac yojana as reduced by forty parts out of sixty-one parts of a yojana. //6.69//

। 100000 । ṛṇaṁ $\frac{48}{61}$

लवणोद समुद्रके ऊपर संचार करनेवाले दो सूर्योंके मध्यमें एक योजन के इकसठ भागोंमेंसे छह गुणे आठ अर्थात् अड़तालीस भागोंसे कम एक लाख (९९९९९ $\frac{१३}{६१}$) योजन प्रमाण अन्तर होता है।।६९।।

जम्बूद्वीपजगत्याश्च अर्धसूर्यान्तरान्तरे । मण्डलेऽभ्यन्तरे ज्ञेयो वर्तमानो दिवाकरः ॥70॥

। ४९९९९ । $\frac{३७}{६१}$ ।

Whatever interval between both the suns has been shown above, half of that is the interval between the suns moving in the ramparts of the Jambū island and the Lavaṇoda sea for its movement in the sun's interior ring. //6.70//

49999 $\frac{37}{61}$

ऊपर जो दोनों सूर्यों के मध्यमें अन्तर बतलाया गया है उससे आधा अन्तर जंबूद्वीपकी जगती और लवणोद समुद्रमें संचार करनेवाले सूर्यके अभ्यन्तर वलयमें जानना चाहिये- $९९९९९\frac{१३}{६१} \div २ = ४९९९९\frac{३७}{६१}$ यो. ॥७०॥

षट्षष्टिश्च सहस्राणि षट्षष्टया षट्छतानि च । धातकीखण्डसूर्याणां देशोनान्यन्तरं मतम् ॥71॥

। ६६६६६ । ऋणं $\frac{२२}{१८६}$ ।

In the Dhātakīkhaṇḍa island, the interval between the two suns moving there is regarded as slightly less than sixty-six thousand six hundred sixty-six yojanas. //6.71//

66666 ṛṇaṁ $\frac{22}{166}$

शतानि सप्त षष्टिश्च पञ्चयुक्तादिका(गा) श्रिताः । विदिग्गतास्तु विंशानि सप्तैव स्युः शतानि हि ॥39॥
पञ्चैकं पञ्च चाष्टौ च नव चत्वारि रूपकम् । पुष्पप्रकीर्णकाः प्रोक्ताः शैलायां नरका इमे ॥40॥
एकसप्ततियुक्तानि शतानि त्रीणि दिग्गताः । षट्त्रिंशानि पुनस्त्रीणि शतानि स्युर्विदिग्गताः ॥41॥
एकादश शतं ज्ञेयं सहस्राणां नवाहतम् । शते द्वे त्रिनवत्यग्रे चतुर्थ्यां च प्रकीर्णकाः ॥42॥
चत्वारिंशच्छतं चैकं पञ्चाग्रा दिक्षु भाषिताः । विंशमेकं शतं भूयः पञ्चम्यां च विदिग्गताः ॥43॥
नवैव च सहस्राणि व्ययुतं नियुतत्रिकम् । शतानि सप्त त्रिंशच्च पञ्चाग्रात्र प्रकीर्णकाः ॥44॥
त्रिंशन्नवोत्तरा दिक्षु षट्चतुष्का विदिग्गताः । नियुतं त्वष्टषष्ट्यूनं षष्ट्यां पुष्पप्रकीर्णकाः ॥45॥
कालश्चैव महाकालो रौरवो महारौरवाः । पूर्वापरे दक्षिणतश्चोत्तरतः क्रमोदिताः ॥46॥
अप्रतिष्ठानसंज्ञश्च मध्ये तेषां प्रतिष्ठितः । जम्बूद्वीपसमव्यासः पञ्चैते सप्तमीस्थिताः ॥47॥

उक्तं च [ ] -

In the seventh earth, there are four sequence-ordered holes, the Kāla, the Mahākāla, the Raurava, and the Mahāraurava have been related to be in the east, west, south, and north, respectively. In their centre, there is the indraka hole, called Apratiṣṭhāna. Its width is equal to that of the Jambū island. There are only five holes in the seventh earth. //8.46-47//

सातवीं पृथिवीमें काल, महाकाल, रौरव और महारौरव ये चार श्रेणीबद्ध बिल क्रमसे पूर्व, पश्चिम, दक्षिण और उत्तरमें कहे गये हैं। उनके मध्यमें अप्रतिष्ठान नामका इन्द्रक बिल स्थित है। उसका विस्तार जम्बूद्वीपके बराबर (१००००० यो.) है। सातवीं पृथिवीमें ये ही पाँच बिल स्थित हैं।।४६-४७।।

मनुष्यक्षेत्रमानः स्यात्प्रथमो जम्बूसमोऽन्तिमः । विशेषोभये व्येकेन्द्रकाप्ते हानिवृद्धि (?) च ॥1॥
द्वादशाप्ताश्च लक्षाणामेकादश चयो भवेत् । उपर्युपरि विस्तारे चेन्द्रकाणां यथाक्रमम् ॥48॥

$$\left| \frac{११०००००}{१२} \right|$$

It is told also -

The width of the first indraka is equal to that of the human region (two and a half islands) and that of the last indraka is equal to that of the Jambū island.

On subtracting the width of the last indraka from the width of the first indraka, the remainder is divided by the number of indrakas as reduced by unity. This gives the measure of the decrease and increase (?). //1//

Whatever quotient is obtained on dividing eleven lac by twelve, that much distance ahead, there is decrease [ relative to first indraka] and there is increase [relative to last indraka] in proper sequence in the width of the indraka holes. //8.48//

$$\frac{1100000}{12}$$

ग्यारह लाखमें बारहका भाग देनेपर जो लब्ध हो उतनी ($\frac{११०००००}{१२}$) आगे आगे इन्द्रक बिलोंके विस्तारमें यथाक्रमसे [प्रथम इन्द्रककी अपेक्षा हानि और अन्तिम इन्द्रककी अपेक्षा वृद्धि] होती गई है।।४८।।

एकनवतिसहस्राणि योजनानि तु षट्छतम् । षट्षष्टिश्च समाख्याता त्रिभागौ वृद्धिरेव च ॥49॥

९१६६६ । $\frac{२}{३}$ ।

The measure of this decrease-increase has been related as ninety-one thousand six hundred sixty-six yojanas and two parts out of three parts of a yojana. //8.49//

$$91666\frac{2}{3}$$

इस हानि वृद्धिका प्रमाण इक्यानबै हजार छह सौ छ्यासठ योजन और एक योजनके तीन भागोंमेंसे दो भाग मात्र कहा गया है $\frac{११०००००}{१२}$ = ९१६६६$\frac{२}{३}$।।४९।।

सीमन्तकस्य दिक्षु स्युः पंचाशद्रूपवर्जिताः । विदिक्षु पुनरेकोना निरयाः समवस्थिताः ॥50॥

४९ । ४८ ।

In the four directions of the Sīmāntaka indraka, in every direction there are fifty as reduced by unity, and in the sub-directions there are one less hellish holes than this. //8.50//

49 | 48 |

सीमन्तक इन्द्रककी चारों दिशाओंमेंसे प्रत्येक दिशामें एक कम पचास (४९) तथा विदिशाओंमें इससे एक कम (४८-४८) नारक बिल अतस्थित हैं।।५०।।

द्वितीयप्रतरेऽष्टोन एवमष्टोनकाः क्रमात् । सर्वेऽपि प्रतरा ज्ञेया यावदन्त्यो भवेदिति ॥51॥

Relative to the first surface the sequentially ordered holes in the second surface are eight less.. In this way, upto the last indraka, the sequentially ordered holes subject to alll indrakas have been reducing by eight, respectively. Such should be known. //8.51//

द्वितीय प्रतरके आश्रित श्रेणीबद्ध बिल प्रथमकी अपेक्षा [प्रत्येक दिशा और विदिशामें एक एक कम होते जानेसे] आठ कम हैं। इस प्रकार अन्तिम इन्द्रक तक सब इन्द्रकोंके आश्रित श्रेणीबद्ध बिल क्रमसे आठ आठ हीन होते गये हैं, ऐसा जानना चाहिये ।।५१।।

एकेन हीनगच्छश्च दलितश्चयताडितः ॥ सादिर्गच्छहतश्चैव सर्वसंकलितं भवेत् ॥52॥

The number of terms be reduced by unity, halved and then multiplied by common difference. Then the first term (ādi) is added to it and multiplied by number of terms, resulting in the total sum. //8.52//

एक कम गच्छको आधा करके चयसे गुणित करे। फिर उसमें आदि (मुख) को मिलाकर गच्छसे गुणित करने पर सर्वसंकलित (सर्वधन) प्राप्त होता है।।५२।।

षट्छतानि त्रिपञ्चाशत् सहस्राणि नवैव च । आवल्या तु स्थिता ज्ञेया निरयाः सर्वभूमिषु ॥53॥

In all the earths the holes situated in sequence are nine thousand six hundred fifty-three. //8.53//

सब पृथिवियोंमें नौ हजार छह सौ तिरेपन बिल श्रेणीस्वरूपसे स्थित जानने चाहिये- श्रेणीबद्ध ९६०४ + इन्द्रक ४९ = ९६५३।।५३।।

शतान्येकान्न पञ्चाशच्चत्वारिंशन्नवोत्तरा । दिक्स्थिता निरयाः एते गणिताः सर्वभूमिषु ॥54॥

In all the earths, the hellish bills in eastern etc. directions are forty-nine hundred forty- nine. //8.54//

सब पृथिवियोंमें उनंचास सौ उनंचास (४९४९) नारक बिल पूर्वादिक दिशाओंमें स्थित हैं-$(\frac{४९-१}{२}) \times ४ + ४ \times ४९ = ४९००$ श्रेणीबद्ध, ४९०० + ४९ इन्द्रक = ४९४९ ।।५४।।

चत्वारि स्युः सहस्राणि पुनः सप्त शतानि च । चत्वारश्च विदिग्भाजः संख्याताः सर्वभूमिषु ।।55।।

In the all earths, along the sub-directions there have been related four thousand seven hundred four hellish holes. //8.55//

चार हजार सात सौ चार (४७०४) इतने नारक बिल सब भूमियोंके भीतर विदिशाओंमें स्थित बतलाये गये हैं।।५५।।

त्र्यशीतिर्नियुतानां च अयुतानि नवैव च । चत्वारिंशच्च सप्ताग्रा त्रिशतं च प्रकीर्णकाः ।।56।।

The scattered holes in all the earths are eighty-three lac, nine ayuta (ninety thousand) three hundred forty-seven. //8.56//

तेरासी लाख नौ अयुत (नौ गुणित दस हजार) अर्थात् नब्बे हजार तीन सौ सैंतालीस (८३९०३४७) इतने सब पृथिवियोंमें प्रकीर्णक बिल स्थित हैं- ८३९०३४७ + ९६५३ = ८४००००० समस्त नारक बिल ।।५६।।

संख्येयविस्तृता ज्ञेया सर्वेऽपीन्द्रकसंज्ञकाः । असंख्येयतता एव आवल्या निरयाः स्थिताः ।।57।।

All the indraka holes should be known to be of width of numerate yojanas. Situated in a trail form, are all of innumerate yojanas of width. //8.57//

सब इन्द्रक बिल संख्यात योजन विस्तारवाले जानना चाहिये। आवलीके रूपमें स्थित अर्थात् श्रेणीबद्ध बिल सब असंख्यात योजन विस्तारवाले ही हैं।।५७।।

पुष्पप्रकीर्णकाख्यास्तु प्रायेणासंख्यविस्तृताः । संख्येयविस्तृताः स्तोका इति केवलिभाषिताः ।।58।।

उक्तं च [ त्रि. सा. 153, 163, 165-168, 171-172 ]-

The holes, called the flowery scattered, most of the holes are innumerate yojanas wide, the omniscient have instructed that numerate yojanas wide holes are scanty. //8.58//

पुष्पप्रकीर्णक नामक बिलोंमें अधिकांश असंख्यात योजन विस्तृत हैं। उनमें संख्यात योजन विस्तृत बिल थोड़ेसे ही हैं, ऐसा केवलियोंके द्वारा निर्दिष्ट किया गया है।।५८।।

तेरादिदुहीणिंदय सेढीबद्धा दिसासु विदिसासु । उणवण्णडदालादी एक्केक्केणूणया कमसो ।।2।।

१३ । ११ । ९ । ७ । ५ । ३ । १ ।

वेकपदं चयगुणिदं भूमिम्मि मुहम्मि रिणधणं च कए । मुहभूमीजोगदले पदगुणिदे पदधणं होदि ।।3।।

पुढविंदयमेगूणं अद्धकयं वग्गियं च मूलजुदं । अट्ठगुणं चउसहियं पुढविंदयताडिदम्मि पुढविधणं ।।4।।

श्रे ४४२० । २६८४ । १४७६ । ७०० । २६० । ६० । ४ ।

सेढीणं विच्चाले पुप्फपइण्णय इव ठ्ठिया णिरया । होंति पइण्णयणामा सेढिंदयहीणरासिसमा ।।5।।

पञ्चमभागपमाणा णिरयाणं होंति संखवित्थारा । सेसचउपञ्चभागा असंखवित्थारया णिरया ।।6।।

इंदयसेढीबद्धप्पइण्णयाणं कमेण वित्थारा । संखेज्जमसंखेज्जं उभयं च य जोयणाण हवे ।।7।।

रूवहियपुढविसंखं तियचउसत्तेहि गुणिय छब्भजिदे । कोसाणं बेहुलियं इंदयसेढीपइण्णाणं ।।8।।

इं. क्रो. १ । ३/२ । २ । ५/२ । ३ । ७/२ । ४ । श्रे ४/३ । २ । ८/३ । १०/३ । ४ । १४/३ । १६/३ । प्र ७/३ । ७/२ । १४/३ । ३५/६

। ७ । ४६/६ । [ ५६/६ ]

पदराहदबिलबहलं पदरद्दिठदभूमिदो विसोहित्ता । रूऊणपदहिदाए बिलंतरं उड्ढगं तीए ॥9॥

प्रथमपृथ्वीन्द्रकान्तरं ३११६८७/४८ । श्रेणीबद्धान्तरं २३३६८७/३६ । प्रकीर्णकान्तरं ६३५६०६/१४४ ।

पूर्वे कांक्षा महाकांक्षा चापरे दक्षिणोत्तरे । पिपासातिपिपासा च भवेत् सीमन्तकस्य च ॥59॥

निरयाः ख्यातनामानः प्रथमे प्रतरे मताः । मध्ये मानुषवास्योरुः शेषाश्चासंख्ययोजनाः ॥60॥

[The mentioned verses are from the Trilokasāra], [the quoted verses are, Trilokasāra, vv. 153, 163, 165-68, 171-72].

There are four sequentially ordered hellish holes, well-known, situated in the first disc of the first earth, viz. Kāṅkṣā in the east of SĪmantaka indraka hole, Mahākāṅkṣā in its west, Pipāsā in its south, Atipipāsā in its north. In their centre, the width of the Sīmantaka hole is equal to that of the human region [ human universe], i.e., forty five lac yojanas and the width of the four remaining sequentially ordered holes is innumerate yojanas alone. //8.59-60//

प्रथम पृथिवीके प्रथम पटलमें स्थित सीमन्तक इन्द्रक बिलके पूर्वमें कांक्षा, पश्चिममें महाकांक्षा, दक्षिणमें पिपासा और उत्तरमें अतिपिपासा; इन प्रसिद्ध नामोंवाले चार श्रेणीबद्ध नारक बिल हैं। इनके मध्यमें जो सीमन्तक इन्द्रक बिल है उसका विस्तार मनुष्यलोकके बराबर पैंतालीस लाख (४५०००००) योजन और शेष चार श्रेणीबद्धोंका विस्तार असंख्यात योजन मात्र है।।५९-६०।।

अनिच्छा तु महानिच्छा अविंध्येति च नामतः । महाविंधा च वंशाद्यास्ततकायाश्चतुर्दिशम् ॥61॥

दुःखा खलु महादुःखा वेदा नाम्ना तु दक्षिणा । महावेदा च तप्तस्य दिक्षु शैलादिषु स्थिताः ॥62॥

निसृष्टातिनिसृष्टा च निरोधा चाञ्जनादिका । महानिरोधा चारायाश्चत्वारो दिक्षु संस्थिताः ॥63॥

निरुद्धातिनिरुद्धा च तृतीया तुं विमर्दना । महाविमर्दना चेति तमकायाश्चतुर्दिशम् ॥64॥

नीला नाम्ना महा नीला पङ्का च मघवीगताः । महापङ्का च बोद्धव्या हिमाह्नस्य चतुर्दिशम् ॥65॥

उष्ट्रिकाकुस्थली कुम्भीमोदलीमुद्गरैः समाः । मृदङ्गनालिकातुल्या निगोदा अवनित्रये ॥66॥

गोहस्तिहयबस्तैश्च समा अष्टघटेन च । द्रोण्यम्बरीषैश्च समा च(श्च)तुर्थी-पञ्चमीगताः ॥67॥

झल्लरीमल्लकसमाः किलिञ्जप्रच्छिखोपमाः । केदारमसुराकारा निगोदा अन्त्ययोरपि ॥68॥

श्वशृगालवृकव्याघ्रद्वीपिकोकर्क्षगर्दभैः । गोव्यजोष्ट्रैश्च सदृशा निगोदा जन्मभूमयः ॥69॥

एकं द्वे त्रीणि विस्तीर्णा गव्यूतिर्योजनान्यपि । शतयोजनविस्तारा उत्कृष्टास्तेषु वर्णिताः ॥70॥

ज क्रो ५ । म १० । १५ ।

उच्छ्रिताः पञ्चगुणितं विस्तारं च पृथग्विधाः । सप्तत्रिद्व्येककोणाश्च पञ्चकोणाश्च भाषिताः ॥71॥

त्रिद्वाराश्च त्रिकोणाश्च ऐन्द्रका इतरेषु तु । सप्तत्रिपंचद्व्येकानि द्वारि कोणांश्च निर्दिशेत् ॥72॥

खररूक्षघनस्पर्शा दुर्गन्धा भीमरूपकाः । नित्यान्धकारा अशुभा वज्रकुड्यतलाश्च ते ॥73॥

बहिरस्त्रिकुसंस्थाना अन्तर्वृत्ता दुरीक्षणाः । निगोदाः परमानिष्टाः कष्टाः पापिजनाश्रयाः ॥74॥
श्वाश्वशूकरमार्जारनृखरोष्ट्राहिहस्तिनाम् । कुथितानां समस्तानां गन्धादधिकगन्धिनः ॥75॥
कच्छुरीकरपत्राश्मश्वदंष्ट्रापुञ्जतोऽधिकम् । निगोदानां च तज्जानां स्पृश्यत्वमशुभं सदा ॥76॥
संख्येयविस्तृतानां तु निगोदानां यदन्तरम् । षड्गोरुतं भवेद्ध्रस्वं महत्तद्द्विगुणं मतम् ॥77॥

6 । 12 ।

Whatever is the oblique interval between the holes with numerate yojanas of width, it is six gavyūtis at the minimal, and is regarded as twice this at most. //8.77//

6 । 12 ।

संख्यात योजन विस्तारवाले बिलोंके मध्यमें जो तिरछा अन्तर है वह जघन्य से छह (६) गव्यूति और उत्कर्षतः इससे दूना (१२ गव्यूति) माना गया है।।७७।।

असंख्यविस्तृतानां च सहस्राणि च सप्त च । योजनान्यन्तरं ह्रस्वमसंख्यानि बृहद्भवेत् ॥78॥

The minimal interval between the holes having the width of innumerate yojanas, and the maximal its innumerate yojanas. //8. 78//

असंख्यात योजन विस्तार वाले बिलोंका जघन्य अन्तर सात हजार (७०००) और उत्कृष्ट असंख्यात योजन मात्र है।।७८।।

सप्त दण्डानि रत्नींस्त्रीनुच्छ्रिताः(तास्ते)षडङ्गुलान् । नारकाः प्रथमायां ये शेषासु द्विगुणाः क्रमात् ॥79॥

दं ७ ह ३ अं ६ । दं १५ ह २ । अं १२ । दं ३१ ह १ । दं ६२ ह २ । दं १२५ । दं २५० । दं ५०० ।

The hellish beings in the first earth, have a height of seven dhanuṣa, three ratnis, and six aṅgulas. In the remaining second etc. earths, their height is doubled, respectively. ///8.79//

daṁ 7 ha 3 aṁ 6 । daṁ 15 ha 2 aṁ 12 । daṁ 31 ha 1 ।
daṁ 62 ha 2 । daṁ 125 । daṁ 250 । daṁ 500 ।

प्रथम पृथिवी में जो नारकी हैं वे सात धनुष, तीन रत्नि और छह अंगुल ऊँचे हैं। शेष दूसरी आदि पृथिवियोंमें वे उत्तरोत्तर क्रमसे इससे दुगुणे ऊँचे हैं- प्रथम नरकमें ७ धनुष ३ हाथ ६ अंगुल द्वितीयमें १५ धनुष २ हाथ १२ अंगुल तृतीयमें ३१ धनुष १ हाथ, चतुर्थमें ६२ धनुष २ हाथ, पंचममें १२५ धनुष, छठेमें २५० धनुष, सातवेंमें ५०० धनुष।।७९।।

एकस्त्रयश्च सप्त स्युर्दश सप्तदशैव च । द्वाविंशतिस्त्रयस्त्रिंशत्सागरास्तेषु जीवितम् ॥80॥

In those hells, there is the maximal longevity as one, three, seven, ten, seventeen, twenty-two and thirty-three sāgaropama, respectively. //8.80//

उन नारकोंमें क्रमशः एक, तीन, सात, दस, सत्तरह, बाईस और तेतीस सागरोपम प्रमाण उत्कृष्ट आयु होती है।।८०।।

दशवर्षसहस्राणि प्रथमायां जघन्यकम् । समयेनाधिकं पूर्वं वरं परजघन्यकम् ॥81॥

उक्तं च [ त्रि. सा. 198-200 ]-

In the first hell, the minimal longevity is ten thousand years. Further, in the second etc. hells, the maximal longevity as increased by an instant should be regarded as minimal in the successive earth. //8.81//

जघन्य आयु प्रथम नरकमें दस हजार (१००००) वर्ष प्रमाण है। आगे द्वितीय आदि नरकोंमें पूर्व पूर्व नरकोंकी एक समयसे अधिक उत्कृष्ट आयुको जघन्य समझना चाहिये (जैसे- पहले नरकमें उत्कृष्ट आयु १ सागरोपम प्रमाण है, वही एक समयसे अधिक होकर दूसरे नरकमें जघन्य है, दूसरेमें जो ३ सागरोपम उत्कृष्ट आयु है वह एक समयसे अधिक होकर तीसरेमें जघन्य है, इत्यादि) ॥८१॥

पढमिंदे दसणउदीवाससहस्साउगं जहण्णिदरं । तो णउदिलक्खजेट्ठं असंखपुव्वाण कोडी य ॥10॥

। १०००० । ९०००० । ९०००००० ।

सायरदसमं तुरिये सगसगचरिमिंदयम्मि इगि तिण्णि । सत्त दसं सत्तरसं उवही बावीस तेत्तीसं ॥11॥

१/१० । १ । ३ । ७ । १० । १७ । २२ । ३३ ।

आदीअंतविसेसे रूऊणद्धाहिदम्मि हाणिचयं । उवरिमजेट्ठं समयेणहियं हेट्ठिमजहण्णं तु ॥12॥

सा १/१० । २/११ । ४/९ । ३/७ । ७/५ । ५/३ । ११/१ ।

श्वादीनां कोशतोऽर्थं दुर्गन्धाशुचिमृत्तिकाम् । आहारन्त्यचिरेणाल्पां प्रथमाजातनारकाः ॥82॥

प्रथमाहारतोऽसंख्यागुणिताशुभ उत्तरः । द्वितीयादिषु विज्ञेयः आहारोऽवनिषु क्रमात् ॥83॥

गव्यूत्यभ्यन्तरे जन्तून् गन्धेनाधस्तु मारयेत् । आहारो गोरुतार्धार्धेनाधिकः प्रतरः क्रमात् ॥84॥

१ । ३/२ । २ । ५/२ । ३ । ७/२ । ४ । ९/२ । ५ । ११/२ । ६ । १३/२ । ७ । १५/२ । ८ । १७/२ । ९ । १९/२ । १० । २१/२ । ११ । २३/२ । १२ । २५/२ । १३ । २७/२ । १४ । २९/२ । १५ । ३१/२ । १६ । ३३/२ । १७ । ३५/२ । १८ । ३७/२ । १९ । ३९/२ । २० । ४१/२ । २१ । ४३/२ । २२ । ४५/२ । २३ । ४७/२ । २४ । ४९/२ । २५ ।

उक्तं च [ त्रि. सा. 193 ]--

पढमासणमिह खित्तं कोसद्धं गन्धदो विमारेदि । कोसद्धद्धहियधराठियजीवे पत्थरक्कमदो ॥13॥

क्रो. १/२ । 1 । ३/२ । इत्यादि।

अवधेर्विषयः सर्वः प्रथमायां तु योजनम् । गव्यूत्यर्धार्धहानिः स्यात् सप्तम्यामेकगोरुतम् ॥85॥

क्रो. ४ । ७/२ । ३ । ५/२ । २ । ३/२ । १ ।

पञ्चेन्द्रियास्त्रियोगाश्च कषायैः सकलैर्युताः । नपुंसकाश्च षड्ज्ञाना दर्शनैः सहितास्त्रिभिः ॥86॥

कुदृक् सासादनो मिश्रोऽसंयतश्च चतुर्गुणाः । त्रिलेश्या भावलेश्याभिर्भव्याभव्याश्च संज्ञिनः ॥87॥

८२००००० ।

भूमी द्वे वर्जयित्वाऽत्ये पञ्चम्यां नियुतं तथा । त्र्यग्रायां नियुताशीत्यां नरकेष्वौष्ण्यवेदना ॥88॥

200000 । उक्तं च [ त्रि. सा. 152, ति. प. 2-32 ]--

अरिष्टायास्त्रिभागे च भूम्योरपि च शेषयोः । निरयेषूपमातीता अत्युग्रा शीतवेदना ॥89॥

८२२५००० । १७५००० ।

णिरयचरो णत्थि हरी बलचक्की तुरियपहुदिणिस्सरिदो । तित्थचरमंगसंजद मिस्सतियं णत्थि णियमेण ॥16॥

विक्रिया चाशुभा तेषामपृथक्त्वेन भाषिता । आयुधानि शरादीनि अग्न्यादित्वं च कुर्वते ॥105॥

शङ्कुतोमरकुन्तेष्टिप्रासवास्यसिमुद्गरान् । चक्रक्रकचशूलादीन् स्वाङ्गैरेव विकुर्वते ॥106॥

अग्निवायुशिलावृक्षक्षारतोयविषादिताम् । गत्वा परस्परं घोरं घातयन्ति सदापि ते ॥107॥

व्याघ्रगृध्रमहाकङ्कध्वांक्षकोकवृकश्वताम् । विकृत्य विविधै रूपैर्बाधन्ते च परस्परम् ॥108॥

वधबन्धनबाधाभिश्छिदताडनतोदनैः । स्फाटनच्छोटनच्छेदक्षोदतक्षणभक्षणैः ॥109॥

संततैश्चरितैस्तीव्रैरशुभैरिति गर्हितैः । तुष्यन्ति च चिरं ते च गमयन्ति च जीवितम् ॥110॥

तप्तलोहसमस्पर्शशर्कराक्षुरवालुका । मुर्मुराङ्गारिणी भूमिः सूचीशाद्वलसंचिता ॥111॥

वृश्चिकाणां सहस्राणां वेदनादतिदुःसहम् । दुःखमुत्पद्यते तत्र भूमिस्पर्शनमात्रतः ॥112॥

सज्वाला विस्फुलिङ्गाङ्ग्यः प्रतिमा लोहसंनिभाः । परशुच्छुरिकाबाणाद्यसिपत्रवनानि च ॥113॥

वेतालगिरयो भीमा गुहायन्त्रशतोत्कटाः । कूटशाल्मलयोऽचिन्त्या वैतरण्योऽपि निम्नगाः ॥114॥

पूकशोणितदुर्गन्धाः कृमिकोटिकुलाकुलाः । ह्रदाश्च परितस्तत्र त्रस्तकातरदुस्तराः ॥115॥

अग्निभीताः प्रधावन्तो गत्वा वैतरणीं नदीम् । शीतं तोयमिति ज्ञात्वा क्षाराम्भसि पतन्ति ते ॥116॥

क्षारदग्धशरीराश्च मृगवेगोत्थिताः पुनः । असिपत्रवनं यान्ति छायेति कृतबुद्धयः ॥117॥

शक्तिकुन्तासियष्टीभिः खड्गतोमरपट्टिसैः । छिद्यन्ते कृपणास्तत्र पतद्भिर्वातकम्पितैः ॥118॥

छिन्नपादभुजस्कन्धाश्छिन्नकर्णोष्ठनासिकाः । छिन्नतालुशिरोदन्ताश्छिन्नाक्षिहृदयोदराः ॥119॥

असह्यं शीतमुष्णं च पृथिवी चातिदुस्सहा । क्षुधातृषाभयत्रासवेदनाश्चात्र संतताः ॥120॥

लोहाम्भोभरिताः कुम्भ्यः कटाहाः क्वथित्तोदकाः । चित्राः प्रज्वलिताः शूला भर्जनानि बहूनि च ॥121॥

बहून्येवं प्रकाराणि यातनाकारणानि तु । विक्रियातः स्वभावाच्च प्राणिनां पापकर्मणाम् ॥122॥

कुमार्गगतचारित्रा देवाश्चासुरकायिकाः । नारकानतिबाधन्ते तिसृष्वाद्यासु भूमिषु ॥123॥

मेषकुक्कुटयुद्धाद्यै रमन्तेऽत्र यथा नराः । तथापि ते रतिं यान्ति रागवेगेन पूरिताः ॥124॥

ईप्सितालाभतो दुःखमनिष्टैश्च समागमात् । अवमानभयाच्चैव जायते सागरोपमम् ॥125॥

सहस्रशोऽपि छिन्नाङ्गा न म्रियन्ते हि नारकाः । सूतकस्य रसस्येव संहन्यन्ते तनोर्लवाः ॥126॥

अकालमरणं नैषां समाप्ते पुनरायुषि । विध्वंसन्ते च तत्काया वायुना भ्रलवा इव ॥127॥

कुचरितचितैः पापैस्तीव्रैरधोगतिपातिताः, अवशशरणाः शीतोष्णादिक्षुधावधपीडिताः ।
अतिभयरुजः श्राम्यन्त्यार्ताः भ्रमैर्बत नारकाः, श्वगणविषमव्याधाक्रान्ता यथा हरिणीवृषाः ॥128॥

## इति अधोलोकविभागो नामाष्टमं प्रकरणं समाप्तम् ॥8॥

[Quotation from the Trilokasāra, vv. 198-200]

Leaving apart the one lac holes of the last two earths and the fifth earth, the remaining eighty-two lac hellish holes of the first etc. earth, have the pathos of the heat.

In the one third hellish holes [one lac holes] of the [fifth] Ariṣṭa earth, and in the remaining two last earth, there are holes in the hells where there is penetrating pathos of the cold which is beyond simile. //8.88-89//

। 8200000 । 200000 ।

अन्तिम दो पृथिवियोंको तथा पाँचवीं पृथिवीके एक लाख बिलोंको छोड़कर शेष प्रथमादिक पृथिवियोंके बयासी लाख (८२०००००) नारक बिलोंमें उष्णताकी वेदना है। अरिष्टा पाँचवीं पृथिवीके एक त्रिभाग अर्थात् एक लाख बिलोंमें तथा शेष अन्तिम दो पृथिवियोंके नारक बिलोंमें (१००००० + ९९९९५ + ५ = २०००००) अतिशय तीक्ष्ण शीतकी वेदना है जो उपमासे अतीत अर्थात् असाधारण है।।८८-८९।।

रयणप्पहपुढवीदो पञ्चमतिचउत्थओ त्ति अदिउण्हं । पञ्चमतुरियेछट्टे सत्तमिये होदि अदिसीदं ॥14॥

8225000 । 175000

मेरुसमलोहपिण्डं सीदं उण्हे विलम्हि पक्खित्तं । ण लहदि तलप्पदेसं विलीयदे मयणखंडं व ॥15॥

घोरं तीव्रं महाकष्टं भीमं भीष्मं भयानकम् । दारुणं विपुलं चोग्रं दुःखमश्नुवते खरम् ॥90॥

द्वयोः कपोतलेश्यास्तु नीललेश्याश्च तत्परे । नीला एवाञ्जनोत्पन्ना नीलकृष्णाश्च तत्परे ॥91॥

षष्ठ्यां दुःकृष्णलेश्यास्ते महाकृष्णास्ततः परे । क्रमशो शुभवृद्धिः स्यात्तत्र सप्तसु भूमिषु ॥92॥

सचतुर्भागगव्यूतिस्तिस्रो योजनसप्तकम् । धर्मायामुत्पतन्त्यार्ताः शेषासु द्विगुणाः क्रमात् ॥93॥

यो. ७ क्रो $\frac{१३}{४}$ । १५ क्रो $\frac{५}{२}$ । ३१ क्रो १ । ६२ क्रो २ । १२५ । २५० । ५०० ।

षद्चतुष्कं मुहूर्तानां सप्ताहं पक्ष एव च । मासो मासौ च चत्वारः षण्मासा जननान्तरम् ॥94॥

मु. २४ । दि ७ । १५ । मा. १ । २ । ४ । ६ ।

कर्मभूमिमनुष्याश्च तिर्यचः सकलेन्द्रियाः । नरकेषूपपद्यन्ते निर्गतानां च सा गतिः ॥95॥

अमनस्काः प्रसर्पन्तः पक्षिणोऽपि भुजंगमाः । सिंहाः स्त्रियो मनुष्याश्च साप्चरा यान्ति ताः क्रमात् ॥96॥

एकां द्वे खलु तिस्रश्च चतस्रः पञ्च षद् तथा । सप्त च क्रमशो भूमीर्गन्तुमर्हन्ति जन्तवः ॥97॥

सप्तमया निर्गतो जन्तुर्यायात्सकृदनन्तरम् । द्विः षष्ठिं पञ्चमीं च त्रिश्चतुर्थी च चतुस्ततः ॥98॥

पञ्चकृत्वस्तृतीयां च वंश्यां षद्कृत्व एव च । सप्तकृत्वो विशेदाद्यां प्रथमाया विनिर्गतः ॥99॥

सप्तम्या अप्रतिष्ठानाच्च्युत्वा तं यद्यनन्तरम् । विशेत्पुनः सकृद्यायात् कालादीन् द्विर्धरा अपि ॥100॥

शेषामवनिमेकैकां नरकावासमेव वा । ततश्च्युतस्तथा यायात्प्रत्येकं च त्रिरादि सः ॥101॥

नरकान्निर्गतः कश्चिच्चक्रवर्त्यप्यनन्तरम् । रामः कृष्णोऽथवान्यो वा न भवेदिति निश्चितम् ॥102॥

तिसृभ्यो निर्गतो जीवः कश्चित्तीर्थकरो भवेत् । चतसृभ्यो हि मोक्षार्हः पञ्चभ्यः संयतोऽपि च ॥103॥

संयतासंयतः षष्ठ्याः सप्तम्यास्तु मृतोद्गतः । सम्यक्त्वार्हो भवेत्कश्चित्तिर्यक्ष्वेष्वात्र जायते ॥104॥

उक्तं च [ त्रि. सा. 204 ]--

# नवमो विभागः

अनन्तदर्शनज्ञानान् प्राप्तानन्तं भवोदधेः । नत्वा व्यन्तरदेवानां विकल्पोऽत्र प्रवक्ष्यते ॥1॥
औपपातिकसंज्ञाश्च अन्ये चाध्युषिता इति । अभियोग्यास्तृतीयाश्च त्रिविधा व्यन्तराः सुराः ॥2॥
भवनान्यथ चावासा भवनाख्यपुराणि तु । स्थानानि त्रिविधान्याहुर्व्यन्तराणां समन्ततः ॥3॥
अष्टौ तु किंनराद्यास्तु भवन्त्यावासवासिनः । द्विविधेषु वसन्त्येते भवनेषु पुरेषु च ॥4॥
तिर्यगूर्ध्वाधिरे लोके मेरुमात्रप्रमाणके । वसत्यस्त्रिविधास्तत्र व्यन्तराणामवारिताः ॥5॥
वसुंधरायां चित्रायां सन्त्यत्र भवनानि हि । आवासास्तु न विद्यन्ते इति शास्त्रस्य निर्णयः ॥6॥
केषांचिद्भवनान्येव भवनावासा भवन्ति च । अन्येषामपरेषां च भवनावासपुराणि हि ॥7॥
आवासा वर्णिताः सर्वे प्राकारपरिवारिताः । भावनेष्वसुरांस्त्यक्त्वा केचित्स्युस्त्रिविधालयाः ॥8॥
भवनानां तु सर्वेषां वेदिकाः परितो मताः । क्रोशद्वयोच्चा महतां शतहस्ताः परत्र च ॥9॥
द्वादशापि सहस्राणि द्वे शते च पृथूनि च । महान्त्यल्पानि मानेन त्रिक्रोशानीति लक्षयेत् ॥10॥

। १२२०० । [ ३ ] ।

बाहल्याद्भवनं वेद्यं शतानि त्रीणि यन्महत् । भवनेषु च सर्वाल्पं त्रिक्रोशं बहलं मतम् ॥11॥

। ३०० । [ ३ ]।

शतयोजनबाहल्यं कूटमुत्कृष्टके मतम् । बहलं क्रोशमात्रं तु जघन्ये भवने भवेत् ॥12॥
द्वीपेषु सागरस्थेषु भवनाख्यपुराणि तु । ह्रदपर्वतवृक्षांश्च श्रिताः प्रतिवसन्ति ते ॥13॥
पुराणि वृत्तत्र्यस्राणि चतुरस्राणि कानिचित् । दभ्राणि योजनोरूणि नियुतं तु बृहन्ति च ॥14॥

। १००००० ।

तिर्यग्द्वीपसमुद्रेषु असंख्येयेषु तानि च । रम्याणि बहुरूपाणि नानारत्नमयानि च ॥15॥

उक्तं च चतुष्क [ त्रि. सा. 298, ति. प. 6-12, त्रि. सा. 299-300 ]-

जेट्ठवरभवणाणं बारसहस्सं तु सुद्धपणुवीसं । बहलं तिसय तिपादं बहलतिभागुदयकूडं च ॥1॥

। १२००० । २५ । ३०० । $\frac{३}{४}$ । १०० । $\frac{१}{४}$ ।

कूडाण उवरिभागे चिट्ठंते जिणवरिंदपासादा । कणयमया रजदमया रयणमया विविहविण्णासा ॥2॥
जेट्ठभवणाण परिदो वेदी जोयणदलुच्छिया होदि । अवराणं भवणाणं दंडाणं पण्णवीसुदया ॥3॥
वट्टादीण पुराणं जोयणलक्खं कमेण एक्कं च । आवासाणं विसयाहियबारसहस्स य तिपादं ॥4॥

। १२२०० । $\frac{३}{४}$ ।

पिशाचभूतगन्धर्वाः किंनराः समहोरगाः । रक्षःकिंपुरुषा यक्षा निकाया व्यन्तरेष्विमे ॥16॥
कूष्माण्डा राक्षसा यक्षाः संमोहास्तारकास्तथा । चौक्षाः कालमहाकाला अचौक्षाश्च सतालकाः ॥17॥
देहाश्चान्ये महादेहास्तूष्णीकाः प्रवचनाख्यकाः । चतुर्दशकुला एवं पिशाचव्यन्तराः स्मृताः ॥18॥

इन्द्रौ कालमहाकालौ पिशाचानां प्रकीर्तितौ । पल्योपमायुषावेतौ द्वे द्वे देव्यौ च वल्लभे ॥19॥
कालस्याग्रमहिष्यौ द्वे कमला कमलप्रभा । महाकालस्य देवस्य उत्पला च सुदर्शना ॥20॥
एकैकस्याः परीवाराः सहस्रं खलु योषिताम् । अर्धपल्योपमायुष्काश्चतस्रोऽपि वरस्त्रियः ॥21॥
सुरूपाः प्रतिरूपाश्च तथा भूतोत्तमा परे । प्रतिभूता महाभूताः प्रतिच्छन्नाश्च नामतः ॥22॥
आकाशभूता इत्यन्ये भूतानां सप्तमो गणः । सुरूपः प्रतिरूपश्च तेषामिन्द्रौ मनोहरौ ॥23॥
रूपवत्युदिता देवी बहुरूपा च वल्लभा । सुरूपे प्रतिरूपस्य सुसीमासुमुखे प्रिये ॥24॥
हाहासंज्ञाश्च गन्धर्वाः हूहूसंज्ञाश्च नारदाः । तुम्बर्वाख्याः कदम्बाश्च वासवाश्च महास्वराः ॥25॥
गीतरतीनी(गी)तयशोनामानो भैरवा अपि । इन्द्रौ नीतरतिस्तेषामन्यो नीतयशा इति ॥26॥
सरस्वती प्रियाद्यस्य स्वरसेना च नामतः । नन्दनीति द्वितीयस्य देवी च प्रियदर्शना ॥27॥
दशधा किंनरा देवा आद्याः किंपुरुषाह्वकाः । द्वितीयाः किंनरा एव तृतीया हृदयंगमाः ॥28॥
रूपपालिन इत्यन्ये परे किंनरकिंनराः । अनिन्दिता मनोरम्या अपरे किंनरोत्तमाः ॥29॥
रतिप्रिया रतिज्येष्ठा इति भेदा दशोदिताः । इन्द्रः किंपुरुषाख्योऽत्र किंनरश्च प्रकीर्तितः ॥30॥
अवतंसा केतुमत्या वल्लभे प्रथमस्य ते । रतिषेणा द्वितीयस्य देवी चापि रतिप्रिया ॥31॥
महोरगा दश ज्ञेयास्तत्राद्या भुजगाह्वकाः । भुजंगशालिसंज्ञाश्च महाकायाश्च नामतः ॥32॥
अतिकायाश्चतुर्थास्तु पञ्चमाः स्कन्धशालिनः । मनोहराह्वयाः षष्ठाः स्तनिताशनिजवा अपि ॥33॥
महैशकाश्च गम्भीरा अन्तिमाः प्रियदर्शनाः । महाकायोऽतिकायश्च तेषामिन्द्रौ प्रकीर्तितौ ॥34॥
भोगा भोगवती चेति महाकायस्य वल्लभे । पुष्पगन्धातिकायस्य द्वितीया चाप्यनिन्दिता ॥35॥
सप्तधा राक्षसा भीमा महाभीमाश्च नामतः । विघ्ना विनायका चान्ये ततश्चोदकराक्षसाः ॥36॥
षष्ठास्तेषां च विज्ञेया नाम्ना राक्षसराक्षसाः । ब्रह्मराक्षसनामानस्तेषामन्त्याश्च सप्तमाः ॥37॥
इन्द्रौ भीममहाभीमौ राक्षसेषु महाबलौ । पद्मा च वसुमित्रा च भीमस्याग्रस्त्रियौ मते ॥38॥
महाभीमस्य रत्नाढ्या द्वितीया कनकप्रभा । तथा किंपुरुषा देवा दशधा पुरुषाह्वकाः ॥39॥
पुरुषोत्तमनामानस्तथा सत्पुरुषाः परे । महापुरुषनामानः पुनश्च पुरुषप्रभाः ॥40॥
पुरुषा अतिपूर्वाश्च मरवो मरुदेवकाः । मरुप्रभा यशस्वन्तः इति भेदा दशोदिताः ॥41॥
तेषु सत्पुरुषश्चेन्द्रो महापुरुष इत्यपि । रोहिणी नवमी देव्यौ ह्रीश्च पुष्पवती तथा ॥42॥
माणिभद्राश्च पूर्णाश्च शैलभद्रास्ततः परे । सुमनोभद्रभद्रास्ते सुभद्राश्च प्रकीर्तिताः ॥43॥
सप्तमाः सर्वतोभद्राः यक्षमानुषनामकाः । धनपालरूपयक्षा यक्षोत्तममनोहराः ॥44॥
एवं द्वादशधा यक्षा माणिपूर्णौ तदीश्वरौ । कुन्दा च बहुपुत्रा च देव्यौ तारा तथोत्तमा ॥45॥
इन्द्राः पल्योपमायुष्का देव्यस्तस्यार्धजीविकाः । एवं सर्वत्र देवीनां परिवारोऽपि पूर्ववत् ॥46॥
कालाः पिशाचा वर्णेन सुरूपाः सौम्यदर्शनाः । श्रीवाहस्तैर्विराजन्ते मणिभूषणभासुरैः ॥47॥
श्यामा भूताश्च वर्णेन चारवः प्रियदर्शनाः । आमेचकैर्विराजन्ते चित्रभक्तिविलेपनाः ॥48॥

गन्धर्वाः कनकाभासाश्चित्रमाल्यविभूषिताः । सुमुखाश्च सुरूपाश्च सर्वेषां चित्तहारिणः ॥49॥
प्रियङ्गुफलवर्णाश्च किंनरा नयनप्रियाः । सुरूपा सुमुखाश्चैते सुस्वरा हारभूषिताः ॥50॥
महास्कन्धभुजा भान्ति कालश्यामा महोरगाः । ओजस्विनः स्वरूपाश्च नानालंकारभूषिताः ॥51॥
श्यामावदाता वर्णैश्च राक्षसा भीमदर्शनाः । महाशीर्षाः सरक्तोष्ठा भुजैः कनकभूषितैः ॥52॥
वदनोरुभुजैर्भान्ति गौरा किंपुरुषा अपि । अतिचारुमुखाश्चैते शुभैर्मुकुटमौलिभिः ॥53॥
श्यामावदाता यक्षाश्च गम्भीराः सौम्यदर्शनाः । मानोन्मानयुता भान्ति रक्तपाणितलक्रमाः ॥54॥

उक्तं च त्रयम् [ त्रि. सा. 251-53 ]

किंणरकिंपुरिसा य महोरगगंधव्वजक्खणामा य । रक्खसभूयपिसाया अट्ठविहा वेंतरा देवा ॥5॥
तेसिं कमसो वण्णा पियंगुफलधवलकालयसियामं । हेमं तिसु वि सियामं किण्हं बहुलेवभूसा य ॥6॥
तेसिं असोयचंपयणागा तुंबुरु वडो य कंटतरू । तुलसी कडंबणामा चेत्ततरू होंति हु कमेण ॥7॥
कदम्बस्तु पिशाचानां राक्षसाः कण्टकद्रुमाः । भूतानां तुलसीचैत्यं यक्षाणां च वटो भवेत् ॥55॥
किंनराणामशोकः स्यात्किंपुरुषेषु च चम्पकः । महोरगाणां नागोऽपि गन्धर्वाणां च तुम्बरुः ॥56॥
पृथिवीपरिणामास्ते आयागनियुतद्रुमाः । जम्बूमानार्धमानाश्च कीर्तितास्ते प्रमाणतः ॥57॥
दिव्यरत्नविचित्रं च छत्रत्रितयमेकशः । शुभध्वजपताकास्ते विभान्त्यायागमाश्रिताः ॥58॥
तोरणानि च चत्वारि नानारत्नमयानि च । आसक्तमाल्यधामानि चैत्यानां हि चतुर्दिशम् ॥59॥
प्रत्येकं च चतस्रोऽर्चाः सौवर्ण्योऽत्र चतुर्दिशम् । भूमिजानां यथा वृक्षाः तथा वानान्तरद्रुमाः ॥60॥

४००० । १६००० ।

सामानिकसहस्राणि चत्वार्येषां पृथक् पृथक् । षोडशैव सहस्राणि तनुरक्षसुरा मताः ॥61॥
आसन्नाष्टशतं तेषां सहस्रं मध्यमोदिता । द्वादशैव शतान्येषां परिषद्बाहिरा मता ॥62॥

८०० । १००० । १२०० ।

नागा अश्वा पदातिश्च रथा गन्धर्वनर्तिकाः । वृषभाः सप्त चानीकाः सप्तकक्षायुताः पृथक् ॥63॥
सुज्येष्ठोऽथ सुग्रीवो विमला मरुदेवकः । श्रीदामो दामपूर्वश्रीर्विशालाक्षो महत्तराः ॥64॥

The seven mentioned Mahattara deities of the Anīka deities are the sujyeṣṭhā the Sugrīva, the Vimala, the Marudeva, the Śrīdāma, the Dāmaśī and the Viśālākṣa. //9.64//

सुज्येष्ठ, सुग्रीव, विमल, मरुदेव, श्रीदाम, दामश्री और विशालाक्ष; ये सात उक्त अनीक देवोंके महत्तर देव होते हैं ॥६४॥

विंशतिश्च सहस्राणि अष्टौ चाद्या पृथक् पृथक् । कक्षास्तु द्विगुणास्ताश्च द्वितीयादिषु कीर्तिताः ॥65॥

। २८००० । एकानीकाः । ३५५६००० ।

Out of these in the first class there are twenty-eight thousand deities separately for each. Further, in the second etc. classes, they have been related to be double of each successively. //9.65//

| 28000 | ekānīakāḥ | 3556000 |

इनमेंसे प्रथम कक्षामें पृथक् पृथक् अट्ठाईस हजार (२८०००) देव होते हैं। आगे द्वितीय आदि कक्षाओंमें वे उत्तरोत्तर दूने दूने बतलाये गये हैं।।६५।।

शून्यत्रिकात्परं द्वे च नवाष्टौ द्विकृतिर्द्विकम् । व्यन्तराणां निकायेषु सर्वानीका उदाहृताः ॥66॥

। २४८९२००० ।

The number of all Anīkas in the Nikāyas of the Vyantaras has been related in decimal digits as three zeros, after which two, nine, eight, square of two and two. //9.66//

| 24892000 |

व्यन्तरोंके निकायोंमेंसब अनीकोंकी संख्या तीन शून्य, तत्पश्चात् दो, नौ, आठ, दोका वर्ग अर्थात् चार और दो, इन अंकोंके प्रमाण कही गई है- २४८९२०००॥६६॥

काला कालप्रभा चैव कालकान्ता च दक्षिणा । कालावर्ताऽपरा नाम्ना कालमध्येति चोत्तरा ॥67॥

[illegible] मध्ये चतस्रोऽन्याः पूर्वाद्याशाचतुष्टये । एवं सर्वेन्द्रसंज्ञाभिः पञ्च स्युर्नगराणि हि ॥68॥

राजधान्यः पिशाचानां पञ्च प्रोक्तास्तु नामतः । जम्बूद्वीपप्रमाणाश्च चतुर्वनविभूषिताः ॥69॥

योजनानां सहस्रे द्वे नगरेभ्यो वनानि हि । नियुतायामयुक्तानि तदर्धं विस्तृतानि च ॥70॥

। १००००० । ५०००० ।

सप्तत्रिंशतमर्धं च प्राकारस्तत्र चोच्छ्रितः । द्वादशार्धं च मूलोरुर्द्वे सार्धे चाग्रविस्तृतः ॥71॥

। ३७ । १/२ । १२ । १/२ । २/५ ।

सार्धद्विषष्टिर्द्वारस्य उच्छ्रयोऽर्धा तु रुन्द्रता । पञ्चसप्ततिमुद्विद्धः प्रासादोऽत्र च भाषितः ॥72॥

६२ । १/२ । ३१ । १/४ । ७५ ।

द्वादशार्धं च दीर्घा तु षट् तुर्यं चाथ विस्तृता । योजनानि नवोद्विद्धा सुधर्मा गाधगोरुता ॥73॥

१२ । १/२ । ६ । १/४ । ६ । १ ।

द्वारं योजनविस्तारं द्विगुणोच्छ्रयमिष्यते । एवं मानानि सर्वेषु नगरेषु विभावयेत् ॥74॥

। १ । २ ।

हरितालाह्वके द्वीपे तथा हिंगुलिकेऽपि च । मनःशिलाह्वाञ्जनयोः सुवर्णे रजतेऽपि च ॥75॥

वज्रधातौ च वज्रे च इन्द्राणां नगराणि तु । नगराण्यपि शेषाणामनेकद्वीपवार्धिषु ॥76॥

भवनादित्रयाणां तु जघन्या ते(तै)जसी मता । कृष्णादित्रिकलेश्याश्च तेषां सन्तीति भाषिताः ॥77॥

अम्बा नाम्ना कराला च सुलसा च सुदर्शना । पिशाचानां निकायेषु गणिकानां महत्तराः ॥78॥

भूतकान्ता च भूता च भूतदत्ता महाभुजा । एता भूतनिकायेषु गणिकानां महत्तराः ॥79॥

सुघोषा विमला चैव सुस्वरा चाप्यनिन्दिता । गन्धर्वाणां निकायेषु गणिकानां महत्तराः ॥80॥

मधुरा मधुरालापा सुस्वरा मृदुभाषिणी । किंनराणां भवन्त्येता गणिकानां महत्तराः ॥81॥

भोगा भोगवती चैका भुजगा भुजगप्रिया । महोरगनिकायेषु गणिकानां महत्तराः ॥82॥

शर्वरी सर्वसेना च रुद्रा वै रुद्रदर्शना । राक्षसाणां भवन्त्येता गणिकानां महत्तराः ॥83॥

पुंस्प्रियाथ च पुंस्कान्ता सौम्या पुरुषदर्शिनी । एताः किंपुरुषाख्यानां गणिकानां महत्तराः ॥84॥

भद्रा नाम्ना सुभद्रा च मालिनी पद्ममालिनी । एता यक्षनिकायेषु गणिकानां महत्तराः ॥85॥

योजनानां सहस्राणि अशीतिश्चतुरुत्तरा । विपुलानि पुराण्याहुर्गणिकानामशेषतः ॥86॥

। ८४००० ।

अष्टास्वपि निकायेषु गणिकानां पुनः स्थितिम् । अर्धपल्योपमां प्राहुः पौराणिकमहर्षयः ॥87॥

दश चापोच्छ्रया एते पञ्चाहादथ साधिकात् । आहरन्ति मुहूर्तेभ्यस्तावद्भ्यो निःश्वसन्ति च ॥88॥

These Vyantara deities are ten dhanuṣas high. They take food in slightly greater than five days and take respiration in the same number of muhūrtas. //9.88//

ये व्यन्तर देव दस धनुष ऊँचे हेते हैं। वे कुछ अधिक पाँच दिनमें आहार करते हैं तथा उतने ही मुहूर्तोंमें निःश्वास लेते हैं।।८८।।

ऐशानान्ता सुराः सर्वे सप्तहस्तास्तु जन्मतः । स्वेच्छातो वैक्रियोत्सेधा ज्योतिषः सप्तचापकाः ॥89॥

उन्मार्गस्थाः शबलचरिता ये निधानप्रयाता ये चाकामाद्विषयविरताः पावकाद्यैर्मृताश्च ।
ते देवानां तिसृषु गतिषु प्राप्नुवन्ति प्रसूतिं मन्दाक्रान्ता मलिनमतिभिर्यैः कषायेन्द्रियाश्वाः ॥90॥

इति लोकविभागे मध्यमलोके व्यन्तरलोकविभागो नवमं प्रकरणं समाप्तम् ॥9।

# दशमो विभागः

वर्धमानं महावीरं मूर्ध्ना नत्वा कृताञ्जलिः । क्रमवृद्ध्योर्ध्वसाख्याढ्य मूर्ध्वलोकमितो ब्रुवे ॥1॥

ऊर्ध्वं भावनदेवेभ्यो देवा वानान्तरा स्थिताः । नीचोपपातिकास्तेभ्यस्तेभ्यो दिग्वासिनः सुराः ॥2॥

ततश्चान्तरवासाख्या वसन्तोऽपि निरन्तरम् । कूष्माण्डाश्च परं तेभ्यस्तत उत्पन्नकाः सुराः ॥3॥

अनुत्पन्नकनामानस्तत ऊर्ध्वं प्रमाणकाः । गन्धिकाश्च महागन्धा भुजगाः प्रीतिका अपि ॥4॥

आकाशोत्पन्नका नाम्ना ततो ज्योतिषिका अपि । कल्पोद्भवाः परे तेभ्यस्तेभ्यो वैमानिकाः परे ॥5॥

आद्या ग्रैवेयकास्तेष्वनुदिशानुत्तराः सुराः । द्वितीया तत ऊर्ध्वास्ते सिद्धा ऊर्ध्वं ततः स्थिताः ॥6॥

हस्तमात्रं भुवो गत्वा देवा नीचोपपातिकाः । दशवर्षसहस्राणि जीवन्तस्तत्र भाषिताः ॥7॥

। १ । १०००० ।

दशहस्तसहस्राणि तेभ्य ऊर्ध्वमतीत्य च । विंशत्यब्दसहस्राणि जीवन्त्यो नीचदेवताः ॥8॥

। २०००० ।

दशहस्तसहस्राणि तेभ्यो ह्यूर्ध्वमतीत्य च । त्रिंशदब्दसहस्राणि जीवन्त्यो नीचदेवताः ॥9॥

। ३०००० ।

दशहस्तसहस्राणि तेभ्य ऊर्ध्वमतीत्य च । चत्वारिंशत्सहस्राणि जीवन्त्यो नीचदेवताः ॥10॥

। १०००० । ४०००० ।

विंशतिं तु सहस्राणां हस्तांस्तेभ्यो व्यतीत्य च । पञ्चाशतं सहस्राणि जीवन्त्यन्यास्तु देवताः ॥11॥

। २०००० । ५०००० ।

तावत्तावद् व्यतीत्यान्याः षष्टिसप्तत्यशीति च । चतुरशीतिं सहस्राणि जीवन्त्यः सन्ति देवताः ॥12॥

। ६०००० । ७०००० । [८०००० ।] ८४०००० ।

पल्याष्टमायुषस्ताभ्यः पल्यपादायुषस्ततः । पल्योपमदलायुष्कास्ताभ्य ऊर्ध्वमतीत्य च ॥13॥

। $\frac{1}{8}$ । $\frac{1}{4}$ । $\frac{1}{2}$ ।

ज्योतिर्देवाः परे तेभ्यः पल्यं जीवन्ति साधिकम् । दशवर्षसहस्राढ्यं पल्यं जीवन्ति भास्कराः ॥14॥

। प १ व १०००० ।

Above them reside the astral deities, who are alive for a period of slightly greater than a palya. The sun astral deities are alive for a palya and ten thousand years. //10.14//

| pa 1 va 1000 |

उनके ऊपर ज्योतिषी देव रहते हैं जो कुछ अधिक पल्य प्रमाण काल तक जीवित रहते हैं। सूर्य ज्योतिषी देव दस हजार वर्षसे अधिक एक पल्य प्रमाण काल तक जीवित रहते हैं आयु १ पल्य और १०००० वर्ष।।१४।।

नियुतेनाधिकं पल्यं चन्द्रा जीवन्ति तत्परे । अयमायुःक्रमो वेद्यो देवस्थानक्रमोऽपि च ॥15॥

। प १ व १००००० ।

Above them are the moons which are alive for a palya and a lac of years. In this way, sequevce of this longevity and the order of the station of the deities should be known. //10.15//

| pa 1 va 100000 |

उनके ऊपर चन्द्र एक लाख वर्षसे अधिक एक पल्य काल तक जीवित रहते हैं। इस प्रकार यह आयुका क्रम और देवोंके स्थानका क्रम जानना चाहिये- आयु १ पल्य और १००००० वर्ष।।१५।।

द्विधा वैमानिका देवा कल्पातीताश्च कल्पजाः । कल्पा द्वादश तत्र स्युः कल्पातीतास्ततः परे ॥16॥

सौधर्मः प्रथमः कल्प ऐशानश्च ततः परः । सनत्कुमारमाहेन्द्रौ ब्रह्मलोकोऽथ लान्तवः ॥17॥

महाशुक्रः सहस्रार आनतः प्राणतोऽपि च । आरणश्चाच्युतश्चेति एते कल्पा उदाहृताः ॥18॥

उक्तं च त्रयम् [ त्रि. सा. 452-54 ]--

सोहम्मीसाणसणक्कुमारमाहिंदगा हु कप्पा हु । बम्हब्बम्हुत्तरगो लांतवकापिट्ठगो छट्ठे ॥1॥

सुक्कमहासुक्कगदो सदरसहस्सारगो दु तत्तो दु । आणदपाणदआरणअच्चुदगा होंति कप्पा हु ॥2॥

मज्झिमचउजुगलाणं पुव्वावरजुम्मगेसु सेसेसु । सव्वत्थ होंति इंदा इदि बारस होंति कप्पा हु ॥3॥

ग्रैवेयकानि च त्रीणि अधोमध्योत्तमानि तु । एकैकं च त्रिधा भिन्नमूर्ध्वमध्याधराख्यया ॥19॥

अनुदिग्नामकान्यूर्ध्वं ततोऽनुत्तरकाणि च । ऊर्ध्वलोकविभागोऽयमीषत्प्राग्भारकान्तिमः ॥20॥

विमानानां च लक्षाणि चतुरशीतिर्भवन्ति च । सप्तनवतिसहस्राणि त्रयोविंशतिरत्र च ॥21॥

। ८४९७०२३ ।

इन्द्रकाणि त्रिषष्टिः स्युरूर्ध्वपंक्त्या स्थितानि च । पटलानां च मध्यानि त्रिषष्टिः पटलान्यतः ॥22॥

। ६३ । ६३ ।

There are sixty-three discs which stand in sequence of a vertical column. At the centre of these discs thers are sixty-three indraka celestial plane. //10.22//

|63|63 |

पटल तिरेसठ (६३) हैं जो ऊर्ध्व पंक्तिके क्रमसे स्थित हैं। इन पटलोंके मध्यमें तिरेसठ (६३) इन्द्रक विमान स्थित हैं।।२२।।

त्रिंशदेकाधिका सप्तचतुर्द्व्येकैकषद्त्रिकम् । त्रिकत्रिकैकैकानि स्युरूर्ध्वलोकेन्द्रकाणि तु ॥23॥

। ३१ । ७ । ४ । २ । १ । १ । ६ । ३ । ३ । ३ । १ । १ ।

In those twelve stations at the upper universe, there are stationed the indrakas numbering thirty-one, seven, four, two, one, six, three, three, three, one and one. //10.23//

|31| 7 |4 | 2 |1 | 1 |6 |3 |3 | 3 |1 |1 |

एक अधिक तीस अर्थात् इकतीस, सात, चार, दो, एक, एक, छह, तीन, तीन, तीन, एक और एक; इस प्रकार क्रमसे ऊर्ध्व लोकगत उन बारह स्थानोंमें इतने इन्द्रक स्थित हैं- ३१, ७, ४, २, १, ६, ३, ३, ३, १, १ ।।२३।।

ऋतुरादीन्द्रकं प्रोक्तं त्रिषष्टिस्तस्य दिक्षु च । श्रेणीबद्धविमानानि एकैकोनानि चोत्तरम् ॥24॥

। ६३ ।

Out of those whatever has been said about the first Ṛtu indraka, in its east etc. directions, there are stationed in each, sixty-three sequence-bound celestial planes. Ahead of this they are successively, less by one. //10.24//

| 63 |

उनमें जो प्रथम ऋतु इन्द्रक कहा गया है उसकी पूर्वादिक दिशाओंमें तिरेसठ तिरेसठ (६३-६३) श्रेणीबद्ध विमान स्थित हैं। इसके आगे वे उत्तरोत्तर एक एक कम (६२, ६१ आदि) हैं।।२४।।

उक्तं च त्रयम् [ ति. प. 8, 83-84, 109 ]-

उडुणामे पत्तेक्कं सेढिगदा चउदिसासु बासट्ठी । एक्केक्कूणा सेसे पडिदिसमाइच्चपरियंतं ॥4॥

उडुणामे सेढिगदा एक्केक्कदिसाए होंति तेसट्ठी । एक्केक्कूणा सेसे जाव य सवत्थसिद्धि त्ति ॥5॥

सेढीबद्धे सव्वे समवट्टा विविहदिव्वरयणमया । उल्लसिदधयवडाया णिरुवमरूवा विराजंति ॥6॥

ऋतुश्चन्द्रोऽथ विमलो वल्गुवीरमथारुणम् । नन्दनं नलिनं चैव काञ्चनं रोहितं तथा ॥25॥

[illegible] च मरुतं भूयः ऋद्धीशं च त्रयोदशम् । वैडूर्यं रुचकं चापि रुचिराङ्कं च नामतः ॥26॥

स्फटिकं तपनीयं च मेघमभ्रमतः परम् । हारिद्रं पद्मसंज्ञं च लोहिताख्यं सवज्रकम् ॥27॥

नन्द्यावर्तविमानं च प्रभाकरमतः परम् । पृष्ठकं गजमित्रे च प्रभा चाद्योऽस्तु कल्पयोः ॥28॥

अञ्जनं वनमालं च नागं गरुडमित्यपि । लांगलं बलभद्रं च चक्रं च परयोरपि ॥29॥

अरिष्टं देवसमिति ब्रह्मं ब्रह्मोत्तराह्वयम् । ब्रह्मलोके च चत्वारि इन्द्रकाणीति लक्षयेत् ॥30॥

नाम्ना तु ब्रह्महृदयं लान्तवं चेति तद्द्वयम् । लान्तवे शुक्रसंज्ञं च महाशुक्रेऽभिधीयते ॥31॥

शताराख्यं सहस्रारे आनतं प्राणतं तथा । पुष्पकं शातकारं च आरणं चाच्युतं च षट् ॥32॥

आनतादिचतुष्के च ग्रैवेयेषु सुदर्शनम् । अमोघं सुप्रबुद्धं च अधस्ताद्वर्णितं त्रयम् ॥33॥

यशोधरं सुभद्रं च सुविशालं च मध्यमे । सुमनः सौमनस्यं च ऊर्ध्वे प्रीतिकरं च तत् ॥34॥

अनुदिग्मध्यमादित्यं मध्यं चानुत्तरेष्विति । सर्वार्थसिद्धिसंज्ञं च सर्वान्त्यप्रतरेन्द्रकम् ॥35॥

ये च षोडश कल्पाँश्च केचिदिच्छन्ति तन्मते । तस्मिंस्तस्मिन् विमानानां परिमाणं वदाम्यहम् ॥36॥

द्वात्रिंशन्नियुतान्याद्ये विमानगणना भवेत् । अष्टाविंशतिरैशाने तृतीये द्वादशापि च ॥37॥

। ३२००००० । २८००००० । १२००००० ।

माहेन्द्रे नियुतान्यष्टौ षण्णवत्यधिकं द्वयम् । ब्रह्मे ब्रह्मोत्तरे चापि चतुष्कं स्यात्तदूनकम् ॥38॥

। ८००००० । २०००९६ । १९९९०४ ।

द्विचत्वारिंशदग्रं च पञ्चविंशतिसहस्रकम् । लान्तवे तैः सहस्राणि पञ्चाशत्तु विना परे ॥39॥

। २५०४२ । २४९५८ ।

विंशतिः स्युः सहस्राणि शुक्रे शुद्धा च विंशतिः । चत्वारिंशत्सहस्राणि महाशुक्रे तु तैर्विना ॥40॥

। २००२० । १९९८० ।

शतारे त्रिसहस्रं स्यादेकोनापि च विंशतिः । एकाशीतिः सहस्रारे शतानां त्रिंशदेकहा ॥41॥

। ३०१९ । १९८१ [ २९८१ ] ।

चत्वारिंशानि चत्वारि शतान्यानतयुग्मके । द्वे शते षष्टिसंयुक्ते आरणाच्युतयुग्मके ॥42॥

। ४४० । २६० ।

चतुःशतानि शुद्धानि आनतप्राणतद्विके । आरणाच्युतयुग्मे च त्रिशतान्यपरे विदुः ॥43॥

। ४०० । ३०० ।

एकादशं शतं चाद्ये शतं सप्त च मध्यमे । एकाग्रनवतिश्चोर्ध्वे अनुदिक्षु नवैव च ॥44॥

। १११ । १०७ । ९ (?) । ९१ । ९ ।

अनुत्तरेषु पञ्चैव विमानगणना इमे । इत ऊर्ध्वं प्रवक्ष्यामि तेषां संख्येयकादिकम् ॥45॥

अर्चिश्च मालिनी चैव वैरं वैरोचनाख्यकम् । सोमं सोमप्रभं चाङ्कं स्फटिकादित्यनामकम् ॥46॥

अर्चिर्वैरोचनाख्यं च अर्चिमालिन्यपि क्रमात् । प्रभासापि च पूर्वाद्या आदित्यस्य चतुर्दिशम् ॥47॥

विजयं वैजयन्तं च जयन्तमपराजितम् । सर्वार्थसिद्धिसंज्ञस्य विमानस्य चतुर्दिशम् ॥48॥

चतुःशून्याब्धिषट्कं च आद्ये संख्येयविस्तृताः । विमानाश्च परे शून्यचतुष्कं शून्यषट्ककम् ॥49॥

। ६४०००० । ५६०००० ।

चत्वारिंशत्सहस्राणि तृतीये नियुतत्रयम् । षष्टिश्चैव सहस्राणि माहेन्द्रे नियुतं तथा ॥50॥

। २४०००० । १६०००० ।

संख्येयविस्तृता ब्रह्मयुग्मेऽशीतिसहस्रकम् । दशैव च सहस्राणि विज्ञेया लान्तवद्वये ॥51॥

। ८००० । १०००० ।

शुक्रद्वये सहस्राणि अष्टौ संख्येयविस्तृताः । द्वादशैव शतानि स्युः शतारद्वितये पुनः ॥52॥

। ८०००० । १२०० ।

चत्वारिंशं शतं विद्यादानतादिचतुष्टये । चतुर्गुणास्तु संख्येयाः सर्वत्रासंख्यविस्तृताः ॥53॥

असंख्यविस्तृतविमानाः । सौ २५६०००० । ऐ २२४०००० । स ९६०००० । मा ६४०००० । ब्रह्मयुग्मे ३२०००० । लान्तवद्वये ४०००० । शुक्रद्वये ३२००० । शतारद्वितये ४८०० । आन्तादिचतुष्के ५६० ।

कल्पेषु पंचमो भागो राशेः संख्येयविस्तृतः । चतुःपंचमभागाः स्युरसंख्येयकविस्तृताः ॥54॥

शतं चाष्टावसंख्येयास्त्रयः संख्येयविस्तृताः । अगण्या नवतिर्व्येका गण्याश्चाष्टादशोदिताः ॥55॥

। १०८ । ८९ । १८ ।

चतुःसप्ततिरूर्ध्वं च असंख्येया उदाहृताः । दश सप्त च संख्येया अष्टौ चासंख्यविस्तृताः ॥56॥

। ७४ । १७ । ८ ।

संख्येयमनुदिक्ष्वेकं तथैवानुत्तरेष्वपि । असंख्येयास्तु चत्वार इति सर्वज्ञदर्शनम् ॥57॥

। १ । १ ।

शून्याष्टक त्रिकं चैव नव च स्युः पुनर्नव । षडेकं च क्रमाद् ज्ञेया विमाना गणितागताः ॥58॥

। १६९९३८० ।

त्रयश्चत्वारि षट् सप्त नव सप्त षडेव च । असंख्यविस्तृता ज्ञेया विमाना सर्व एव ते ॥59॥

। ६७९७६४३ ।

शतमष्टौ सहस्राणि विंशतिः सप्तसंयुता । सर्वाण्यापि विमानानि स्थितान्यावलिकासु वै ॥60॥

। ८१२७ ।

चत्वारि च सहस्राणि चत्वार्येव शतानि च । नवतिश्चापि पञ्चाग्रा आदावावलिकास्थिताः ॥61॥

। ४४९५ ।

In the first Kalpa there are four thousand four hundred ninety-five sequence-bound celestial planes. //10.61//

। 4495 ।

प्रथम कल्पमें श्रेणीबद्ध विमान चार हजार चार सौ पंचानबै (४४९५) हैं।।६१।।

चतुर्दश शतान्येव अष्टाशीतिश्च तत्परे । षट्शतं षोडशान्यस्मिन् माहेन्द्रे त्र्यधिके शते ॥62॥

। १४८८ । ६१६ । २०३ ।

Further, there are fourteen hundred eighty-eight sequence-oudered celestial planes in the Aiśāna Kalpa, six hundred sixteen in the Sanat Kumāra Kalpa, and two hundred three celestial planes in the Māhendra Kalpa. //10.62//

। 1488 ।616 ।203 ।

आगे ऐशान कल्पमें चौदह सौ अठासी (१४८८), सनत्कुमार कल्पमें छह सौ सोलह (६१६) तथा माहेन्द्र कल्पमें दो सौ तीन (२०३) श्रेणीबद्ध विमान हैं।।६२।।

षडशीतिर्द्विशतं ब्रह्मे नवतिश्चतुरुत्तरा । ब्रह्मोत्तरे परस्मिंस्तु पञ्चविंशं शतं भवेत् ॥63॥

। २८६ । ९४ । १२५ ।

There are two hundred eighty-six sequence-ordered celestial planes in the Brahma Kalpa, ninety-four in the Brahmottara kalpa, and one hundred twenty-five sequence-ordered celestial planes in the Lāntava Kalpa. //10.63//

। 286 ।94 ।125 ।

ब्रह्म कल्पमें दो सौ छयासी (२८६), ब्रह्मोत्तर कल्पमें चौरानबै (९४) और लान्तव कल्पमें एक सौ पच्चीस (१२५) श्रेणीबद्ध विमान हैं।।६३।।

चत्वारिंशत्पुनः सैका कापित्थे शुक्रनामके । अष्टाग्रा खलु पञ्चाशन्महत्येकान्नविंशतिः ॥64॥

। ४१ । ५८ । १९ ।

शतारे पञ्चपञ्चाशदष्टादश ततः परे । पञ्चोने द्वे शते चापि बोद्धव्या आनतद्वये ॥65॥

। ५५ । १८ । १९५ ।

शतमेकान्नषष्टिश्च आरणाच्युतयुग्मके । त्रयोविंशं शतं विद्यादधस्तात्त्रिःप्रकीर्णकाः ॥66॥

। १५९ । १२३ ।

सप्ताग्रा मध्यमेऽशीतिरेकपञ्चाशदुत्तरे । अनुदिक्षु नवैव स्युः पञ्चैवानुत्तरेषु च ॥67॥

। ८७ । ५१ । ९ । ५ ।

ऋतुर्नृक्षेत्रविस्तारश्चरमो जम्बूसमस्तयोः । विशेषे रूपहीनेन्द्रकाप्ते हानिवृद्धिके ॥68॥

। ४५००००० । १००००० । हानिवृद्धि ७०९६७ । $\frac{२३}{३१}$ ।

The width of the Ṛtu indraka is forty-five lac yojanas equal to the human region width, and the width of the last Sarvārthasiddhi indraka is one lac yojanas equal to that of the Jambū island. On subetracting both mutually, the remainder by unity, resulting in the measure of decrease-increase. //10.68//

। 4500000 । 100000 । decrease-increase (hāni vṛddhi)

$$70967 \frac{23}{31}$$

ऋतु इन्द्रकका विस्तार मनुष्यक्षेत्रके बराबर पैंतालीस लाख तथा अन्तिम सर्वार्थसिद्धि इन्द्रकका विस्तार जम्बूद्वीपके प्रमाण एक लाख योजन है। उन दोनोंका परस्पर घटाकर शेषमें एक कम इन्द्रकप्रमाणका भाग देनेपर हानि वृद्धिका प्रमाण प्राप्त होता है।।६८।।

एकत्रिंशद्विमानानि श्रेणीषु चतसृष्वपि । स्वयम्भूजलधेरूर्ध्वं शेषा द्वीपाम्बुधित्रये ॥69॥

। ३१ । १६ । ८ । ४ । २ । १ । १ ।

चन्द्रे विमलवल्ग्वोश्च श्रेण्यर्धार्धं तथा परे । चूलिकां वालमात्रेण ऋतुर्न प्राप्य तिष्ठति ॥70॥

जलप्रतिष्ठिता आद्योः परयोर्वातप्रतिष्ठिताः । आ सहस्रारतो ब्रह्माज्जलवातप्रतिष्ठिताः ॥71॥

आनतादिविमानाश्च शुद्धाकाशे प्रतिष्ठिताः । अयं प्रतिष्ठानियमः सिद्धो लोकानुभावतः ॥72॥

एकविंशशतं चैकं सहस्रं च घनो द्वयोः । एकोनशतहीनं च बहला परयोर्द्वयोः ॥73॥

। ११२१ । १०२२ ।

ब्रह्मे च लान्तवे शुक्रे शतारयुगलेऽपि च । आनतादिचतुष्के च अधस्तान्मध्यमे परे ॥74॥

तावदेव क्रमाद्धीना बाहल्येन परस्परात् । एकत्रिंशं शतं रुन्द्राः परस्मिन् पटलद्वये ॥75॥

। ६२३ । ८२४ । ७२५ । ६२६ । ५२७ । ४२८ । ३२९ । २३० । १३१ ।

प्रासादा षट्छतोच्छ्रया योजनैः पूर्वकल्पयोः । ततः पंचशतोच्छ्रायाः परयोः कल्पयोर्द्वयोः ॥76॥

। ६०० । ५०० ।

ब्रह्मे च लान्तवे शुक्रे शतारे चानतादिषु । आद्ये मध्ये तथोर्ध्वे च शतार्धोनाः परस्परात् ॥77॥

। ४५० । ४०० । ३५० । ३०० । २५० । २०० । १५० । १०० ।

प्रासादा ह्यनुदिक्ष्वत्र दृष्टाः पञ्चाशदुच्छ्रयाः । अनुत्तरेषु विज्ञेयाः पञ्चविंशतिमुच्छ्रिताः ॥78॥

। ५० । २५ ।

आद्ययोः पंचवर्णास्ते कृष्णवर्ज्याः परद्वये । परयोर्नीलवर्ज्याश्च ब्रह्मलान्तवयोरपि ॥79॥

रक्तवर्ज्याश्च शुक्राख्ये सहस्रारे च भाषिताः । परतः पाण्डरा एव विमाना शंखसंनिभाः ॥80॥

व्रजन्ति तापसोत्कृष्टा आ ज्योतिषविमानतः । चरकाः सपरिव्राजा गच्छन्त्या ब्रह्मलोकतः ॥81॥

अकामनिर्जरातप्तास्तिर्यक्पंचेन्द्रियाः पुनः । अन्यपाषण्डिनश्चापि आ सहस्रारतोऽधिकाः ॥82॥

आऽच्युताच्छ्रावका यान्ति उत्कृष्टाऽऽजीवका अपि । स्त्रियः सम्यक्त्वयुक्ताश्च सच्चारित्रविभूषिताः ॥83॥

निर्ग्रन्थाः शुद्धचारित्रा ज्ञानसम्यक्त्वभूषणाः । जातरूपधराः शूरा गच्छन्ति च ततः परम् ॥84॥

आ ग्रैवेयाद् व्रजन्तीति मिथ्यादर्शनिनो मताः । ऊर्ध्वं सद्दर्शनास्तेभ्यः संयमस्था नरोत्तमाः ॥85॥

निर्ग्रन्था निरहंकारा विमुक्तमदमत्सराः । निर्मोहा निर्विकाराश्च ज्ञानध्यानपरायणाः ॥86॥

हत्वा कर्मरिपून् धीराः शुक्लध्यानासिधारया । मोक्षमक्षयसौख्याढ्यं व्रजन्ति पुरुषोत्तमाः ॥87॥

पञ्च कल्पान् विहायाद्यान् कृत्स्नपूर्वधरोद्भवः । दशपूर्वधराः कल्पान् व्रजन्त्यूर्ध्वं च संयताः ॥88॥

पञ्चेन्द्रियतिरश्चोऽपि आ सहस्रारतः सुराः । स्थावरानपि चैशानात् परतो यान्ति मानुषान् ॥89॥

सौधर्माद्यास्तु चत्वारः अष्टौ ब्रह्मादयोऽपि च । प्राणतश्चाच्युतश्चेति चिह्नवन्तश्चतुर्दश ॥90॥

वराहो मुकुटे चिह्नं मृगो महिषमीनवत् । कूर्मदर्दुरसप्तीभाश्चन्द्रः सर्पोऽथ खड्गकः ॥91॥

छागलो वृषभश्चैव विटपीन्द्रस्तथाच्युतात् । क्रमेण चिह्नानीन्द्राणां प्रोक्तान्येवं चतुर्दश ॥92॥

इन्द्रकात्तु प्रभासंज्ञाद् दक्षिणावलिकास्थितम् । अष्टादशविमानं तत् सौधर्मो यत्र देवराट् ॥93॥

सहस्राणामशीतिं च चत्वार्येव च विस्तृतम् । नगरं तत्र शक्रस्य हेमप्राकारसंवृतम् ॥94॥

। ८४००० ।

क्वचिद्दोलाध्वजैश्चित्रैश्चक्रान्दोलनपंक्तिभिः । क्वचिन्मयूरयन्त्राढ्यै(ढ्यै)र्भाजन्ते शालकोटयः ॥95॥

शतार्धमवगाढो गां तावदेव च विस्तृतः । प्राकारस्त्रिशतोच्छ्रायः प्राक्चतुःशतगोपुरम् ॥96॥

। ५० । ३०० । ४०० ।

विस्तृतानि शतं चैकं प्रांशूनि च चतुःशतम् । वज्रमूलाग्रवैडूर्यसर्वरत्नानि सर्वतः ॥97॥

। १०० । ४०० ।

षष्टिमात्रं प्रविष्टो गां ततो द्विगुणविस्तृतः । प्रासादः षट्छतोच्छ्रायः सौधर्मे स्तम्भनामकः ॥98॥

। ६० । १२० । ६०० ।

षष्ट्या देवीसहस्राणां नियुतेनैव सेवितः । नित्यप्रमुदितः शक्रः तत्रास्ते सुखसागरे ॥99॥

। १६०००० ।

पञ्चाशतं प्रविष्टा गां ततो द्विगुणविस्तृताः । प्रासादा अग्रदेवीनामष्टौ पञ्चशतोच्छ्रयाः ॥100॥

। ५० । १०० । ५०० ।

कनकश्रीरिति ख्याता देवी वल्लभिका शुभा । पूर्वस्यां शक्रतस्तस्याः प्रासादोऽत्र मनोहरः ॥101॥

उत्तरस्यां दिशायां तु प्रभायाः श्रेणिसंस्थितम् । अष्टादशविमानं तत् ईशानो यत्र देवराट् ॥102॥

सौधर्मस्येव मानेन प्रासादो नगरं तथा । अशीतिः स्यात् सहस्राणि हेममालास्य वल्लभा ॥103॥

। ८०००० ।

ऊर्ध्वं प्रभायाश्चक्राख्यमष्टमं चेन्द्रकं ततः । सनत्कुमार इन्द्रश्च दक्षिणे षोडशे स्थितः ॥104॥

योजनानि त्वसंख्यानि दक्षिणां व्यतिपत्य च । द्विसप्ततिसहस्राणि विस्तृतं प्रवरं पुरम् ॥105॥

। ७२००० ।

पंचवर्गावगाढश्च सालस्तावच्च विस्तृतः । सौवर्णः सर्वतस्तस्य प्रांशुः सार्धशतद्वयम् ॥106॥

। २५ । [ २५ ] । २५० ।

त्रिशतं गोपुराणां च प्रत्येकं द्विक्चतुष्टये । विस्तारो नवतिस्तेषामुच्छ्रयश्च शतत्रयम् ॥107॥

। ३०० । ९० । ३०० ।

शतार्धमवगाढो गां शतमेव च विस्तृतः । प्रासादोऽर्धसहस्रोच्च इन्द्रानन्दकरः शुभः ॥108॥

। ५० । १०० । ५०० ।

द्विसप्तत्या सहस्राणां देवीभिर्नित्यसेवितः । अष्टावग्रमहिष्यस्तु वल्लभा कनकप्रभा ॥109॥

। ७२००० ।

नवतिर्विस्तृतास्तासां तदर्धं च गताः क्षितौ । प्रासादाः परितस्तस्मादुच्चाः सार्धचतुःशतम् ॥110॥

। ९० । ४५ । ४५० ।

उत्तरस्यां पुनश्चक्रात् षोडशावलिकास्थितम् । माहेन्द्रनगरं रुन्द्रं सहस्राणां च सप्ततिः ॥111॥

। ७०००० ।

अष्टावग्रमहिष्यश्च देवी कनकमण्डिता । वल्लभा तस्य विख्याता तासां वेश्मानि पूर्ववत् ॥112॥

चक्राद् ब्रह्मोत्तरं चोर्ध्वं पञ्चमं दक्षिणे ततः । पुरं चतुर्दशे षष्टिं सहस्राणां च विस्तृतम् ॥113॥

। ६०००० ।

सार्धानि द्वादशागाढस्तावदेव च विस्तृतः । प्राकारो द्विशतोच्छ्रायो ब्राह्मणः पुरबाहिरः ॥114॥

। २५/२ । २५/२ । २०० ।

गोपुराणां शते द्वे च एकैकस्यां पुनर्दिशि । अशीतिं विस्तृतं वेद्यं शुभ्रं द्विशतमुच्छ्रितम् ॥115॥

। २०० । २०० ( ? ) । ८० । २०० ।

प्रासादो नवतिं रुन्द्रस्तदर्धं च क्षितौ गतः । ब्रह्मेन्द्रस्य शुभो दिव्य उच्चः सार्धचतुःशतम् ॥116॥

। ९० । ४५ । ४५० ।

अशीतिरुन्द्रा देवीनां तदर्धं च क्षितिं गताः । चतुःशतोच्छ्रयाश्चैव अष्टानामिति वर्णिताः ॥117॥

। ८० । ४० । ४०० ।

चतुस्त्रिंशत्सहस्राणि देव्यस्तं सतताश्रिताः । नीला वल्लभिका नाम्ना प्रासादोऽस्याश्च पूर्वतः ॥118॥

। ३४००० ।

उत्तरस्यां पुनः पंक्तौ इन्द्रो ब्रह्मोत्तरस्तथा । नीलोत्पलेति नाम्ना च तस्य वल्लभिकामरी ॥119॥

ब्रह्मोत्तरात्तृतीयं तु नाम्ना लान्तवमिन्द्रकम् । दक्षिणस्यां ततः पंक्तौ द्वादशे लान्तवं पुरम् ॥120॥

पञ्चाशतं सहस्राणि तद्विस्तारेण वर्णितम् । हेमसालपरिक्षिप्तं लान्तवेन्द्रमनःप्रियम् ॥121॥

। ५०००० ।

सचतुर्भागषड्गाढस्तावदेव च विस्तृतः । पञ्चाशं शतमुद्विद्धः प्राकारस्तस्य भासुरः ॥122॥

। २५/४ । ६ २५/४ , । १५० ।

गोपुराणां शतं षष्ट्या प्राच्यां सप्ततिविस्तृतम् । सषष्टिशतमुद्विद्धं दिक्षु सर्वासु लक्षयेत् ॥123॥

। १६० । ७० । १६० ।

प्रासादोऽशीतिविस्तारस्तदर्धं च क्षितिं गतः । चतुःशतोच्छ्रयो रम्यो लान्तवो यत्र देवराट् ॥124॥

। ८० । ४० । [ ४०० ] ।

प्रासादाः सप्ततिं रुन्द्रास्तदर्धं च क्षितिं गताः । उच्छ्रितास्त्रिशतं सार्धं देवीनामिति वर्णिताः ॥125॥

। ७० । ३५ । ३५० ।

सार्धैः षोडशभिः स्त्रीणां सहस्रैः परिवारितः । अष्टावग्रमहिष्यश्च पद्मा नाम्ना च वल्लभा ॥126॥

। १६५०० ।

उत्तरस्तत्र कापित्थो लान्तवेन समः स्मृतः । पद्मोत्पलेति नाम्ना च वल्लभा तस्य विश्रुता ॥127॥

लान्तवोर्ध्वं भवेच्छुक्रमिन्द्रकं दक्षिणे ततः । चत्वारिंशत्सहस्रोरुद(र्द)शमे शुक्रसत्पुरम् ॥128॥

। ४०००० ।

चतुष्कमवगाढो गां तावदेव च विस्तृतः । विंशं च शतमुच्छ्रितः प्राकारस्तस्य सर्वतः ॥129॥

। ४ । ४ । १२० ।

चत्वारिंशं शतं तस्य गोपुराणि चतुर्दिशम् । पञ्चाशतं च विस्तीर्णं चत्वारिंश-शतोच्छ्रितम् ॥130॥

। १४० । ५० । १४० ।

पञ्चत्रिंशतमागाढो विस्तृतो द्विगुणं ततः । प्रासादः शुक्रदेवस्य सार्धत्रिशतमुच्छ्रितः ॥131॥

। ३५ । ७० । ३५० ।

प्रविष्टास्त्रिंशतं भौ(भू)मौ द्विगुणं चापि विस्तृताः । प्रासादास्त्रिशतोच्छ्राया देवीनां तत्र वर्णिताः ॥132॥

। ३० । ६० । ३०० ।

लान्तवार्धं प्रिया देव्यः शुक्रस्यापि च वर्णिताः । अष्टाग्रमहिष्यश्च नन्दा तासु च वल्लभा ॥133॥

। ८२५० ।

उत्तरोऽत्र महाशुक्रो नन्दावत्यपि वल्लभा । शुक्रवत्परिवारोऽस्य नगरं च निदर्शितम् ।134॥

शुक्राच्छतारमूर्ध्वं स्यात्तस्माद्दक्षिणतो दिशि । त्रिंशत्सहस्रविस्तीर्णं शतारं पुरमष्टमे ॥135॥

। ३०००० ।

त्रियोजनं गतो भूम्यां तावदेव च विस्तृतः । प्राकारः शतमुच्छ्रितः सविंशशतगोपुरः ॥136॥

। ३ । ३ । १०० । १२० ।

चत्वारिंशत्स्वविस्तारं विंशं च शतमुच्छ्रितम् । एकैकगोपुरं विद्यात्तावन्त्येवान्यदिक्षु च ॥137॥

। ४० । १२० ।

त्रिंशतं भूमिमागाढस्तस्माद्द्विगुणविस्तृतः । प्रासादस्त्रिशतोच्छ्रायः शतारेन्द्रस्य भाषितः ॥138॥

। ३० । ६० । ३०० ।

चत्वारि च सहस्राणि पञ्चविंशं पुनः शतम् । देव्यस्तस्य समाख्याताः सुसीमेति च वल्लभा ॥139॥

। ४१२५ ।

पञ्चवर्गं प्रविष्टा गां तस्माद् द्विगुणविस्तृताः । पञ्चाशे द्वे शते चोच्चाः प्रासादास्तस्य योषिताम् ॥140॥

। २५ । ५० । २५० ।

उत्तरोऽत्र सहस्रारः शतारस्येव वर्णनम् । वल्लभा लक्ष्मणा नाम्ना देवी तस्य मनोहरा ॥141॥

शताराख्यात्तदुत्पद्य सप्तमं त्वच्युतेन्द्रकम् । दक्षिणावलिकायां च षष्ठे चारणसेवितम् ॥142॥

विंशतिं च सहस्राणि विस्तृतं त्वारणं पुरम् । द्वे सार्धे गाहविस्तारः प्राकारोऽशीतिमुच्छ्रितः ॥143॥

। २०००० । $\frac{२}{५}$ । ८० ।

गोपुराणां शतं दिक्षु त्रिंशद्विस्तारकाणि च । शतोच्छ्रितानि सर्वाणि नगरस्यारणस्य तु ॥144॥

। १०० । ३० । १०० ।

पञ्चवर्गं त(ग)तो भूमिं तस्माद्द्विगुणविस्तृतः । प्रासादश्चारणेन्द्रस्य सार्धं द्विशतमुच्छ्रितः ॥145॥

। २५ । ५० । २५० ।

द्वे सहस्रे त्रिषष्टिश्च तस्य देव्यः प्रकीर्तिताः । अष्टावग्रमहिष्यश्च जिनदत्ता च वल्लभा ॥146॥

। २०६३ ।

प्रविष्टा विंशतिं भूमिं तस्माद्द्विगुणविस्तृताः । प्रासादा द्विशतोच्छ्राया देवीनामिति वर्णिताः ॥147॥

। २० । ४० । २०० ।

देवीप्रासादमानैस्तु मता वल्लभिकालयाः । योजनानां तु विंशत्या उच्छ्रयाः केवलाधिकाः ॥148॥

। २० ।

उत्तरेऽत्राच्युतेन्द्रश्च आरणेन समो मतः । वल्लभा जिनदासीति देवी सर्वाङ्गनोत्तमा ॥149॥

उक्तं च [ त्रिलोकसार 508 ]-

सत्तपदे देवीणं गिहोदयं पणसयं तु पण्णरिणं । सव्वगिहदीहवासं उदयस्स य पञ्चमं दसमं ॥7॥

। १०० । ५० ।

सामानिकसहस्राणि अशीतिश्चतुरुत्तरा । अशीतिरेवेशानस्य तृतीयस्य द्विसप्ततिः ॥150॥

। ८४००० । ८०००० । ७२००० ।

सप्ततिः स्युर्महेन्द्रस्य षष्टिश्च परयोर्द्वयोः । पञ्चाशत्परयोश्चापि चत्वारिंशत्ततो द्वयोः ॥151॥

। ७०००० । ६०००० । ५०००० । ४०००० ।

त्रिंशदेव सहस्राणि शतारस्योत्तरस्य च । विंशतिश्चानतेन्द्रस्य तावन्त्यश्चारणस्य च ॥152॥

। ३०००० । २०००० । २०००० ।

त्रायस्त्रिंशास्त्रयस्त्रिंशदेकैकस्य तु भाषिताः । पुत्रस्थाने च ते तेषामिन्द्राणां प्रवराः सुराः ॥153॥

। ३३ ।

षट्त्रिंशच्च सहस्राणि त्रीण्येव नियुतानि च । सौधर्मस्यात्मरक्षाणां त्रीणि द्वे चायुते परे ॥154॥

। ३३६००० । ३२०००० ।

अष्टाशीतिः सहस्राणि तृतीये नियुतद्वयम अशीतिर्नियुते द्वे च माहेन्द्रस्यात्मरक्षिणाम् ॥155॥

। २८८००० । २८०००० ।

चत्वारिंशत्सहस्रोना युग्मेषु खलु पञ्चसु । अशीतिः स्युः सहस्राणि एवमारणयुग्मके ॥156॥

। २४०००० । २००००० । १६०००० । १२०००० । ८०००० । ८०००० ।

आत्मरक्षा बहीरक्षा इन्द्राणां ते चतुर्दिशम् । प्रत्येकं तच्चतुर्भागः सामानिकसमो दिशि ॥157॥

अभ्यंतराः परिषदः सहस्रं द्वादशाहतम् । ईशाने द्विसहस्रोनं तृतीये च तथा परे ॥158॥

। १२००० । १०००० । ८००० । ६००० ।

चतुर्गुणं सहस्रं तु ब्रह्मणश्चोत्तरस्य च । युग्मेषु त्रिषु शेषे च हानिरर्धार्धमिष्यते ॥159॥

। ४००० । २००० । १००० । ५०० । २५० ।

समिता परिषन्नाम्ना चन्द्रेति स्यादतः परा । द्विसहस्राधिका पूर्वाद् द्विगुणा लान्तवादिषु ॥160॥

। १४००० । १२००० । १०००० । ८००० । ६००० । ४००० । २००० । १००० । ५०० ।

द्विसहस्राधिंका भूयः प्रत्येकं बाहिरा भवेत् । शुक्राद्या द्विगुणा मध्या जतुरेषा च नामतः ॥161॥

। १६००० । १४००० । १२००० । १०००० । ८००० । ६००० । ४००० । २००० । १००० ।

पद्मा शिवा शशी चैव अंजुका रोहिणीति च । नवमी च बला चेति अर्चिनी चाष्टमी मता ॥162॥

षोडशस्त्रीसहस्राणि रूपोनानि प्रकुर्वते । अष्टावग्रमहिष्योऽपि परिवारोऽपि तत्समः ॥163॥

। १५९९९ । १५९९९ ।

द्वात्रिंशत्तु सहस्राणि सौधर्मेन्द्रस्य वल्लभाः । कनकश्रीर्मुखं चासां तावन्त्यस्तस्य योषितः ॥164॥

। ३२००० । १६०००० ।

कृष्णा च मेघराजी च रामा वै रामरक्षिता । वसुश्च वसुमित्रा च वसुरम्या वसुंधरा ॥165॥

ईशानस्याग्रपत्न्यस्ताः सौधर्मस्येव वर्णना । देवी कनकमालेति वल्लभा चास्य कीर्तिता ॥166॥

अष्टौ सहस्राण्येकस्याः परिवारोऽग्रयोषिताम् । वल्लभा अपि तावन्त्यस्तृतीयस्य द्विसप्ततिः ॥167॥

। ८००० । ७२००० ।

द्वात्रिंशत्तु सहस्राणि विक्रियाश्चैकयोषितः । अयमेव क्रमो वाच्यो माहेन्द्रस्य च योषिताम् ॥168॥

। ३२००० ।

चतुस्त्रिंशत्सहस्राणि ब्रह्मेन्द्रस्य वरस्त्रियः । वल्लभा द्वे सहस्रे च तासु देवीषु वर्णिता ॥169॥

चतुःषष्टिसहस्राणि एकस्या अपि विक्रियाः । चतुःसहस्रसंयुक्ता अग्रदेव्योऽस्य भाषिताः ॥170॥

। ४००० ।

तावन्त्य एव विज्ञेया देव्यो ब्रह्मोत्तरस्य तु । ब्रह्मवच्छेषमाख्येयं विक्रियादिषु योषिताम् ॥171॥

परिवारः सहस्रे द्वे लान्तवस्याङ्गनास्वपि । वल्लभास्तु सहस्रार्धं पूर्ववद्द्विगुणविक्रियाः ॥172॥

। १२८००० । सर्वा १६५०० ।

कापित्थे लान्तवस्येव तस्यार्धं शुक्रयोषिताः । परीवारः सहस्रं तु शते सार्धे च वल्लभाः ॥173॥

। ८२५० ।

तथैव स्यान्महाशुक्रे विक्रियाः द्विगुणा द्वयोः । अष्टावष्टौ महादेव्यः एतयोरपि भाषिताः ॥174॥

। २५६००० ।

सहस्रार्धं परीवारः शतारस्याग्रयोतिषः । पञ्चविंशं शतं चापि वल्लभास्तस्य कीर्तिताः ॥175॥

। १२५ । सर्वाः ४१२५ ।

द्विगुणा विक्रिया चात्र सहस्रारेऽपि तादृशाः । सरूपाणां पुनश्चासामर्धमानतयोषितः ॥176॥

। ५१२००० । २०६३ ।

शतद्वयं पुनः सार्धं परिवारोऽग्रयोषिताम् । त्रिषष्टिर्वल्लभा द्विगुणा विक्रिया आरणे तथा ॥177॥

। २५० । ६३ । १०२४००० ।

सौधर्मदेवीनामानि दक्षिणेन्द्राग्रयोषिताम् । ईशानदेवीनामानि उत्तरेन्द्राग्रयोषिताम् ॥178॥
षड्युग्म शेषकल्पेषु आदिमध्यान्तवर्तिनाम् । देवीनां परिषदां संख्या कथ्यते च यथाक्रमम् ॥179॥
शतानि पञ्च षट् सप्त चतुःपञ्चकषट्छतम् । शतानां त्रिचतुःपञ्च द्विकत्रिकचतुःशतम् ॥180॥

। ५०० । ६०० । ७०० । ४०० । ५०० । ६०० । ३०० । ४०० । ५०० । २०० । ३०० । ४०० ।

एकद्वित्रिशतान्येव शतार्धं च शतं शते । पञ्चवर्गश्च पञ्चाशच्छतमेकं भवेदिति ॥181॥
कालर्द्धिपरिवाराश्च विक्रिया चेन्द्रसंश्रिताः । तादृशस्तत्प्रतीन्द्रेषु त्रायस्त्रिंशसमेष्वपि ॥182॥

उक्तं च [ ति. प. 8-286 ]--

पडिइंदाणं सामाणियाण तेत्तीससुरवराणं च । दस भेदा परिवारा णियइंदसमाण पत्तेक्कं ॥8॥
वृषभास्तुरगाश्चैव रथा नागाः पदातयः । गन्धर्वा नर्तिकाश्चेति सप्तानीकानि चक्षते ॥183॥
पुरुषाः षडनीकानि सप्तमं नर्तिकास्त्रियः । सेनामहत्तरा षट् स्युरेका सेनामहत्तरी ॥184॥
दामेष्टिर्हरिदामा च मातल्यैरावतौ ततः । वायुश्चारिष्टकीर्तिश्च अग्रा नीलाञ्जनापि च ॥185॥
महादामेष्टिनामा च नाम्नामितगतिस्तथा । मन्थरो रथपूर्वश्च पुष्पदन्तस्तथैव च ॥186॥
पराक्रमो लघुपूर्वश्च नाम्ना गीतरतिस्तथा । महासेना क्रमेणैते ईशानानीकमुख्यकाः ॥187॥
पूर्वोक्तानीकमुख्यास्ते दक्षिणेन्द्रेषु कीर्तिताः । अपरोक्तानीकमुख्यास्ते चोत्तरेन्द्रेषु वर्णिताः ॥188॥
सप्तकक्षं भवेदेकं कक्षाः पंचाशदेकहा । अशीतिश्चतुरग्रा च सहस्राण्यादिमाः पृथक् ॥189॥

। ४६ । ८४००० ।

Out of the above mentioned seven Anīkas, every one has seven classes. In this way, out of those seven AnṬkas, there are fifty as reduced by unity classes. The mesasure of the separate first elass of seven AnṬkas of Saudharma Indra is eighty-four thousand. //10.189//

। 49 । 84000 ।

उपर्युक्त सात अनीकोंमेंसे प्रत्येक सात कक्षाओंसे सहित होती है। इस प्रकार उन सात अनीकोंमें एक कम पचास (४६) कक्षायें होती हैं। सौधर्म इन्द्रकी सात अनीकोंकी पृथक् पृथक् प्रथम कक्षाका प्रमाण चौरासी हजार (८४०००) है।।१८६।।

क्रमेण द्विगुणाः कक्षाः सर्वासामपि संग्रहः । त्रीणि शून्यानि षट्सप्तषट्चतुःसप्तकानि च ॥190॥

The measure of its secone-third etc. classes has gone doubling successively and respectively. // 10.190//

उसकी दूसरी तीसरी आदि कक्षाओंका प्रमाण क्रमशः उत्तरोत्तर इससे दूना होता गया है। सौधर्म इन्द्रकी सब (४६) कक्षाओंका प्रमाण अंकक्रमसे तीन शून्य, छह, सात, छह, चार और सात (७४६७६०००) इतना है।।१६०।।

शेषाणामाद्यकक्षाश्च स्वसामानिकसंख्यकाः । क्रमेण द्विगुणाः कक्षाः संग्रहं तासु लक्षयेत् ॥191॥
परं शून्यचतुष्कात्तु द्वे चैकैकं च सप्त च । शून्यत्रिकात्पुनश्चाष्टौ खखचत्वारि षट् तथा ॥1192॥
चतुर्भ्य ऊर्ध्वं शून्येभ्यस्त्रीणि द्वे द्वे पुनश्च षट् । ब्रह्मे चत्वारि च त्रीणि त्रीणि पंच तथोत्तरे ॥193॥
पंच चत्वारि चत्वारि चत्वारि च पुनर्द्वयोः । षट् पंच पंच च त्रीणि शुक्रयुग्मे भवन्ति च ॥194॥

सप्त षद् षड् द्विकं चैव शतारद्वितये पुनः । अष्ट सप्त च सप्तैकमानतादिचतुष्टये ॥195॥

| | प्रथमानीक संख्या | एकानीक संख्या | सर्वानीक संख्या |
|---|---|---|---|
| | ८४००० | १०६६८००० | ७४६७६००० |
| | ८०००० | १०१६०००० | ७११२०००० |
| | ७२००० | ६१४४००० | ६४००८००० |
| श्लोकसप्तकरचना-- | ७०००० | ८८६०००० | ६२२३०००० |
| | ६०००० | ७६२०००० | ५३३४०००० |
| | ५०००० | ६३५०००० | ४४४५०००० |
| | ४०००० | ५०८०००० | ३५५६०००० |
| | ३०००० | ३८१०००० | २६६७०००० |
| | २०००० | २५४०००० | १७७८०००० |

| | prathmānīka saṁkhyā | ekānīka saṁkhyā | sarvānīka saṁkhyā |
|---|---|---|---|
| | 84000 | 10668000 | 74676000 |
| śloka | 80000 | 10160000 | 71120000 |
| sapta | 72000 | 91440000 | 64008000 |
| racanā | 70000 | 8890000 | 62230000 |
| | 60000 | 7620000 | 53340000 |
| | 50000 | 6350000 | 44450000 |
| | 40000 | 5080000 | 35560000 |
| | 30000 | 3810000 | 26670000 |
| | 20000 | 2540000 | 17780000 |

[Note: vv., 189-195 contain the above]

सोमो यमश्च वरुणः कुबेरश्चेति लोकपाः । एकैकस्य तु चत्वारः पूर्वाद्ये दिक्चतुष्टये ॥196॥

तुल्यर्द्धयः सोमयमाः दक्षिणेन्द्रेषु कीर्तिताः । अधिका वरुणास्तेभ्यः कुबेरा अधिकास्ततः ॥197॥

महर्द्धिकास्तु वरुणा उत्तरेन्द्रेषु भाषिताः । तेभ्यो हीनाः कुबेराः स्युस्तेभ्यो हीनाः समाः परे ॥198॥

प्रत्येकं लोकपालानां स्त्रीसहस्रं चतुर्गुणम् । सामानिकाश्च तावन्तो देव्य एषां च पूर्ववत् ॥199॥

। ४००० । ४०० ( ? ) । ४००० ।

सहस्रं परयोर्देव्यस्ताभिः सामानिकाः समाः । तेषामप्येकशो देव्यस्तावन्त्य इति भाषिताः ॥200॥

। १००० । १००० ।

ब्रह्मयुग्मे सहस्रार्धं देव्यः सामानिका अपि । तदर्धं परयोर्देव्यः सामानिकचतुःशतम् ॥201॥

। ५०० । ५०० । २५० । ४०० ।

पञ्चविंशं शतं देव्यः शुक्रयुग्मे च भाषिताः । एकशो लोकपालानां सामानिकशतत्रयम् ॥202॥

। १५५ [१२५] । ३०० ।

शतारे सोत्तरे देव्यस्त्रिषष्टिर्लोकरक्षिणाम् । सामानिकाश्च तेषां स्युः शुक्रमेव शतद्वयम् ॥203॥

। ६३ । २०० ।

आनते त्वारणे देव्यो द्वात्रिंशल्लोकरक्षिणाम् । सामानिकशतं चैकमेकैकस्येति निर्दिशेत् ॥204॥

। ३२ । १०० ।

लोकपालसुरस्त्रीभिः समाः सामानिकस्त्रियः । द्व्यानामग्रदेव्यश्च चतस्रोऽप्येकशो मताः ॥205॥

सौधर्मे सोमयमयोस्तयोः सामानिकेष्वपि । पञ्चाशदन्तःपरिषच्चतुःपञ्चशते परे ॥206॥

वरुणस्य समानां च षष्टिः पञ्चशतानि च । षट्छतानि च वेद्यानि ईशानेऽपि तथा द्वयोः ॥207॥

कुबेरस्य समानां च सप्ततिः षट्छतानि च । गणिताः परिषद्देवा बाह्याः सप्तशतानि च ॥208॥

दक्षिणे वरुणस्योक्ताः कुबेरस्योत्तरस्य ताः । कुबेरस्य च याः प्रोक्ता वरुणस्योत्तरस्य ताः ॥209॥

| | सोम-यम | वरुण | कुबेर | सोम-यम | वरुण | कुबेर |
|---|---|---|---|---|---|---|
| चतुःश्लोक- | सौ ५० | सौ ६० | सौ ७० | ई ५० | ७० | ६० |
| रचना - | ४०० | ५०० | ६०० | ४०० | ६०० | ५०० |
| | ५०० | ६०० | ७०० | ५०० | ७०० | ६०० |

तथैव सर्वकल्पेषु आच्युताल्लोकरक्षिणाम् । ज्ञातव्याः परिषद्देवा इत्याचार्यैरभीप्सितम् ॥210॥

विंशतिश्चाष्टसंयुक्ता सहस्राणां पृथग्मताः । सप्तानीकाद्यकक्षाणां द्विगुणाश्च क्रमोत्तराः ॥211॥

एवं सर्वेषु कल्पेषु सर्वेषां लोकरक्षिणाम् । संख्यातव्यान्यनीकानि पौराणिकमहर्षिभिः ॥212॥

शक्रयोः सोमयमयोस्तयोः सामानिकेष्वपि । आयुः पल्यद्वयं सार्धं तदर्धं खलु योषिताम् ॥213॥

। ५/२ । ५/४ ।

The longevity of the two universe-guard (Lokapāla), Soma and Yama of Saudharma Indra and that of their Sāmānika deties is two and a half palya alone. The longevity of their wives is half of that, as should be known. //10.213//

$$\frac{5}{2}\ \frac{5}{4}$$

सौधर्म इन्द्रके सोम और यम इन दो लोकपालों तथा उनके सामानिक देवोंकी भी आयु अढ़ाई (२ १/२) पल्य मात्र होती है। उनकी स्त्रियोंकी आयु उससे आधी (१ १/४) पल्य जानना चाहिये।।२१३।।

द्वादशाहात् पुनः सार्धान्मनसाहारसेवनम् । मुहूर्तेभ्यश्च तावद्भ्यस्तेषामुच्छ्वसनं मतम् ॥214॥

। २५/२ । २५/२ ।

The lokapālas of Saudharma Indra take mental food in twelve and half days. Their respiration has been regarded in the same number of muhūrta. //10.214//

$$\frac{25}{2}\ \frac{25}{2}$$

सौधर्म इन्द्रके लोकपाल साढ़े बारह (१२ १/२) दिनमें मानसिक आहारका उपभोग करते हैं। इतने (१२ १/२) ही मुहूर्तोंमें उसका उच्छ्वास लेना माना गया है।।२१४।।

षड्हात्पादसंयुक्ताद्देव्याहारनिषेवणम् । मुहूर्तेभ्यश्च तावद्भ्यस्तासामुच्छ्वसनक्षणम् ॥215॥

। २५/४ । २५/४ ।

Their female deities take food in six and a quanter days and they take respiration in the same number of muhūrtas. //10.215//

25/4 25/4

उनकी देवियाँ सवा छह (६ १/४) दिनमें आहारका सेवन करती हैं तथा उतने (६ १/४) ही मुहूर्तोंमें वे उच्छ्वास लेती हैं।।२१५।।

वरुणस्य समानां च न्यूनपल्यत्रयं भवेत् । देशोनपक्षादाहारः श्वासस्तावन्मुहूर्तकैः ॥216॥

। ३ । दि १५ । मु १५ ।

एतेषामपि देवीनां सार्धपल्यायुरूनकम् । आहारो न्यूनपक्षार्धाच्छ्वासस्तावन्मुहूर्तकैः ॥217॥

। ३/२ । दि १५/२ । मु १५/२ ।

कुबेरस्य समानां च स्त्रीणां च वरुणक्रमम् । किंतु संपूर्णमाख्येयं श्वासाहारायुषां स्थितम् ॥218॥

समसोमयमानां च ऐशानायुस्त्रिपल्यकम् । न्यूनपक्षात्तथाहारः श्वासस्तावन्मुहूर्तकैः ॥219॥

। ३ । दि १५ । मु १५ ।

सार्धपल्यायुषो देव्यः सार्धसप्ताहभुक्तयः । श्वासस्तावन्मुहूर्तैश्च त्रयं देशोनमेव तत् ॥220॥

। प ३/२ । दि १५/२ । मु १५/२ ।

कुबेरस्य समानां च देवीनामपि सोमवत् । संपूर्णं वरुणानां तु सातिरेकं त्रयं भवेत् ॥221॥

अच्युतात्तु त्रिवर्गस्य पूर्वतः पूर्वतः क्रमात् । वर्धयेत्पल्यमेकैकं जीवितेषु विशारदः ॥222॥

सामानिकप्रतीन्द्राणां त्रायस्त्रिंशेन्द्रसंज्ञिनाम् । देव्यः षष्टिसहस्राणि नियुतं चादिकल्पयोः ॥223॥

। १६०००० ।

शतानि पञ्च षट् सप्त देव्यः परिषदामपि । आसन्नमध्यबाह्यानां यथासंख्यं विभाजयेत् ॥224॥

। ५०० । ६०० । ७०० ।

सेनामहत्तराणां च तथा ह्यात्मरक्षिणाम् । षट्छतानि त्वनीकानां द्वे शते वाहनेष्वपि ॥225॥

। ६०० । २०० ।

जघन्यमायुः पल्यं स्यादुत्कृष्टं सागरद्वयम् । सौधर्मोत्पन्नदेवानामैशाने तत्तु साधिकम् ॥226॥

। १ । २ ।

In the Saudharama Kalpa, the born deities have a minimal longevity of one palya and a maximal longevity of two palyas. The deities born in the Aiśāna Kalpa have their longevity slightly greater than this. //10.226//

1 I 2 I

सौधर्म कल्पमें उत्पन्न हुए देवोंकी जघन्य आयु एक (१) पल्य और उत्कृष्ट दो (२) सागर प्रमाण होती है। ऐशान कल्पमें उत्पन्न हुए देवोंकी वह आयु इससे कुछ अधिक होती है।।२२६।।

समासहस्रद्वयेन आहारेच्छा च जायते । पक्षद्वयेन चोच्छ्‌वासः सागरद्वयजीविनाम् ।।227।।

। २००० ।

Those deities who have longevity of two sāgaras, they have wish to take food in two thousand years, and their resperation period is two weeks. //10.227//

2000 I

जिन देवोंकी आयु दो सागर प्रमाण होती है उनको दो हजार (२०००) वर्षोंमें भोजनकी इच्छा होती है तथा दो पक्षोंमें उच्छ्‌वास होता है।।२२७।।

एकं वर्षसहस्रं स्यादाहारे कालनिर्णयः । उच्छ्‌वासस्यैकपक्षश्च एकसागरजीविनाम् ।।228।।

। १००० । १ ।

Those deities who have longevity of one sāgara, they have wish to take food in one thousand years, and their resperation period is one week. //10.228//

1000 I 1 I

जिन देवोंकी आयु एक (१) सागर प्रमाण है उनके आहार कालका प्रमाण एक हजार (१०००) वर्ष तथा उच्छ्‌वासकालका प्रमाण एक पक्ष (१५) दिन निश्चित है।।२२८।।

सागरोपमसंख्याभिर्गुणयेत् क्रमतः परम् । आहारोच्छ्‌वासकालानामेवं संख्यानमिष्यते ।।229।।

Further, this food-period and respiration-period be multiplied respectively by the numbar of Sāgaropamas. In this way, the mentioned period is known in the kalpas ahead. //10.229//

आगे इस आहारकाल और उच्छ्‌वास कालको क्रमसे सागरोपमोंकी संख्यासे गुणित करना चाहिये। इस प्रकारसे आगेके कल्पोंमें उक्त काल जाना जाता है। जैसे- सनत्कुमार कल्पमें आयुका प्रमाण चूँकि सात सागर है, इसलिये वहाँ आहारकालका प्रमाण सात हजार वर्ष और उच्छ्‌वासकालका प्रमाण सात पक्ष समझना चाहिये।।२२९।।

सप्त सानत्कुमारे स्युर्दश ब्रह्मे चतुर्दश । लान्तवे द्व्यधिकाः शुक्रे शतारेऽष्टादशैव च ।।230।।

। ७ । १० । १४ । १६ । १८ ।

विंशतिश्चानते वेद्या द्व्यधिका सैव चारणे । एकैकवृद्धिः परत एकादशसु भाषिता ।।231।।

। २० । २२ । २३ । २४ । २५ । २६ । २७ । २८ । २९ । ३० । ३१ । ३२ । ३३ ।

उत्कृष्टमायुर्देवानां पूर्वं साधिकमल्पकम् । अनुत्तरेषु द्वात्रिंशत्त्रयस्त्रिंशत्तथाधिकम् ।।232।।

। ३२ । ३३ ।

सर्वार्थेऽल्पं च दीर्घं च त्रयस्त्रिंशत्तु सागराः । एवमायूंषि देवानां सौधर्मादिषु कल्पयेत् ।।233।।

। ३३ ।

सर्वार्थायुर्यदुत्कृष्टं तदेवास्मिँस्ततः पुनः । पल्यासंख्येयभागोनमिच्छन्त्येकेऽल्पजीवितम् ।।234।।

त्रायस्त्रिंशत्प्रतीन्द्रेन्द्रसामानिकचतुष्टये । आद्ययोः कल्पयोराहुः साधिकं सागरद्वयम् ।।235।।

परतः क्रमशो वृद्धिरासर्वार्थादुदाहृता । कल्पराजाहमिन्द्राणां सव सामानिकादिषु ॥236॥

पञ्च चत्वारि च त्रीणि अन्तःपरिषदादिषु । पल्यान्यर्धद्वयं चैव सेनान्यात्माभिरक्षिणाम् ॥237॥

। ५ । ४ । ३ ।

अनीकानीकपत्राणा (?) मेकपल्यं तु साधिकम् । आद्ययोः कल्पयोरेवं क्रमात्पल्योत्तरं परम् ॥238॥

आद्ययोः साधिकं पल्यं देवीनामायुरल्पकम् । पञ्चपल्यं महत्पूर्व ऐशाने सप्तपल्यकम् ॥239॥

साधिकं सप्तपल्यं स्यात्तृतीये ह्रस्वजीवितम् । अधिकं नवपल्यं तु देवीनां तत्र जीवितम् ॥240॥

साधिकं पूर्वमुत्कृष्टमुत्तरे ह्रस्वजीवितम् । तद् द्विपल्याधिकं भूयस्तत्रैवोत्कृष्टमुच्यते ॥241॥

एवं यावत्सहस्रारं ततः सप्ताधिकं भवेत् । अच्युते पञ्चपञ्चाशत्पल्यानां योषितां स्थितिः ॥242॥

चतुःश्लोक रचना- । ज १ ज १ । उ ५ उ ७ । ६ ११ । १३ १५ । १७ १६ । २१ २३ । २५ २७ । ३४ ४१ । ४८ ५५।

योजनानां शतं दीर्घा तदर्धं चापि विस्तृता । पञ्चसप्ततिमुद्विद्धा सुधर्मेति सभा शुभा ॥243॥

अष्टयोजनविस्तारैर्द्वारैस्तद्द्विगुणोच्छ्रयैः । रत्नचित्रस्त्रिभिर्युक्ता वेदिकातोरणोज्ज्वला ॥244॥

प्रासादाद्देवराजस्य पूर्वोत्तरदिशि स्थिता । उपपातसभा चात्र सिद्धायतनमेव च ॥245॥

मणिमुक्तेन्द्रनीलैश्च महानीलजलप्रभैः । चन्द्र शुक्रप्रभैश्चापि वैडूर्यकनकप्रभैः ॥246॥

कर्केतनांकसूर्याभैः सुवर्णरजतैः शुभैः । प्रवालवज्रमुख्यैश्च प्रासादाः साधु मण्डिताः ॥247॥

नानामणिमयस्तम्भवेदिकाद्वारतोरणाः । ज्वालार्धचन्द्रचित्राश्च प्रासादाः विविधाः स्मृताः ॥248॥

मुक्ताजालैः सलम्बूषैर्माल्यजालैः सुगन्धिभिः । हेमजालैः सुरत्नैश्च विराजन्ते मनोरमैः ॥249॥

नानापुष्पप्रकीर्णासु रत्नचित्रासु भूमिषु । देशे देशे मनोज्ञानि वरशय्यासनानि च ॥250॥

उद्यानान्युपसन्नानि सर्वर्तुकुसुमैर्द्रुमैः । वाप्यश्च पुष्करिण्यश्च छन्नाः पद्मोत्पलैरपि ॥251॥

तूर्यगन्धर्वगीतानां शुभाः शब्दाः मनोरमाः । रूपाणि कान्तसौम्यानि गन्धाः सुरभयस्तथा ॥252॥

रसाः परमसुस्वादाः स्पर्शा गात्रसुखावहाः । सर्वकामगुणोपेतो नित्योद्द्योतः सुरालयः ॥253॥

तत्र सिंहासने दिव्ये सर्वरत्नमये शुभे । स्वैरं निषण्णो विस्तीर्णे जयशब्दाभिनन्दितः ॥254॥

वृत्तः सामानिकैर्देवैस्त्रायस्त्रिशैस्तथैव च । सुखासनस्थैः श्रीमद्भिस्तन्मुखोन्मुखदृष्टिभिः ॥255॥

चित्रभद्रासनस्थाभिर्वामदक्षिणपार्श्वयोः । संक्रीडयमानो देवीभिः क्रीडारतिपरायणः ॥256॥

तत्र योजनविस्तीर्णः षट्कृतिं च समुच्छ्रितः । स्तम्भो गोरुतविस्तारधाराद्वादशसंयुतः ॥257॥

वज्रमूर्तिः सपीठोस्मिन् क्रोशतत्पाददीर्घकः । व्यासाश्च रत्नशिक्यस्थास्तिष्ठन्ति च समुद्गकाः ॥258॥

। १ । $\frac{१}{४}$ ।

सक्रोशानि हि षट् तूर्ध्वं योजनान्यसमुद्गकाः । क्रोशन्यूनानि तावन्ति अधश्चाप्यसमुद्गकाः ॥259॥

। $\frac{२५}{४}$ । $\frac{२३}{४}$ ।

जिनानां रुच्यकास्तेषु सुरैः स्थापितपूजिताः । भारतैरावतेशानां सौधर्मैशानयोर्द्वयोः ॥260॥

पूर्वापरविदेहेषु जिनानां रुच्यकाः पुनः । सनत्कुमारमाहेन्द्रकल्पयोर्न्यस्तपूजिताः ॥261॥

न्यग्रोधाः प्रतिकल्पं च आयागाः पादपाः शुभाः । जम्बूमानाश्चतुःपार्श्वे पल्यंकप्रतिमायुताः ॥262॥

उक्तं च (ति. प. 8,405-6)

सयलिंदमंदिराणं पुरदो णग्गोहपायवा होंति । एक्केक्कं पुढविमया पुव्वोदिदजंबुदुमसरिसा ॥9॥

तम्मूले एक्केक्का जिणिंदपडिमा य पडिदिसं होंति । सक्कादिणमियचलणा सुमरणमेत्ते वि दुरिदहरा ॥10॥

सौधर्मे व सभैशाने शेषेन्द्राणां सभास्तथा । उपपातसभाश्चैव अर्हदायतनानि च ॥263॥

शतार्धयामविस्तीर्णाः पुरस्तान्मुखमण्डपाः । वेदिकाभिः परिक्षिप्ता नानारत्नशतोज्ज्वलाः ॥264॥

। १०० । ५० ।

सामानिकादिभिः सार्धम् इन्द्राः पर्वसु सादराः । पूजयन्त्यर्हतां तेषु कथाभिरपि चासते ॥265॥

कल्पेषु परतश्चापि सिद्धायतनवर्णना । आयागाः खलु कल्पेषु सभा ग्रैवेयतः स्मृताः ॥266॥

योजनाष्टकमुद्विद्धा तावदेव च विस्तृता । उपपातसभेन्द्राणां त्रायस्त्रिंशवतां स्मृताः ॥267॥

अशोकं सप्तपर्णं च चम्पकं चूतमेव च । पूर्वाद्यानि वनान्याहुर्देवराजबहिःपुरात् ॥268॥

आयतानि सहस्रं च तदर्धं विस्तृतान्यपि । प्राकारः परितस्तेषां मध्ये चैत्यद्रुमा अपि ॥269॥

। १००० । ५०० ।

अर्हतां प्रतिबिम्बानि जाम्बूनदमयानि च । तेषां चतुर्षु पार्श्वेषु निषण्णानि चकासते ॥270॥

वालुकं पुष्पकं चैव सौमनस्यं ततः परम् । श्रीवृक्षं सर्वतोभद्रं प्रीतिकृद्रम्यकं तथा ॥271॥

मनोहरविमानं च अर्चिमाली च नामतः । विमलं च विमानानि यानकानीति लक्षयेत् ॥272॥

नियुतव्याससदीर्घाणि वैक्रियाणीतराणि च । वैक्रियाणि विनाशीनि स्वभावानि ध्रुवाणि च ॥273॥

सौधर्मादिचतुष्के च ब्रह्मादिषु तथा क्रमात् । आनतारणयोश्चैव उक्तान्येतानि योजयेत् ॥274॥

उक्तं च [ ति. प. 8-441 ]

सोहम्मादिचउक्के कमसो अवसेसछक्कजुगलेसु । होंति उ पुव्वुत्ताइं याणविमाणाणि पत्तेयं ॥11॥

शस्त्रभाजनवस्त्राणि बहुधा भूषणानि च । पार्थिवानि ध्रुवाण्येव वैक्रियाण्यध्रुवाणि तु ॥275॥

इन्द्राणां कल्पनामानि विमानानि प्रचक्षते । चतुर्दिशं तु चत्वारि तेषां वेद्यानि नामभिः ॥276॥

वैडूर्यं रजतं चैव अशोकमिति पश्चिमम् । मृषत्कसारमन्त्यं च दक्षिणेन्द्राधिवासतः ॥277॥

रुचकं मन्दराख्यं च अशोकं सप्तपर्णकम् । उत्तरेन्द्राधिवासेभ्यः कीर्तितानि चतुर्दिशम् ॥278॥

दक्षिणे लोकपालानां नामान्युक्तानि मन्दरे । तान्येषां वै विमानानि त्रिषु कल्पेषु कल्पयेत् ॥279॥

उक्तं च [ ति. प. 8-300 ]-

होदि दु सयंपहक्खं वरजेट्ठसयंजणाणि वग्गू य । ताण पहाणविमाणा सेसेसुं दक्खिणिंदेसुं ॥12॥

सौम्यं च सर्वतोभद्रं समितं शुभमित्यपि । उत्तरे लोकपलानां संज्ञाः कल्पद्वये मताः ॥280॥

उक्तं च [ ति. प. 8, 301-2 ]-

सोम्मं सव्वदभद्दा सुभद्दसमिदाणि सोमपहुदीणं । होंति पहाणविमाणा सव्वेसिं उत्तरिंदाणं ॥13॥

ताणं विमाणसंखा उवएसो णत्थि कालदोसेण । ते सव्वे वि दिगिंदा तेसु विमाणेसु कीडंति ॥14॥

काम्या च कामिनी पद्मगन्धालम्बूषसंज्ञका । चतस्र ऊर्ध्वलोके तु गणिकानां महत्तराः ॥281॥

उक्तं च [ ति. प. 8-435 ]-

गणियामहत्तरीणं समचउरस्सा पुरीओ विदिसासुं । एक्कं जोयणलक्खं पत्तेक्कं दीहवासजुदा ॥15॥

। १००००० ।

...युषस्त्वाद्ये द्वितीये सप्तजीविताः । स्थितिरेवं गणिकानां ज्ञेया कन्दर्पा अपि चाद्ययोः ॥282॥

। ५ । ७ ।

आ लान्तवात् किल्विषकाः आभियोग्यास्तथाच्युतात् । जघन्यस्थितयश्चैते स्वे स्वे कल्पे समीरिताः ॥283॥

द्विद्विकत्रिचतुष्केषु शरीरस्पर्शरूपकः । शब्दचित्तप्रवीचारा अप्रवीचारकाः परे ॥284॥

आद्ययोः सप्तहस्तोच्चाः परयोः षट्कहस्तकाः । पञ्चरत्निप्रमाणाश्च ब्रह्मलान्तवयोः सुराः ॥285॥

शुक्रदेवाश्चतुर्हस्ता सहस्रारे तथैव च । त्रिहस्ता आनताद्येषु ग्रैवेयेषु द्विहस्तकाः ॥286॥

। ४ । ३ । [२] ।

अनुत्तरानुदिग्देवा सार्धरत्निप्रमाणकाः । एकहस्तप्रमाणास्तु सर्वार्थे सुरसत्तमाः ॥287॥

। $\frac{१}{२}$ । (?)

उक्तं च [ त्रि. 543 ]-

दुसु दुसु चदु दुसु दुसु चउ तित्तिसु सेसेसु देहउच्छेहो । रयणीण सत्तछप्पण चत्तारि दलेण हीणकमा ॥16॥

। ७ । ६ । ५ । ४ । $\frac{७}{२}$ । ३ । $\frac{५}{२}$ । २ । $\frac{३}{२}$ । १ ।

ऋतुप्रभृतिदेवानां तेजोलेश्या विवर्धते । आ प्रभायाः शताराच्च पद्मातस्त्रिषु वर्धते ॥288॥

आनतादूर्ध्वमूर्ध्वं च आ सर्वार्थविमानतः । प्रस्तरे प्रस्तरे लेश्या शुक्ला देवेषु वर्धते ॥288॥

उक्तं च [ ] -

द्वयोर्द्वयोश्च षट्के च द्वयोस्त्रयोदशस्वपि । चतुर्दशविमानेषु त्रिदशानां यथाक्रमम् ॥17॥

पीता च पीतपद्मा च पद्मा वै पद्मशुक्लका । शुक्ला परमशुक्ला च लेश्याः स्युरिति निश्चिताः ॥18॥

आद्ययोः कल्पयोर्देवा आ घर्माया विकुर्वते । परयोरा द्वितीयाया आ शैलायाश्चतुर्ष्वपि ॥290॥

देवाः शुक्रचतुष्के च आ चतुर्थात्सविक्रियाः । आनतादिषु देवाश्च आ पञ्चम्या इतीष्यते ॥291॥

ग्रैवेयकास्तथा षष्ठ्या आ सप्तम्यास्ततः परे । दर्शनं चावधिज्ञानं विक्रियेवाथ इष्यते ॥292॥

अनन्तभागं मूर्तीनां जीवानपि सकर्मकान् । समस्तां लोकनालिं च प्रेक्षन्तेऽनुत्तरामराः ॥293॥

आऽऽरणाद्दक्षिणस्थानां देवानां हि वराङ्गनाः । सौधर्म एव जायन्ते जाता यान्ति स्वमास्पदम् ॥294॥

तथोत्तरेषां देवानां देव्यो ~~स्म~~ आऽच्युतान्मताः । ता ऐशाने जनित्वा तु प्रयान्ति स्वं स्वमालयम् ॥295॥

नियुतानि विमानानि षट् सौधर्मगतानि हि । देवीभिरेव पूर्णानि चत्वार्यैशाननामनि ॥296॥

। ६००००० । ४००००० ।

शेषाणि तु विमानानि तयोरुक्तानि कल्पयोः । देवीभिः सह देवैस्तु मिश्रैः पूर्णानि लक्षयेत् ॥297॥

षट्चतुष्कमुहूर्ताः स्युरैशानाज्जननान्तरम् । च्यवनान्तरमप्येवं जघन्यात्समयोऽपि च ॥298॥

। २४ ।

द्वे शते नवतिश्चैव शतानि त्रीणि सप्ततिः । तृतीये च मुहूर्ताः स्युर्माहेन्द्रेऽपि च भाषिताः ॥299॥

द्वाविंशतिरथार्धं च दिनानां ब्रह्मनामनि । चत्वारिंशच्च पञ्चापि अहोरात्राणि लान्तवे ॥300॥

। ४५/२ । ४५ ।

अशीतिर्दिवसाः शुक्रे शतारे शतमेव तु । आनतादिचतुष्केऽपि संख्येयाब्दशतानि वै ॥301॥

। ८० । १०० । व १०० ।

संख्येयाब्दसहस्राणि ग्रैवेयेष्वन्तरं मतम् । पल्यासंख्येयभागस्तु वनुदिशानुत्तरेपि च ॥302॥

। व १००० । १ । ५ ।

सप्ताहपक्षमासाश्च मासौ मासचतुष्टयम् । षण्मासं चान्तरं जातौ तदेव च्यवनान्तरम् ॥303॥

। दि ७ । १५ । मा १ ।

ऐशानान्ते समाहेन्द्रे कापित्थान्ते च योजयेत् । सहस्रारेऽच्युतान्ते च शेषेषु च यथाक्रमम् ॥304॥

इन्द्राणां विरहः कालो जघन्यः समयो मतः । उत्कृष्टोऽपि च षण्मासं तथैवाग्र्याङ्गनास्वपि ॥305॥

त्रायस्त्रिंशसमानानां पारिषद्यात्मरक्षिणाम् । उत्कृष्टस्तु चतुर्मासमिन्द्रवल्लोकरक्षिणाम् ॥306॥

तमोऽरुणोदादुद्गत्य वृण्वत्कल्पचतुष्टयम् । कल्पानां विभजेद्देशान् ब्रह्मलोकेन संगतः ॥307॥

। १७२१ ।

एकविंशतियुक्तानि शतानि दश सप्त च । उद्गत्यातः शरावाभं गतं विस्तीर्यमाणकम् ॥308॥

विष्कम्भपरिधी तस्य मूले संख्येययोजने । अग्रे त्वसंख्ये तस्माच्च कृष्णराज्यष्टकं बहिः ॥309॥

प्रागायताश्चतस्रोऽत्र चतस्रश्चोत्तरायताः । वेदिकायुग्मवत्ताश्च अन्योन्यं संश्रिताः स्थिताः ॥310॥

पूर्वापरे बहीराज्यौ षडस्रे तिमिरात्मके । दक्षिणोत्तरराज्यौ तु संस्थानाच्चतुरस्रिते ॥311॥

अन्तः पूर्वापरे राज्यौ चतुरस्रे प्रकीर्तिते । दक्षिणोत्तरराज्यौ तु त्रयस्रे पूर्वापरायते ॥312॥

आकाशोऽभ्यन्तराद् बाह्यः संख्येयगुण उच्यते । राज्यप्यभ्यन्तरा तद्वत्तमस्कायस्ततोऽधिकः ॥313॥

देशोनाभ्यन्तरायाश्च बाह्यराजी प्रकीर्तिता । बाह्यायाश्च पुना राज्या राजीमध्यं तु साधिकम् ॥314॥

The darkness, rising over the Aruṇa sea and covering the first four kalpas, dividing these parts of the kalpas, has become related with Brahmaloka. It rises for seventeen hundred twenty- one yojanas over this, taking the shape of a cup, extends all around. Its width and circumference is numerate yojanas at the base and then innumerate yojanas ahead. Out of it there are eight black rows. Out of

these four rows are oblong in the east and four rows are oblong in the north. Those rows stand mutually supported like the pair of altars. In formal nature of darkness the eastern western outer rows are sexagonal and the southern northern rows are quadrangle in shape. The interior eastern western rows are quadrangular and southern northern rose are triangular and said to be eastern western oblong. Relative to the interior space, the exterior has been said to be numerate times, similarly the interior row is also numerate times, the dark body is greater than that, the exterior row is slightly less than the interior row, and the middle row has been said to be slightly greater than the exterior row. //10.307-314//

अन्धकार अरुण समुद्रके ऊपर उठकर व प्रथम चार कल्पोंको आच्छादित करके इन कल्पोंके देशोंका विभाग करता हुआ ब्रह्म लोकसे संबद्ध हो गया है। वह इसके ऊपर सत्तरह सौ इक्कीस (१७२१) योजन ऊपर उठकर सकोरेके आकारको धारण करता हुआ विस्तारको प्राप्त हुआ है। उसका विस्तार और परिधि मूलमें संख्यात योजन और फिर आगे असंख्यात योजन प्रमाण है। उसके बाहर आठ कृष्णराजियाँ हैं। इनमें चार राजियाँ पूर्वमें आयत तथा चार राजियाँ उत्तरमें आयत हैं। वे राजियाँ वेदिकायुगलके समान परस्परका आश्रय लेकर स्थित हैं। अन्धकारस्वरूप पूर्वापर बाह्य राजियाँ षट्कोण तथा दक्षिण उत्तर राजियाँ आकारमें चतुष्कोण हैं। भीतरकी पूर्वापर राजियाँ चतुष्कोण तथा दक्षिण उत्तर राजियाँ त्रिकोण व पूर्वापर आयत कही गई हैं। अभ्यन्तर आकाशकी अपेक्षा बाह्य संख्यातगुणा कहा जाता है, उसी प्रकार अभ्यन्तर राजी भी संख्यातगुणी है, तमस्काय उससे अधिक है, अभ्यन्तर राजीसे बाह्य राजी कुछ कम तथा बाह्य राजीसे मध्य राजी कुछ अधिक कही गई है।।३०७-३१४।।

मध्ये तु कृष्णराजीनां लौकान्तिकसुरालयाः । पूर्वोत्तराद्यास्तेऽष्टौ च दृष्टाः सारस्वतादयः ॥315॥

At the centre of these black rows there are celestial planes of the Laukāntika deities. Those Sārasvata etc. eight laukāntika deities have been seen, respectively, in the east north etc. directions. // 10.315//

इन कृष्णराजियोंके मध्यमें लौकान्तिक देवोंके विमान हैं। वे सारस्वत आदि आठ लौकान्कि देव पूर्व उत्तर (ईशान) आदि दिशाओंके क्रमसे देखे गये हैं।।३१५।।

सारस्वताश्च आदित्या बह्नयश्चारुणा अपि । गर्दतोयाश्च तुषिता अव्याबाधाश्च सप्तमाः ॥316॥

आग्नेया उत्तरस्यां च अरिष्टा मध्यमाश्रिताः । लौकान्तिका विनारिष्टैरष्टसागरजीविताः ॥317॥

उक्तं च- [ त्रि. सा. 540] -

चोद्दसपुव्वधरा पडिबोहकरा तित्थयरविणिक्कमणे । एदेसिमट्ठजलही ठिदी अ रिट्ठस्स णव चेव ॥19॥

Sārasvata, Āditya, Vahni, Aruṇa, Gardatoya, Tiṣita, and seventh Avyābādha, these are situated in the north east directions etc. The south eastern Laukāntika reside in the north and the Ariṣta reside at the centre. Leaving the Ariṣtas, the remaining seven Laukāntika deities have their longevities as eight sāgaras. //10. 316-317//

सारस्वत, अदित्य, वह्नि, अरुण, गर्दतोय, तुषित और सातवें अव्यावाध ये; क्रमसे ईशान आदि दिशाओंमें स्थित हैं। आग्नेय लौकान्तिक उत्तरमें तथा अरिष्ट मध्यमें रहते हैं। अरिष्टोंको छोड़कर शेष सात लौकान्तिक देवोंकी आयु आठ सागर प्रमाण होती है।।३१६-३१७।।

प्रकीर्णकविमानानि तेषां वृत्तानि तानि च । अरिष्टानां विमानं तु प्रोक्तमावलिकागतम ॥318॥

शतानि सप्त सप्तापि देवाः सारस्वताः मताः । तुषिता गर्दतोयाश्च आदित्याश्च तथोदिताः ॥319॥

। ७०७ । ७०७ ।

नवाग्राणि शतानि स्युर्नवाप्याग्नेयनामकाः । अव्याबाधास्तथारिष्टा आग्नेयसमसंख्यकाः ॥320॥

। ९०६ ।

चतुर्दश सहस्राणि चतुर्दश च केवलाः । बह्नयः संख्यया ज्ञेया अरुणा अपि तत्समाः ॥321॥

। १४०१४ ।

उक्तानि त्रिलोकप्रज्ञप्तौ [ ति. प. 8, 597-634 ]

अरुणवरदीवबाहिरजगदीदो जिणवरुत्तसंखाणि । गंतूण जोयणाणि अरुणसमुद्दस्स पणिधीए ॥20॥

एक्कदुगसत्तएक्के अंककमे जोयणाणि उवरि णहे । गंतूणं वलयेणं चिट्ठेदि तमो तमोक्कायो ॥21॥

। १७२१ ।

आदिमचउकप्पेसुं देसवियप्पाणि तेसु कादूण । उवरिगदबम्हकप्पप्पढमिंदयपणिधितलपत्ते ॥22॥

मूलम्मि रुंदपरिही हवंति संखेज्जजोयणा तस्स । मज्झम्मि असंखेज्जा उवरिं तत्तो असंखेज्जा ॥23॥

संखेज्जजोयणाणिं तमकायादो दिसाए पुव्वाए । गच्छेय सडंस मुरवायारधरा दक्खिणुत्तरायामा ॥24॥

णामेण किण्णराई पच्छिमभागे वि तारिसा य तमो । दक्खिणउत्तरभागे तम्मेत्तं गदुव दीहचउरस्सा ॥25॥

एक्केक्ककिण्णराई हवेइ पुव्वावरिं तदायामा । एदाओ राजीवो णियमेण छिवंति अण्णोण्णं ॥26॥

संखेज्जजोयणाणिं राजीहिंतो दिसाये पुव्वाए । गंतूणब्भंतरिए राजी किण्हा य दीहचउरस्सा ॥27॥

उत्तरदक्खिणदीहा दक्खिणराजिं ठिदा पविसिदूण । पच्छिमदिसाए उत्तरराजिं छिविदूण अण्णतमो ॥28॥

संखेज्जजोयणाणिं राजीदो दक्खिणाए आसाए । गंतूणब्भंतरिए एक्कं चिय किण्हराजी य ॥29॥

दीहेण छिंदिदस्य य जवखेत्तस्सेक्कभागसारिच्छा । पच्छिमबाहिरराजिं छविदूणं सा ठिदा णियमा ॥30॥

पुव्वावरआयामा तमकायदिसाए होदि तप्पंती । उत्तरभागम्मि तमो एक्को छिविदूण पुव्वहिराजिं ॥31॥

अरुणवरदीवबाहिरजगदीए तह स तमसरीरस्स । विच्चालणहयलादो अब्भंतरराजितिमिरकायाणं ॥32॥

विच्चालायासं तह संखेज्जगुणं हवेदि णियमेण । तम्माणादुण्णेयं अब्भंतरराजि संखगुणजुत्तो ॥33॥

अब्भंतरराजीदो अदिरेगजुदो हवेदि तमकायो । अब्भंतरराजीदो बाहिरराजी वि किंचूणा ॥34॥

बाहिरराजीहिंतो दोण्णं राजीण जो दु विच्चालो । अदिरित्तो इय अप्पाबहुलत्तं होदि चउसु य दिसासुं ॥35॥

एदम्मि तम्मि देसे विहरंते अप्परिद्धिया देवा । दिम्मूढा वच्चन्ते माहप्पेणं महड्ढियसुराणं ॥36॥

राजीणं विच्चाले संखेज्जा होंति बहुविहविमाणा । एदेसु सुरा जादा खादा लोयंतिया णामा ॥37॥

संसारवारिरासी जो लोगो तस्स होंति अंतम्मि । जम्हा तम्हा एदे देवा लोयंतिय त्ति गुणणामा ॥38॥

ते लोयंतियदेवा अट्ठसु राजीसु होंति विच्चाले । सारस्सदपहुदि तहा ईसाणदिसादियासु चउवीसं ॥39॥

पुव्वुत्तरदिब्भागे वसंति सारस्सदा सुरा णिच्चं । आइच्चा पुव्वाए अणलदिसाए वि वण्हिसुरा ॥40॥

दक्खिणदिसाए अरुणा णेरिदिभागम्मि गद्दतोया य । पच्छिमदिसाए तुसिदा अव्वावाहा समीरदिब्भाए ॥41॥

उत्तरदिसाए रिट्ठा एमेत्ते अट्ठ ताण विच्चाले । दो द्दो हवंति अण्णे देवा तेसिं इमे णामा ॥42॥

सारस्सदणामाणं आइच्चाणं सुराण विच्चाले । अणलाभा सूराभा देवा चिट्ठंति णियमेण ॥43॥

चंदाभा सच्चाभा देवा आइच्चवण्हिविच्चाले । सेयक्खा खेमंकरणामसुरा वण्हिअरुणमज्झम्मि ॥44॥

विसकोद्ठा कामधरा विच्चाले अरुणगद्दतोयाणं ।

णिम्माणराजदिसअंतरक्खिणो गद्दतोयतुसिदाणं ॥45॥

तुसिदव्वाबाहाणं विच्चाले अप्पसव्वरक्खसुरा । मरुदेवा वसुदेवा तह अव्वाबाहरिद्ठमज्झम्मि ॥46॥

सारस्सदरिद्ठाणं विच्चाले अस्सविस्सणामसुरा । सारस्सदआइच्चा पत्तेक्कं सत्त सत्त सया ॥47॥

सा आ [अ] सू आ । आ चं तू वं । व श्रे क्षे अ । अ व [वृ] ता [का] ग । ग नि दि तु । तु आ स अ । अ म व अ । अ अ वि सा ।

। ७०७ । ७०७ ।

वण्ही अरुणा देवा सत्तसहस्साणि सत्त पत्तेक्कं । णवजुत्तणवसहस्सा तुसिदसुरा गद्दतोया य ॥48॥

। ७००७ । ७००७ । ९००९ । ९००९ ।

अव्वावाहारिद्ठा एक्करससहस्स एक्करससजुत्ता । अणलाभा वण्हिसमा सूराभा गद्दतोयसारिच्छा ॥49॥

। ११०११ । ७००७ । ९००९ ।

अव्वावाहसरिच्छा चंदाभसुरा हवंति सच्चाभा । अजुदं तिण्णि सहस्सा तेरसजुत्ता य संखाए ॥50॥

। ११०११ । १३०१३ ।

पण्णरस सहस्साणिं पण्णरसजुदाणि होंति सेयक्खा । खेमंकराभिहाणा सत्तरससहस्सयाणि सत्तरसं ॥51॥

१५०१५ । १७०१७ ।

उणवीससहस्साणिं उणवीसजुदाणि होंति विसकोद्ठा । इगिवीससहस्साणिं इगिवीसजुदाणि कामधरा ॥52॥

। १९०१९ । २१०२१

णिम्माणराजणामा तेवीससहस्सयाणिं तेवीसं । पणुवीससहस्साणिं पणुवीस दिगंतरक्खिणो होंति ॥53॥

। २३०२३ । २५०२५ ।

सत्तावीससहस्सा सत्तावीसं च अप्परक्खसुरा । उणतीससहस्साणिं उणतीसजुदाणि सव्वरक्खा य ॥54॥

। २७०२७ । २९०२९ ।

एक्कत्तीससहस्सा एक्कत्तीसं हवंति मरुदेवा । तेत्तीससहस्साणिं तेत्तीसजुदाणि वसुणामा ॥55॥

। ३१०३१ । ३३०३३ ।

पंचत्तीससहस्सा पंचत्तीसा हवंति अस्ससुरा । सत्तत्तीस सहस्सा सत्तत्तीसं च विस्ससुरा ॥56॥

। ३५०३५ । ३७०३७ ।

चत्तारि य लक्खाणिं सत्तरस सहस्साणि अडसयाणिं पि । छब्भहियाणिं होदि हु सव्वाणं पिंडपरिसंखा ॥57॥

। ४१७८०६ ।

ईषत्प्राग्भारसंज्ञायाश्चतुरन्तविनिर्गताः । स्पृशन्त्यः कृष्णराजीनां बाह्यपार्श्वानि रज्जवः ॥322॥

तिर्यग्लोके पतन्त्येताः स्वयंभूरमणोदधेः । असंख्येयतमे भागे अभ्यन्तरतटात्परम् ॥323॥

तमस्कायस्य राजेश्च पार्श्वेभ्योऽप्यवलम्बकाः । गत्वा चाद्यादसंख्येयद्वीपवार्धीन् पतन्ति च ॥324॥

उक्तं च चतुष्कं त्रिलोकप्रज्ञप्तौ 8, 659-662 ]--

एदस्स चउदिसासुं चत्तारि तमोमयाओ रज्जूओ । णिस्सरिदूणं बाहिरराजीणं होदि बाहिरप्पासा ॥58॥

तच्छिविदूणं तत्तो ताओ पडिदाओ चरिमउवहिम्मि । अब्भंतरतीरादो संखातीदे य जोयणे य धुवं ॥59॥

बाहिरचउराजीणं बहिरवलंबो पडेदि दीवम्मि । जंबूदीवाहिंतो गंतूण असंखदीववारिणिहिं ॥60॥

बाहिरभागाहिंतो अवलंबो तिमिरकायणामस्स । जंबूदीवे [हिंतो] तम्मेत्तं गदुव पडेदि दीवम्मि ॥61॥

शुभशय्यातलेष्वेते उदयेष्विव भास्कराः । पुण्यै पूर्वाजितैर्देवा जायन्ते गर्भवर्जिताः ॥325॥

आनन्दतूर्यनादैश्च तुष्टामरबहुस्तवैः । जयशब्दरवैश्चैषां बुध्यन्ते जननं सुराः ॥326॥

देवा देवीसहस्राणां प्रहृष्टाननपुष्पितम् । सुरपंकजषण्डे स्वं पश्यन्ते(तो)ऽश्नुवते रतिम् ॥327॥

पूर्वप्राप्तविजानाना जायन्तेऽवधिना सह । नानाविद्यासु निष्णाताः प्राज्ञाः सुप्तोत्थिता इव ॥328॥

सुखस्पर्शसुखालोकसुगन्धिविमलोज्ज्वलाः । देवानां शुचयो देहा वैडूर्यमणिनिर्मलाः ॥329॥

दृष्टवा दिव्यां विभूतिं च सर्वतश्चित्तहर्षिणीम् । प्रीतिभारसमाक्रान्ता विह्वला इव ते क्षणम् ॥330॥

प्रत्यक्षं फलमालोक्य धर्मे संवृद्धभक्तयः । तैश्चोपबृंहिता देवैः प्रथमं धर्ममीडिते ॥331॥

स्नात्वा हृदं प्रविश्याग्रे अभिषेकमवाप्य च । अलंकारसभां गत्वा दिव्यालंकारभूषिताः ॥332॥

व्यवसायसभां भूयो गत्वा पूजाक्रियोद्यताः । नन्दासु शुभभृङ्गारान् पूरयित्वामलोदकैः ॥333॥

चलत्केतुपताकाद्याश्छत्रचामरसंवृताः । सुगन्धिसुमनोवासवर्णचूर्णविलेपनाः ॥334॥

कृत्वाभिषेकं संपूज्य नत्वा च परमार्हतः । ततः सुदृष्टयो देवाः विषयानुपभुञ्जते ॥335॥

देवानामुदितं श्रुत्वा सुरा मिथ्यादृशोऽपि च । प्रायेण कुर्वते पूजामर्हतां सुरबोधिताः ॥336॥

दिव्याभरणदीप्ताङ्गा यथेष्टशुभविक्रियाः । चित्र(त्त)नेत्रहरात्यन्तचारुरूपसमन्विताः ॥337॥

देवोपचारसिद्धाभिर्नित्ययौवनचारुभिः । प्रियाभिरतिरक्ताभिः प्राप्नुवन्ति रतिं सुराः ॥338॥

प्रतिकारमनालोक्य स्नेहसौभाग्यसाधिकम् । कृतकाचारनिर्मुक्तं शुद्धं प्रेम सुरालये ॥339॥

अन्योन्यप्रीतिसद्भावं विन्दन्तोऽवधिनाधिकम् । देवा देव्यश्च कामान्धा न विदन्ति गतं क्षणम् ॥340॥

त्रिपुष्करादिभिर्वाद्यैर्गीतैश्च मधुरस्वरैः । नृत्तैश्च ललितैर्नैकैः प्रमोदजननैः शुभैः ॥341॥

शब्दरूपरसस्पर्शान् गन्धांश्च विविधान् शुभान् । भुञ्जन्ते विविधान् भोगान् मनोज्ञान् प्रियवर्धनान् ॥342॥

नानाङ्गरागवासिन्यो नानाभरणभूषिताः । अम्लानमाल्यधारिण्यः कृतचित्रविशेषकाः ॥343॥

ताभिर्नैकाप्सरोभिश्च क्रीडारतिपरायणाः । वेदयन्ति महत्स्वर्गे सर्वे सुरगणाः सुखम् ॥344॥

हेमरत्नमयेष्वेते पञ्चवर्णेषु वेश्मसु । पुष्पोपहाररम्येषु धूपगन्धोपवासिषु ॥345॥

आरामवापीगेहेषु द्वीपपर्वतसानुषु । नानाक्रीडनदेशेषु रमन्ते भोगभूमिषु ॥346॥

सदैवाचरितास्तेषां विषयाश्चित्तहर्षिणः । जयन्त इव चान्योन्यं नित्यं प्रीतिसुखावहाः ॥347॥

महाकल्याणपूजासु यान्ति कल्पनिवासिनः । प्रणमन्ति परे भक्त्या तत्रैवोज्ज्वलमौलिभिः ॥348॥

जित्वेन्द्रियाणि चरितैरमलैस्तपोभि राक्रम्य नाकनिलयान् ज्वलतो तिदीप्त्या ।
राजन्ति कान्तवपुषः शुभभूषणाढ्या । देवावसन्ततिलका इव पुष्पपूर्णाः ॥349॥

इति लोकवभागे स्वर्गविभागो नाम दशमं प्रकरणं समाप्तम् ॥10॥

# एकादशो विभागः

सिद्धानां भाषितं स्थानमूर्ध्वलोकस्य मूर्धनि । ईषत्प्राग्भारसंज्ञा तु पृथिवी पाण्डराष्टमी ॥1॥

अष्टयोजनबाहल्या मध्येऽन्ते पत्रवत्तनुः । मानुषक्षेत्रविस्तीर्णा श्वेतच्छत्राकृतिश्च सा ॥2॥

विस्तारो मानुषक्षेत्रे परिधिश्चापि वर्णितः । मध्यात्प्रभृतिबाहल्यं क्रमशोहीनमिष्यते ॥3॥

। ४५००००० । १४२३०२४६ ।

The diameter of the human universe and the circumference has been related as those of that earth. Their width or thickness (bāhalya) from central part has been regarded reducing successively.//11.3//

। 4500000 । 14230249 ।

[Note: Cf. TPT, vv. 8.657-658]

मनुष्यलोकका जो विस्तार । (४५००००० यो.) और परिधि (१४२३०२४६ यो.) कही गई है वही विस्तार और परिधि उक्त पृथिवीकी भी निर्दिष्ट की गई है। उसका बाहल्य मध्य भागसे लेकर क्रमसे उत्तरोत्तर हीन माना जाता है।।३।।

उक्तं च षट्कं त्रिलोकप्रज्ञप्तौ 8, 652-54; 656-58 ]

सव्वत्थ सिद्धिइंदयकेदणदंडादु उवरि गंतूणं । बारसजोयणमेत्तं अट्ठमिया चिट्ठदे पुढवी ॥1॥

पुव्वावरेण तीए उवरिं हेट्ठिमतडेसु पत्तेक्कं । वासो हवेदि एक्को रज्जू थोवेण परिहीणा ॥2॥

उत्तरदक्खिणभागे दीहं किंचूणसत्तरज्जूओ । वेत्तासणसंठाणा सा पुढवी अट्ठजोयणा बहला ॥3॥

एदाए बहुमज्झे खेत्तं णामेण ईसपब्भारं । अज्जुणसुवण्णसरिसं णाणारयणेहिं परिपुण्णं ॥4॥

उत्ताणधवलछत्तोवमाणसंठाणसुंदरं एदं । पंचत्तालं जोयणलक्खाणिं वाससंजुत्तं ॥5॥

। ४५००००० ।

तम्मज्झबहलमट्ठं जोयणया अंगुलं पि अंतम्मि । अट्ठमभूमज्झगदो तप्परिही मणुवखेत्तपरिहिसमा ॥6॥

सर्वार्थाद् द्वादशोत्पत्य योजनानि स्थिता शुभा । सा त्वर्ज(र्जु)नमयी तस्या ऊर्ध्वं च वलयत्रयम् ॥4॥

That silvern good earth is situated twelve yojanas above the Sarvārthasiddhi Indraka. These are three air-envelops above it. //11.4//

वह रजतमयी उत्तम पृथिवी सवार्थसिद्धि इन्द्रक से बारह योजन ऊपर जाकर स्थित है। उसके ऊपर तीन वातवलय हैं।।४।।

देशोनं योजनं तच्च पूर्वमेव तु भाषितम् । तृतीयतनुवान्ते सर्वे सिद्धाः प्रतिष्ठिताः ॥5॥

क्रो । घनो २ । घना १ । तनु १ ।

The width of those three air-envelops is one yojana alone which has been related earlier. At the end of the third thin air-envelop, at the end are situated all the accomplished beings [bios]. //11.5//

kro । ghano 2 । ghana 1 । tanu 1 ।

उन तीनों वातवलयोंका विस्तार कुछ कम एक योजन मात्र है जो पूर्वमें कहा ही जा चुका है। तीसरे तनुवातवलयके अन्तमें सब सिद्ध जीव स्थित हैं। घनोदधि २ को., घन १ को., तनु १ को. [४२५ धनुषकम] ।।५।।

गव्यूतेस्तत्र चोर्ध्वायास्तुर्ये भागे व्यवस्थिताः । अन्त्यकायप्रमाणात्तु किंचित्संकुचितात्मकाः ॥6॥

These situated in the upper forth part of the gavyūti, those accomplished bios have soul's points (ātma pradeśa) slightly less than those in the ultimate body. //11.6//

वहाँ उपरिम गव्यूतिके चतुर्थ भागमें स्थित वे सिद्ध अन्तिम शरीरके प्रमाणसे कुछ संकुचित (हीन) आत्मप्रदेशों वाले हैं।।६।।

धनुःशतानि पञ्चैव देशोनानीति भाषितम् । सिद्धावगाहनक्षेत्रबाहल्यमृषिपुंगवैः ॥7॥

।५००।

The eminent among ascetics, the Gaṇadharas etc. have related the thickness of the immersion region of the accomplished bios as slightly less than five hundred dhanuṣas. //11.7//

। 500 ।

ऋषियोंमें श्रेष्ठ गणधरादिकोंने सिद्धोंके अवगाहनाक्षेत्रके बाहल्यका प्रमाण कुछ कम पाँच सौ (५००) धनुष मात्र कहा है।।७।।

अवगाढश्च यत्रैकस्तत्रानेकाः समागताः । धर्मास्तिकायतन्मात्रं गत्वा न परतो गताः ॥8॥

Where there is immersion of an accomplished bios, there are situated many accomplished bios. Those accomplished bios have not gone ahead of the region upto which extends the aether body Dharmāstikāya. //11.8//

जहाँ पर एक सिद्ध जीवका अवगाह है वहीं पर अनेक सिद्ध जीव स्थित हैं। वे सिद्ध जीव जहाँ तक धर्मास्तिकाय है वहीं तक जाकर उसके आगे नहीं गये हैं।।८।।

सिद्धाः शुद्धाः विमुक्ताश्च विभवा अजरामराः । असंगास्तीर्णसंसाराः पारगा बन्धनिःसृताः ॥9॥

अलेपा(:) कर्मनिर्मुक्ता अरजस्का अमूर्तयः । शान्ताः सुनिर्वृताः पूताः परमाः परमेष्ठिनः ॥10॥

अक्षयाः अव्ययानन्ताः सर्वज्ञाः सर्वदर्शिनः । निरिन्द्रिया निराबाधा कृतकृत्याश्च ते स्मृताः ॥11॥

सर्वदा सर्वजीवानां गतिमागतिमेव च । च्यवनं चोपपातं च बन्धमोक्षौ च कर्मणाम् ॥12॥

भक्तमृद्धिं कृतं चापि चिन्तितं सर्वभावि च । जानानाः पर्ययैः सर्वैः सुखायन्तेऽतिनिर्वृताः ॥13॥

त्रिधा भिन्नं जगच्चेदं निरयान् द्वीपसागरान् । धरानद्यद्रितीर्थानि विमानभवनानि च ॥14॥

सिद्धो विचित्रचारित्रः षड्द्रव्यनिचितं बृहत् । आलेख्यपटवत्पश्यन्न रज्यति न रुष्यति ॥15॥

मत्तः पिशाचाविष्टो वा तथा पित्तविमोहितः । तैर्विमुक्तः पुनर्दोषैः स्वस्थो यद्वत्सुखायते ॥16॥

रागद्वेषवशातीतः प्रसन्नोदकवच्छुचिः । कामक्रोधविनिर्मुक्तः सिद्धस्तद्वत्सुखायते ॥17॥

विषयेषु रतिं मुढा मन्यन्ते प्राणिनां(नः) सुखम् । न तत्सुखं सुखं ज्ञानात् प्राज्ञानां तत्वदर्शिनाम् ॥18॥

अमेध्यरतयो दृष्टाः कृमिशूकरकुक्कुराः । तदप्येषां सुखं प्राप्तं रतिं सुखमितीच्छताम् ॥19॥

कष्टे रत्यरती जन्तून् बाधेते जन्मनि स्थितान् । प्रियाप्रिये विशीले च दरिद्रं वनिते यथा ॥20॥

दुःखेन महता भग्नो रमतेऽज्ञस्तथाविधे । विषताभिद्रुतो यद्वत्सदोषां सरितं व्रजेत् ॥21॥

भारभग्ने स्ववामांशे दक्षिणे प्रक्षिपेद्यथा । तथा खेदप्रतीकारे रममाणः सुखायते ॥22॥

गतितृष्णाक्षुधाक्रान्तो विश्रमोदकभोजनैः । प्रतीकारात्सुखं वेत्ति श्रमाभावान्महत्सुखम् ॥23॥

कल्हारकुमुदाम्भोजकुसुमैः परिकर्मितम् । चन्दनोशीरशीताम्बुव्यजनानिलवारितम् ॥24॥

ज्वरदाहपरिक्लिष्टं तृष्णार्तं प्रेक्ष्य मानुषम् । ज्वराय स्पृहयेत्कश्चित्परिकर्माभिलाषतः ॥25॥

प्रतीकारसुखं जानंस्तथा यत्र क्वचिद्रतिम् । निर्व्याधिं स्वस्थमासीनं स मन्ये दुःखितं वदेत् ॥26॥

कीटिकादंशदुःखज्ञः अनुमानेन बुध्यते । शार्दूलबलवद्दंष्ट्राक्षोदने वेदनामुरुम् ॥27॥

अल्पपापक्षयादाप्तं सुखं ज्ञात्वा सचेतनः । सर्वकर्मक्षयोत्पन्नं सुखं सिद्धस्य बुध्यते ॥28॥

व्याधिभिर्युगपत्सर्वैः संभवद्भिर्विबाधितः । एकैकस्य शमे शान्तिं सर्वेषां च यथाप्नुयात् ॥29॥

एककैकस्येह पापस्य नाशे चेदश्नुते सुखम् । दुष्कृतं निखिलं दग्धवा सुखी सिद्धो न किं भवेत् ॥30॥

पराराधनदैन्योनः कांक्षा-कम्पन-निःसृतः । लब्धनाशभयातीतो गतो हीनावमानतः ॥31॥

अज्ञानतिमिरापूर्णां पापकर्मबृहद्गुहाम् । चिरमध्युष्य निष्क्रान्तो ज्ञानं सकलमाप्तवान् ॥32॥

लभते यत्सुखं ज्ञानात् सिद्धस्त्रैकाल्यतत्ववित् । उपमा तस्य सौख्यस्य मृग्यमाणा न दृश्यते ॥33॥

श्लोकमेकं विजानानः शास्त्रं ग्रन्थार्थतोऽपि च । ह्लादते मानुषस्तीव्रं किं पुनः सर्वभाववित् ॥34॥

नारकाणां तिरश्चां च मानुषाणां च यद्विधाः । शारीरा मानसा बाधास्ताश्चिरं प्राप्य खिन्नवान् ॥35॥

सर्वतो रहितस्ताभिर्मुक्तः संसारभारकात् । स्वाधीनश्च प्रसन्नश्च सिद्धः सुष्ठु सुखायते ॥36॥

दुःखैर्नानाविधैः क्षुण्णो जीवः कालमनादिकम् । तेभ्योऽतीतो भृशं शान्तो मग्नो ननु सुखार्णवे ॥37॥

मनोज्ञैर्विषयैस्तृप्तः सर्ववस्तुषु निस्पृहः । प्रसन्नः स्वस्थमासीनः सुखी चेन्निर्वृतस्तथा ॥38॥

लक्षणाङ्कितदेहानां दर्पणोत्थितबिंबवत् । ज्ञानदर्शनतत्त्वज्ञः शुद्धात्मा सिद्ध इष्यते ॥39॥

क्षायिकज्ञानसम्यक्त्वं वीर्यदर्शनसिद्धता । निर्द्वन्द्वं च सुखं तस्य उक्तान्यात्यन्तिकानि हि ॥40॥

अवेदश्च(श्चा)कषायश्च निष्क्रियो मूर्तिवर्जितः । अलेपश्चाप्यकर्ता च सिद्धः शाश्वत इष्यते ॥41॥

अक्षयानघमत्यन्तममेयानुपमं शिवम् । ऐकान्तिकमतृष्णं च अव्याबाधं महासुखम् ॥42॥

त्रैकाल्ये त्रिषु लोकेषु पिण्डितात्प्राणिनां सुखात् । अनन्तगुणितं प्राहुः सिद्धक्षणसुखं बुधाः ॥43॥

तिर्यग्लोकप्रमाणैका रज्जुर्मीयेत चेत्तया । चतुर्दशगुणो लोको भवत्यायाममानतः ॥44॥

मेरुमूलादधः सप्त ऊर्ध्वं तस्माच्च रज्जवः । सप्तरज्जु प्रमाणैषा अधोलोकान्तरुन्द्रता ॥45॥

। ७ । ७ ।

ऐशानाद्रज्जुरध्यर्धा(?)माहेन्द्रात्सार्धकं द्वयम् । सहस्राराच्च पंचैव अच्युतात्षडुदाहृताः ॥46॥

। ३/२ । ५/२ । ५ ।

आ लोकान्तात्ततः सप्त एवं ताः सप्तरज्जवः । ऊर्ध्वः संख्यगुणो मध्यादधोलोकोऽधिकस्ततः ॥47॥

चतुर्थ्यां समविस्तारो ब्रह्मलोकश्च भाषितः । प्रथमापृथिवीकल्पौ आद्यौ चानुत्तराण्यपि ॥48॥

द्वितीयापृथिवीकल्पौ द्वितीयौ युगपत् स्थितौ । ग्रैवेयाणि तथैव स्युः शेषाणामपि योजयेत् ॥49॥

उक्तं च त्रयम् [ कत्तिगेयाणु. 118-19 ]-

सत्तेक्क पंच एक्क य मूले मज्झे तहेव बम्हंते । लोयंते रज्जूओ पुव्वावरदो य वित्थारो ॥7॥

। ७ । १ । ५ । १ ।

उत्तरदक्खिणदो पुण सत्त वि रज्जू हवेइ सव्वत्थ । उड्ढो चोद्दस रज्जू सत्त वि रज्जू पुणो लोओ ॥8॥

[ त्रि. सा. 458 ]--

मेरुतलादु दिवड्ढं दिवड्ढ दलछक्क एक्करज्जुम्मि । कप्पाणमट्ठजुगला गेवेज्जादी य होंति कमे ॥9॥

। ३/२ । ३/२ । १/२ । १/२ । १/२ । १/२ । १/२ । १/२ ।

युक्तः प्राणिदयागुणेन विमलैः सत्यादिभिश्च व्रतैः । मिथ्यादृष्टिकषायनिर्जयशुचिर्जित्वेन्द्रियाणां वशम् ॥10॥
दग्ध्वा दीप्ततपोग्निना विरचितं कर्मापि सर्व मुनिः । सिद्धिं याति विहाय जन्मगहनं शार्दूलविक्रीडितम् ॥50॥
भव्येभ्यः सुरमानुषोरुसदसि श्रीवर्धमानार्हता । यत्प्रोक्तं जगतो विधानमखिलं ज्ञातं सुधर्मादिभिः ॥11॥
आचार्यावलिकागतं विरचितं तत्सिंहसूरर्षिणा । भाषायाः परिवर्तनेन निपुणैः संमान्यतां साधुभिः ॥51॥
वैश्वे स्थिते रविसुते वृषभे च जीवे । राजोत्तरेषु सितपक्षमुपेत्य चन्द्रे ॥12॥
ग्रामे च पाटलिकनामनि पाणराष्ट्रे । शास्त्रं पुरा लिखितवान् मुनिसर्वनन्दी ॥52॥
संवत्सरे तु द्वाविंशे कांचीशः सिंहवर्मणः । अशीत्यग्रे शकाब्दानां सिद्धमेतच्छतत्रये ॥53॥

। ३८० ।

पंचादश शतान्याहुः षट्त्रिंशदधिकानि वै । शास्त्रस्य संग्रहस्त्वेदं (?) छन्दसानुष्टुभेन च ॥54॥

इति लोक विभागे मोक्षविभागो नामैकादशं प्रकरणं समाप्तम् ॥11॥

# FIRST DIVISION

# PRATHAMO VIBHĀGAḤ

This chapter describes the five types of Purāṇas and the Loka or universe location and its three divisions. The middle universe contains the Jambū island whose extention, circumference and its geographical divisions and contents are described. The width of Bharata region, Vijayārdha's location,and relevant structures are described. The southern Bharata and northern Bharata in their half are described for their chords and arcs. Similarly, the Himavāna, Mahāhimavāna and Niṣadha mountains are described for their chords and arcs. Similar symmetrical portions as Airāvata regions, the Padma lake and the Gaṅgā etc. are described. Other rivers are described.

The following islands, the Dhātakī khaṇḍa and the Puṣkarārdha are having a different structure for their rivers, regions and mountains in various measures. Then the Videha region of the Jambū island is described alongwith its rivers, certain peaks of mountains like the tusks of elephants.

The meru mountain is also described for its dimensions, shape and size and various types of strctures.

Note: This text is in Sanskrit.

TECHNICAL TERMS:

Loka, Aloka, Lokatattva, Kṣetra, Kāla, Tiryagloka (Madhyaloka), Ūrdhva, Adhaḥ, Ananta, Bāhalya, Jhallari, Vetrāsana, Mṛdaṅga, Arhat, Kevaladṛṣṭi, Yojana, Sata, Sahasra, Lakṣa, Sthānāt, Kramād, Grāhyaḥ, Sapta dvedve ṣaḍekakaṁ, Triṇi, (316227), Gavyūti, Aṣṭāviṁśa śataṁ (128), Dhanu, Parikṣepa, Pramāṇa, Trayodaśa (13), Aṅgula, Ṣaḍviśati, Śatāni syuḥ pañca (526). Ardha ($\frac{1}{2}$), Ekānnaviṁśaterbhāgāḥ ṣaṭ ($\frac{6}{19}$), Pañcaviṁśati (25), Dve śate triṁśadaṣṭāu ca kalāstisraśca ($238\frac{3}{19}$). Śatānāṁ saptanavatiḥ sādhikā ṣaḍabhiraṣṭakaiḥ (9748)

kālaśca dvādaśaiva ($\frac{12}{19}$), Jyārdha, Iṣu, Viṣkambha, Guṇita, Bāṇa, Jīvā, Syād, Varga, Mūla, Cāpa, Daśa, Ayuta (10,000), Uccharito, Cāpapṛṣṭhakam, Bhāga, Cūlikā, Pārśva bhujā, Āyataḥ, Daśa (10), Āgāḍha, Ucchraya, Mukhavyāsaḥ, Krośaḥ, Avagāha, Daśāhata (Ten times), Vistīrṇa, Bahala (Bāhalya), Jihvikā (nālī or channel), Vistṛta, Kūṭakṛti, Śikhara, Gādhakam (depth), Aśīti (84), Tryastriṁśata sahasrāṇi (33,000), Ekādaśa sahasra (11,000), Śatānyaṣṭau (800), Dvicatvāriṁśa (42), Dvekale ($\frac{2}{19}$), Tripañacāśatsahasra (53,000), ṣaṣṭi (60), Avagāḍha (Foundation), Catuṣkoṇa (Vṛtta), Nabha (zero), Sārdhe, Sahasre dve (2500), Sahasrārdha (500), Sahassaduganaudi doṇṇi (2092), Mukha, Praveśa, Dvesahasre Śate dve ca deśonāśca trayodaśa ($2212\frac{7}{8}$), Saptādaśa ca lakṣāṇāmayutāni navāpi ca dvisahasraṁ nvatyagraṁ (1792090), Daṇḍa, Catuṣka (4), meru, Aṣṭāvekādaśāṁśakāḥ ($\frac{8}{11}$), Viṁśatis'ca, Punaścāṣṭau sahasrāṇi śatasayaṁ ṣoḍaśāgraṁ (28316), dviṣaṣṭi 62), Pañcaśata (500), Paridhi, Viṣkambha, Bāhya, Abhyantaraḥ, Alpahīnakaḥ, Ūna, Agra, Cūlikā, Dhṛuva, Samarundra, Bhūmi, Viśeṣa, Utsedha, Ekenaikadaśāṁśa ($\frac{1}{11}$), Śodhita, Pradeśa, Hāni, Kiṣku, Pādapa, Dik, Koṭi, ($10^7$), Ṣaṭkānāṁ, Ṣaṭsu (666666), Palya, Āyāma, Tuṅga, Pīḍhā, Āyata, Darghya, Tanu, Pārśva, Trihatāṣṭa sahasra (24,000), Dviguṇāṣṭa (16), Mukhamaṇḍapa, Prekṣaṇamaṇḍapa, Āsthāna maṇḍapa, Stūpa, Caitya tree, Siddhārtha tree, Stambha, Dhvajā, Vāpī, Vedikā, Śālmalī tree, Āyatana, Mānastambha, Aśoka vana, Prāsāda,

[**Gṛha:** Mālā, Vallī, Sabhā, Kadalī, Āsana, Prekṣaṇa, Vīnā, Garbha, Latā, Jāla, Śītā, Citrā, Prasādhana, Upasthāna, Mohana;]

[**Āsana:** Haṁsa, Krauñca, Siṁha, Gaja, Magara, Pravāla, Garuḍa, Sphaṭika praṇatonnataiḥ, Dīrgha, Svastika, Gola, Indrāsana, Gandhāsana;]

[**Meru:** Mandara, Girirāja, Priyadarśana, (Śiloccaya), Ratnoccaya, Lokanābhi, Manorama, Sudarśana, Diśādi, Uttama, Asta (accaya), Sūryāvarta, Svayaṁprabha, Vataṅka (Avataṁsa), Lokamadhya, Sūryāvarṇa;] Varam, Antara, Maṇḍala, Kevalajñāna locanaiḥ,

[**Sabha:** Sudharmā, Jinālaya, Upapāda, Abhiṣeka, Alaṅkāra, Mantra.]

## SYMBOLISM:

| | | |
|---|---|---|
| Yo | यो | yojana |
| Kro | क्रो | krośa |
| Dha | ध | dhanu |
| Aṁ | अं | aṅgula |
| Sā | सा | Sādhika |
| Bhā | भा | bhāga |
| Daṁ | दं | daṁda |
| Ha | ह | hasta |
| Vi | वि | vistāra or vitthāra |
| U | उ | ucchryā or uccheya |
| Pa | प | paridhi |
| Ā | आ | āyāma |
| A | अ | agādha |
| ko | को | kośa or krośa |

# MATHEMATICAL CONTENTS

## (vv. 1.3 et seq.)

The situation of the universe is at the centre of the endless space, having no end in all directions. This is divided into three types of universes: The upper universe, the middle universe

and the lower universe. The tiryak loka is situated in the middle of this universe at the centre of tiryak loka is the Jambū island at whole centre is the Mandara (meru) mountain.

The tiryak loka which so divided the universe into the upper, middle and lower universes, has the thickness of 1,00,000 yojanas, equal to the height of the meru.

Above that meru is the upper universe and below it is the lower universe.

The shapes of these universes have been given as follows:

| Universe | shape |
|---|---|
| upper universe | drum (mṛdaṅga) |
| middle universe | fringe (jhālara) |
| lower universe | wedge (vetrāsana) |

**Note:** It may be noted this text does not give the volume of the universe here.

Hence it appears that the text seems to have been compiled before the TPT and the DVL which contain elaborate description of the structure of the various universes under a measure from Parikarma sutra, although at some places the TPT verses have been quoted.

It can not thus be set whether the author was aware of the figure 1.3, which has a volume of 343 cubic rājus as against the figure 1.2 having a much less volume of $164 \frac{328}{1356}$ cubic rāju.




**Figure 1.1**




**Figure 1.2**




**Figure 1.2**

## (vv. 1.6 et seq.)

The diameter of the Jambū island is taken to be 1,00,000 yojanas and its circumference (differeing from the value in TPT) is 316227 yojanas, 3 kośas, 128 dhanuṣas and $13\frac{1}{2}$ aṅgulas. The value in the TPT carries us in terms of 316227 yojanas, 3 kośas, 128 dhanuṣas, 13 aṅgula and slightly more than half, converted as 5 jau,1 yūka, etc. Dr. R. C. Gupta has found out the value upto the problem of the TPT, vv. 4.56 et seq. upto the fraction $\frac{23213}{105409}$ kha kha, in a research paper, already discussed above. Thus the author of the Lokavibhāga has a rough approximation $\sqrt{(100000)^2 \times 10} = \sqrt{10}\,(100000)$, where $\sqrt{10} = 3.1622766.....$

Inside the Jambū island, has been inserted the India or Bhāratavarṣa towards the south. Ahead of this are the following

| seven regions | six rain carrying mountains |
|---|---|
| 1. Bharata | 1. Himvān |
| 2. Haimavata | 2. Mahāhimavāna |
| 3. Harivarṣa | 3. Niṣadha |
| 4 Videha | 4. Nīla |
| 5. Ramyaka | 5. Rukmī |
| 6. Hairanyavat | 6. Shikharī |
| 7. Airāvata | |

## (vv. 1.14 et seq.)

In the southern lateral part is situated the Bharata region whose width is $526\frac{6}{19}$. The widths of the mountain is double than that of the region and then twice that is the region ahead. This order is upto Videha region.




Figure 1.4

विजयार्धपर्वत

THE VIJAYĀRDHA MOUNTAIN



Figure 1.5

Similarly, in the same order there has been decrease ahead. Here, the $\frac{1}{190}$ th part of the Jambū island is recognized as the Bhāratavarṣa.

For example, the diameter of the Jambū island is 1,00,000 yojanas. The above order gives 190 divisions as follows:

| REGION | MEASURE IN YOJANA | MOUNTAIN | MEASURE IN YOJANA |
|---|---|---|---|
| Bhārata -1 | $526\frac{6}{19}$ | Nīla -32 | $16842\frac{2}{19}$ |
| Himavāna -2 | $1052\frac{12}{19}$ | Ramyaka-16 | $8421\frac{1}{19}$ |
| Haimavata -4 | $2105\frac{5}{19}$ | Rukmī -8 | $4210\frac{10}{19}$ |
| Mahāhimavāna-8 | $4210\frac{10}{19}$ | Hairaṇyavata-4 | $2105\frac{5}{19}$ |
| Harivarṣa -16 | $8421\frac{1}{19}$ | Shikharī -2 | $1052\frac{12}{19}$ |
| Niṣadha -32 | $16842\frac{2}{19}$ | Airāvata-1 | $526\frac{6}{19}$ |
| Videha-64 | $33684\frac{4}{19}$ | | |

Grand total is 1 + 2 + 4 + 8 + 16 + 32 + 64 + 32 + 16 + 8 + 4 + 2 + 1 = 190 parts.

Hence the proportionate parts can be found for their measure in yojana.

For example, the width of the Niṣadha or Nīla is given by

$$\frac{100000 \times 32}{190} = 16842\frac{2}{19} \text{ yojanas.}$$

## (vv. 1.17 et seq.)

The Vijayārdha mountain is in the middle of the Bharata region. The mountain is east west, extending to the sea, on both sides. It is 25 yojana high and has a foundation depth of $6\frac{1}{4}$ yojanas. It is 50 yojanas in width, having three mountain ranges. 10 yojanas higher from the base, the mountain has 10 yojanas of two technical ranges, whose length is equal to the range of the mountain. In these ranges there are 50 cities in the south and 60 cities in the north range. These are the capitals.

10 yojanas higher the northern range there is the city called Abhiyogyapura. 5 yojanas above this is the top, 10 yojanas in extension, called the Purnabhadra range. there are 9 peaks over the Vijayārdha. There height is $6\frac{1}{4}$ yojanas. Over the peak (Siddhāyatana), there is a temple facing towards east, $\frac{3}{4}$ kośa high. one kośa long, and half kośa broad.

## (v. 1.47)

The width of half of south Bharata should be known to be two hundred thirty-eight yojanas and three parts, that is, $238\frac{3}{19}$ yojana. Similarly, the width of half of north Bharata is the same, that is, $238\frac{3}{19}$ yojanas.

